R
S
V
L
00991

178/XXV
991

991

Registered No. M 2300.

Book XXV ॥ श्रीः ॥ Nos. 1 & 2

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥

पु. २५] कलि ५०५२ खर { कन्या साधारण सं १
तुला शास्त्रानुबन्ध सं १
आहत्य सं २

# THE UDYANA PATRIKA.

A

SANSKRIT MONTHLY

September & October 1951

A20

For the rate of subscription please see inside

# UDYANA PATRIKA.

Annual Subscription Rs. Two only.
Do. With Sastraic Supplement Rs. 3—0—0

उद्यानपत्रिका ॥

१. अस्या वार्षिकं मूल्यं द्वे रूप्ये । सानुबन्धायाः त्रीणि रूप्याणि।
२. कन्यामासे साधारणसञ्चिका अनन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणसञ्चिकाः षट्सु मासेषु अनुबन्धसञ्चिकाश्च प्रकाश्यन्ते।
३. ग्राहकीबुभूषद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम्।
४. वर्षमध्ये ग्राहकीभवतामपि कन्यासञ्चिकादिरेव पत्रिका प्रेष्येत
५. एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन्। गद्यरूपेषु अधिकतर आदरः।
६. प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसम्पादकाय प्रेषणीयाः।
७. एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः। (संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण।)
८. लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या।

मुद्रणकारः— S. Vijayaraghavan,
*Proprietor,* The Srinivasa Press,
Thiruvaiyaru P. O., Tanjore Dt.

निर्वाहकसम्पादकः— *Mimamsarnava Mimamsakesari, Panditaraja* D. T. Tatacharya Siromani, M. O. L.
Sri Venkateswara Oriental Institute,
TIRUPATI.

## विषयाः ॥

शास्त्रानुबन्धः— कुवलयानन्दः ३६५—३७०

1 मेनका।
2 व्याजोक्तिरत्नावळी।
3 पञ्चविंशं वयः।
4 संस्कृतग्रन्थजातम्।
5 वैदिका विशेषाः।
6 [illegible]निमतम्।
7 वृद्धभाषितम्।
8 तात्पर्यान्तरम्।
9 प्रकृतिभेदः।
10 पुस्तकपरामर्शः।
11 प्रतिबोधनम्। [wrapper]

प्रेषणीयेत्यमंस्महि । परन्तु भवतीनां मुखविलासः निश्चितं न ज्ञातः। तेनेमं पुरुषमेव प्रेषिषाम । तत्रत्यविषयजिज्ञासया यदस्माकं मनस्त्वरते तन्न परिच्छेद्यम् । अस्मदौत्सुक्यं न नियन्त्रणार्हम् । अस्मास्वनुकम्पया सद्यो विषया आवेदनीया इति तत्रभवतीपादयोः साष्टाङ्गप्रणामं कृत्वा प्रार्थयमानः तत्रभवतीनां निरन्तरसेवकः रङ्गराजुः ।"

इति मेनका लेखं कृत्स्नं महता परिश्रमेण पठित्वाऽवसाययति स्म । अतिकठिनचेतसामपि चेतसो विद्रावणार्हतावद्विषयभरितं लेखं न केऽपि पठितवन्तः स्युरिति नूनं नेयमतिशयोक्तिः । लेखस्यान्ते स्थितान् विषयान् ज्ञातवन्तः वराहस्वामी, मेनका, कनकाम्बा, स्वर्णाम्बेति चत्वारः कस्यामवस्थायामासतेति किं नाम विवृत्य कथनमपेक्षितम् । ते चत्वारोऽपि सशरीरमेव स्वर्गं गता इवाभवन् । साम्बशिवस्यापतिता विपदः, रङ्गराजोः असदृशानि करुणाकार्याणि, अन्ते परमकारुणिकस्य जगदीश्वरस्य कृपाकटाक्षेण स्वकीयानां महतां कष्टानां सवितुः पुरतस्तमसामिव विध्वंसनं च व्यतिषङ्गेण स्मृत्वा स्मृत्वा प्रशिथिलाङ्गप्रत्यङ्गाः वाक्स्तम्भेन मूकीभूताः हर्षे विषादे च निमग्नोन्मग्ना अभवन् ।

कतिपयनिमेषापगमे प्राप्तप्रसादो वराहस्वामी प्रेम्णा कनकाम्बामवलोक्य, 'पाट्टि, शरीरं मे स्वस्थम् । वयं सर्वे अद्यैव प्रस्थाय चेङ्गल्पट्टु गच्छेम' इति निस्सीमप्रहर्षं उवाच । तदाकर्णितवती मेनका स्वभर्तुः अप्रतिममनुरागं आसक्तिं चावेक्ष्य प्रहृष्टा स्मितं कृत्वा 'साधु तावत् । अधः पदविन्यासे हि जानुनि अद्यापि वेदना जायते । किं अस्यां स्थितौ तावद् दूरं प्रयाणं कर्तुं शक्यम् ? भिषजं तूर्णीं पृष्ट्वा श्वः परश्वो वा गच्छेम । भवतामम्बायाश्च शरीरं स्वस्थमिति सपदि तन्त्रीं प्रेषयेम । तया तेषामाश्वासो भवेत् ।' इत्यब्रवीत् । तच्छ्रुतवान् वराहस्वामी "न न । जानुनि मे वेदना तावती न भवति । भाटकमोटारमेकं कृत्वा इतः धूमशकटस्थानकं गच्छेम । शनैर्मां धूमशकटमारोपयत । सर्वे वयं प्रथमकक्ष्यायामारुह्य गच्छेम । इदं प्रयाणं मनागपि क्लेशकरं भवेदिति न मे भाति । आर्यं श्वशुरं द्रष्टुं त्वरते मे मनः । अत्रावस्थानं च अग्नेरुपरीव भवति । वैद्ये कृतहस्तायां महाभिषजि त्वयि मया सह आगच्छन्त्यां किं मे अवद्यं भविष्यति । सद्यः प्रस्थानमेव सम्यक्" इति सहर्षं ससान्त्वं

सानुबन्धं चोवाच।

इदमाकर्ण्य मेनका सस्मितवदना "तथा चेत्, यद् भवन्तश्चिन्तयन्ति तदस्माकं भाग्यम्। भवतामादेशस्य कोऽपवादः? नात्र, न तत्र। पाट्टि, क्व अस्मदीयः किट्टः, न दृश्यते?" इति।

तदाकर्णितवती कनकाम्बा 'स कोपनः महामूर्खः। अस्मिन् कलहे मूर्खकार्यं किमपि स किं कुर्यादिति भीता बहिर्गत्वा तिष्ठेति प्रेषिषम्। तमाहूय मोटारमानयेति वदामि' इत्यभिदधती बहिर्गत्वा तत्र स्थितं किट्टं दृष्ट्वा अन्तर्वृत्तं संक्षेपेण तस्मै निवेद्य मोटारमेकमानेतुं तं प्रेष्य अन्तरागच्छत्।

मोटारमादाय निवर्तमानस्य तस्य अर्धघटिका बभूव। तावत् मेनका वृत्तान् सर्वान् विषयान् संग्रहेण लेखद्वये विलिख्य एकस्मिन् नूर्जेहान्-अस्याः अन्यस्मिन् भिषजो हूण्याश्च विलासं लिखित्वा पत्रागारप्रापणाय प्रासादकर्मकरीहस्ते दत्त्वा प्रेषयामास।

ततःपरमल्पे काले, वराहस्वामी किट्टः, कनकाम्बा स्वर्णाम्बा, मेनका इत्यादयः सर्वे मोटारे उपविश्य सकुतूहलं एलुम्बूर् स्थानकं प्रयान्ति स्म।

---

## 28 अधिकारः ॥

### फलप्राप्तिः।

ततःपरं त्रयो मासा अगच्छन्। तञ्जापुरे धूमशकटस्थानस्य सविधे महाप्रासादः कश्चिदवर्तत। सः अर्धपाद ($\frac{1}{8}$) शिलादीर्घैः विशालैश्च प्राकारैः परिवृत आसीत्। नारिकेलक्रमुकचूतपनसमातुलुङ्गकादितरुनिबिडेषु तदारामेषु मयूराः मृगाः मर्कटाश्च परिप्लुता अक्रीडन्। कोकिलाः अविरतं स्वकीयं मधुरं ध्वनिमुद्भाव्य वीणागानं कुर्वन्त आसन्। पङ्क्तिशो निक्षिप्तानि विभ्राजमानानि पुष्पौषधिभाजनानि आङ्गलगुल्मवर्गाश्च रमणीयसन्निवेशानि भूत्वा पश्यतां चक्षूंषि चित्तं च शिशिरयन्ति स्म। सर्वतः कांस्यप्रतिमाद्वारा निर्गतानि जलानि वृष्टिवत् निबिडतृणेषु

धरातलेषु पुष्पौषधीषु धारया पतन्ति शीतलतामकुर्वन्। बहुसंवत्सराभिवृद्धोच्छ्रितशिफाः सहस्रस्थूणमण्टपकल्पा गम्भीरदर्शना वटवृक्षा अनन्ताः तत्र तत्र स्थित्वा प्रासादस्यान्तः सूर्यतापप्रवेशं निरुन्धाना अभवन्। ऋष्याश्रमतुल्यसन्निवेशं तत् स्थलं तदन्तर्गच्छतः परवशीकृत्य तेषां मनसि ब्रह्मानन्दं शान्तिं च प्रादुरभावयत्। तस्योन्नतस्य प्रासादस्य द्वारे प्राकारभित्तिपार्श्वद्वये पळपळेति विद्योतमाने द्वे पित्तलशकले प्रहते आस्ताम्। तयोर्दक्षिणे 'तञ्जा-माण्डलिकः साम्बशिवः' इति, वामतः स्थिते 'तञ्जा-उपप्राड्विवाकः वराहस्वामि अय्यङ्गार्' इति च नाम अदृश्यत। तत्र अभ्यागतान् सस्मितं प्रतीच्छतामिव भासमानानां पुष्पौषधिभाजनानां व्यूहेभ्यः परतः बालचन्द्रवत् अर्धमण्डलाकारतया निर्मितः रमणीयः त्रिभूमः प्रासादो गम्भीरं तस्थौ। तस्य द्वारे रजतमयी नाममुद्रा डाली, डवाली, प्रभृतिभिरलङ्कारैः बहवः सेवकाः पालकभटाश्च अशब्दं भयभक्तिभरिताः तिष्ठन्तः उपविशन्तश्चासन्। तस्य प्रासादस्य द्वितीयायां भूमौ अत्यन्तरमणीयं परिष्कृतायां कस्याञ्चन शालायां साम्बशिवार्यः कस्याञ्चित् साचिचतुष्पद्यां शयान आसीत्। स्वर्णविग्रहोज्ज्वला स्वर्णाम्बा तस्य पश्चात् तिरोहितमुपविष्टा किञ्चिद्विदीर्णं स्वपट्टकञ्चुकं सीव्यन्ती अवर्तत। साम्बशिवस्य पुरतः कियति दूरे रजतमययन्त्रिकाघटिते मसृणे कृष्णदारुफलकासने अकार्पाससूत्रचेल-तुलसीमणिमाला–उपनेत्रप्रभृतिभिरलङ्कारैः कनकाम्बा नितान्तप्रयता उपविष्टा आस्त। तस्या हस्ते पुरातनं पुस्तकं किमप्यासीत्। तस्य प्रथमे पुटे 'तुलाकावेरीपुराणम्' इतीमान्यक्षराणि अदृश्यन्त। अल्पान्तरे स्थितायाः पुस्तकभारिण्याः (वीरो) पृष्ठतः रङ्गराजुः सविनयसङ्कोचं तिष्ठन्नासीत्। तस्य वपुषि तदा सेवकोचितानि आच्छादनानि नादृश्यन्त। सोऽपि कश्चिदधिकारीव ददृशे।

ते चत्वारोऽपि अकपटं विवृतमनस्कं अन्योन्यं आन्तरेण प्रेम्णा कानपि विषयानधिकृत्य सानन्दं भाषित्वा प्रहृष्टा अभवन्।

तस्मिन् समये साम्बशिवः कनकाम्बां प्रति 'रङ्गराजोः आङ्गली परं यदि विदिता तस्मै अहं शतेश्वर (ताशिल्दार्) पदं दापितवान् स्याम्। सोऽपि तत् कर्म निपुणं पश्येत्। तत्कर्मदर्शने किं कष्टमस्ति। केवलं विद्रावणमेव' इति।

तदाकर्णितवती कनकाम्बा 'सः अन्यस्मै यस्मै कस्मैचिदपि उद्योगाय न गच्छतु । अस्मत्प्रासादस्यैव ताशिल्दार् भवतु । अस्य ताशिल-उद्योगस्य भवदीया आङ्गलभाषा नैवापेक्षिता । राज्ये ताशिल्दार्-अस्य यावद् वेतनं दीयते तदस्मै त्वं देहि' इत्यवोचत । साम्बशिवः 'तथैव कुर्याम' इत्यङ्गीचकार । ततः कनकाम्बा रङ्गराजुमभिवीक्ष्य 'तात रङ्गराजो, तथैव उपविष्टो भव । बत कति नाडीः तिष्ठता भाव्यम्' इत्यतिविद्रुतमुवाच ।

तदाकर्णितवान् रङ्गराजुः मनाक् लज्जितः सप्रश्रयमञ्जलिं बध्वा 'अम्ब, भवतां ब्राह्मणकुलम् । भवतां यावन्तमपि अभिमानं लब्धवानहं सेवक एव हि । भवतां दास्यायैवाहं जातः । किमिति मे तावद्गौरवम्' इत्याह स्म । पारमार्थिकं तदीयं विनयं गुणं च दृष्टवतोः कनकाम्बा-साम्बशिवयोरन्तःकरणं प्रजहर्ष ।

कनकाम्बायां 'तात, रङ्गराजो, त्वां वयमन्य इति नैव भावयामः । त्वमन्य इति साम्बशिवोऽन्य इति च नैवाहं मन्ये । त्वं प्रथमः पुत्रः साम्बशिवो द्वितीयः' इति प्रेमभरितैर्वचोभिर्ब्रुवाणायां स बहु लज्जितः अनुपविष्टः तिष्ठन्नेवासीत् ।

अथ कतिपयान् निमेषान् तूष्णीं स्थितः साम्बशिवः हेषित्वा 'माण्डलिकभूतस्य मम वृत्तेषु एषु त्रिषु मासेषु अस्मिन् पुरे कति नाम विपर्ययाः । प्राञ्च उद्योगस्थाः सर्वेऽपि हि गताः । अद्य हि सर्वं नवीनं मुखम्' इति विस्मित उवाच ।

कनकाम्बा— तथा के के नाम गताः ?

साम्बशिवः—माण्डलिको हूणः सीमां गतः । कोशोपमाण्डलिक एरण्डतैल-सुब्बरायार्यः उपकारवेतनं लब्ध्वा गतः । पालकमहाप्रत्यवेक्षकः त्रिशिरःपुरीं स्थानभेदेन गतः । पालकप्रत्यवेक्षकः अनृतगिरि-पिल्लै तु पालकस्थानके निरुद्धं चोरं कञ्चन तीव्रं प्रहृत्य मारितवान् तत्कृते द्वीपान्तरवासशिक्षां प्राप्य विनष्टोऽभवत् । अस्मत्-ताशिल्दार् स्वयम्प्रमाणरायश्च अहं माण्डलिकभावेन आगमिष्यामीति श्रवणसमनन्तरमुपरतिं प्राप्य स्वकीयग्रामं 'नामशिलां' गतः विपरीतायां स्थितौ वर्तते । एवं सर्वे गताः ।

The Sun who was the apostle of freedom from fear to the three worlds and who was the eye of all beings endowed with eyes, has now set. It is indeed, sad to think of that. But what can one achieve by being sad? Let us make the best of the present night-time which is lit by the burnished disc of the moon, which presents the expanse of the sky efflorescent with the twinkling stars and which bristles with cupid's messages. 83

तारामण्डलनाभिभूतमचलं देवं नमामो ध्रुवं
वन्द्यः सोऽपि जलप्रसादनपटुः कुम्भोद्भवो विश्रुतः ।
तत्तादृक्प्रथितानुभाववसतौ व्योम्नि त्रिशङ्को, मुनि-
प्रागल्भ्यस्मृतिविस्मिताय विगतव्रीडाय तुभ्यं नमः ॥ ८४ ॥

Let us bow to God Dhruva who is fixed in his place and who is the navel of the starry wheel Agastya too, the most renowned, (the starry divinity) who makes turbid waters clear, is worthy of our adoration. In the expense of the heavens inhabited by such eminent presences, oh Trisanku! salutations to you also who unabashed gloat over the remembrance of the great powers of the sage (Visvamitra to whom yow owe your position there). 84

भासामेष निधिः प्रयाति विलयं, लब्धावकाशा वयं
दिष्ट्येति स्फुरितं प्रदीपशिखया ताराभिरन्येन वा ।
मा भून्नाम पृथक्तया, किमखिलैरेकीभवद्भिः कृतं
लेशेनापि तमोविभेदनविधौ तत्रास्ति चन्द्रः प्रभुः ॥ ८५ ॥

"Here the Lord of light suffers extinguishment, thanks to Providence! Now is our opportunity". Thus rejoicing, the lamp-flame, the stars and the like began to display their brilliance Leaving alone the consideration of

their success individually, what indeed were they able to achieve collectively after all, towards dispelling the darkness even to the slightest degree? But behold! the Moon is competent in that respect! 85

अर्यम्णा जगतां हिताय निहितस्यद्योडुवृन्दं वसोः
स्तोकोद्घाटनमुद्रणानि कृपणं कुर्वत्स्थितं केवलम् ।
ऊष्माणं दधतः कयाऽपि कलया प्रोज्झन्ति तं दीपका
एकस्तं विकिरन् विधो प्रतिदिशं कीर्तिं परां विन्दसि ॥ ८६ ॥

The miserly groups of stars presently coming by the rays of light left in their possession by the setting Sun for the benefit of the worlds, simply shut and open keeping them all to themselves. The lamp flames with angry heat hold them out in small quantities for others' use. But oh Moon! you alone pour them out in all directions and obtain glorious fame. 86

नीडारम्भणसंभ्रमं वहसि किं भुङ्क्षे किमन्यालये-
ष्वाकीर्णं बलिमिष्टलाभ-कथया किं प्रीणयस्यङ्गनाः ।
हा कष्टं, कलकण्ठ, किंचन परीवादाय वा केवलं
प्रागासीत् कुणपाक्षिपाटनपटुः काकोऽपि ते पोषकः ॥ ८७ ॥

Do you ever busy yourself with building a nest? Do you pick up the offerings thrown at other's homes? Do you officiously carry prophetic messages to (lovelorn) women? Alas! oh Kokil! why should this wretched crow who pecks at the eyes of corpses, should have been your nurse for a time? Was it only for the sullying of your immaculate fame just a little? 87

यच्छायातलमाश्रितः कुलपतिः शिष्यानध्यैपीच्चिरं
व्यस्मार्षुः पटमण्डपानि पृतना विश्रान्तिलाभाद्यतः।
शाखानीडसहस्रलग्नविहगः सोऽयं पुराणो वटः
पापेनोद्भ्रमता प्रचण्डमरुता सद्यः समुन्मूलितः॥ ८८॥

Alas! this aged banyan tree, sheltered under whose shade the Kulapati had for long imparted learning to thousands of his pupils, obtaining comfortable rest under whom royal armies felt not the need for erected camps, and to whose branches the birds clung living in myriads of nests, has been all of a sudden uprooted by the wicked, irresistible, whirling tempest! 88

तुङ्गान् पातयते घनान् श्लथयते तेजस्तिरस्कुर्वते
शुद्धान् दूषयते श्रितान् व्यथयते रूढान् पुरो मथ्नते।
क्षुद्रानुद्वहते तमः प्रथयते चण्डेषु मित्रीयते
रन्ध्राण्याविशते नमः प्रभवते वाताय विक्षोभिणे॥ ८९॥

Let us bow to the omnipotent disturber, the tempest which tears down the high, disperses the heavy, eclipses glory, soils the pure, afflicts what is nearby uproots the firm, raises high the despicable, spreads wide darkness, befriends the wild (fire) and whistles through apertures. 89

यत्सत्यं त्वमरागिणामविषयस्पृष्टात्मनामग्रणीः
किं त्वेषा विहिता पुरः पुररिपो विज्ञापना क्षम्यताम्।
दाराः काऽपि च कामिनी धनपतेः सख्यं वृषो बालका-
वुत्तंसोऽयमियान् भवो न विततः संसारभाजामपि॥ ९०॥

It is true that you are the foremost among the desireless for whom worldly comforts have no attraction;

and yet pardon me for adverting (with surprise) to the following in your presence—a wife, another undefined woman-mate, friendship with the Lord of Wealth, a bull, two boys, an ornament for the crest—ah! not even admittedly worldly persons cling to possessions so extensive and varied. 90

संमूढं जगदद्य, मूर्छति दशा काऽप्युल्बणा तामसी
निःसम्पाततया प्रकीर्णकितवा रथ्या भषत्कुकुराः।
शङ्कानां पदवी निशेयमधमा नन्दन्तु घूकादयः
कुत्रोदेष्यति चन्द्रमा इति धृतप्राणाश्चकोरा वयम् ॥ ९१ ॥

The world now is completely hidden due to the prevelance of an indescribable state of dense darkness. The streets being forlorn are trodden by the thieves and resound with the barking of dogs. Such a night as this is thick with vague fears. May be that the wicked ones like the owl rejoice in it but we Chakoras cling to life awaiting the hour of the Moon rising. 91

आयुः पुष्टिविवर्धनं तव पयःसाकं विवर्तैर्निजै-
र्दातुं रक्षितुमुत्तमं भुवि धनं धर्मार्थिनां त्वां विदुः।
तीर्थं मङ्गलधाम दैवतनिभा हा धिक्, त्वमर्थाशया
मातर्गौः कथमद्य शौनककरे पापाशयैः पात्यसे ॥ ९२ ॥

Your milk with all its transformations conduces to the prolonging of life and to rich nourishment. The sages have said that you are a species of wealth the gift or protection of which is highly meritorious for men of righteousness. But alas! Mother-cow! worshipped like a goddess, the abode of auspiciousness and most holy as you are, what a pity it is that you are delivered over into the hands of slaughterers by sinful men for the sake of money! 92

991

# उद्यानपत्रिका ॥

"अन्या वाचो विमुञ्चथ"

वेदापहारविक्रोशद्वेधःखेदविमर्दिनम्।
पण्णातीरपरिष्कारं पारिजातमुपास्महे ॥


| | | | |
|---|---|---|---|
| पु. २५] कलि ५०५२ खर | कन्या | साधारण | सं १ |
| | तुला | शास्त्रानुबन्ध | सं १ |
| | | आहत्य | सं २ |


## पञ्चविंशं वयः ॥

भगवत्सङ्कल्पेन केवलेन प्रादुर्भूता प्रचरन्ती चेयं पत्रिका चतुर्विंशतिं वयांसि नीत्वा अद्य पञ्चविंशे पदं निदधाति।

संस्कृतद्वेषिणः केचित्, उदासीना बहवः, अशक्ता अन्ये, इति भूयिष्ठेषु अस्यामादरमप्रदर्शयत्स्वपि यत् कतिचित् स्वशक्त्या उपकुर्वन्ति सौमनस्यं च बिभ्रति तदवलम्बेनैव इयमियन्तं कालमात्मानं वर्तयतीति तेषु अस्मदीयामनल्पां कृतज्ञतां प्रकाशयामः।

सर्वेश्वरस्यानुग्रहेण समग्रवृष्टिपातेन अशनाच्छादनदारिद्र्ये निवृत्ते, अनतिक्लेशेनानतिक्षोभेण च नीतिनिर्माणसभासभिकोद्धारे निर्वृत्ते, शान्तौ सर्वत्र प्रवृत्तायां, महाजनानुपसृत्य पत्रिकायाः शाश्वतविपुलप्रचाराय अपेक्षितसाहाय्यकरणं प्रार्थनीयमित्यस्माकमुद्देशः।

अयमस्माकमुद्देशः संस्कृते अभिमानवतां 'विदुषां' 'शिरोमणीनाम्' अन्येषां च संस्कृतपण्डितानां परिपूर्णेनादरेण साह्येन च विना न पूरयितुं शक्यः। अतः तेषु सर्वेषु पुनरिदानीं सनिर्भरां प्रार्थनां कुर्मः यावच्छक्ति अस्मदीयस्य अस्योद्देशस्य पूरणं प्रति यतितव्यमिति।

# सूर्यदेवताः ॥

सूर्यसम्बन्धिन्यः पञ्च देवताः सन्ति । तास्वेका मित्र इत्याख्यायते । येन रूपेण सूर्यः जगतः क्षेममादधाति तद्रूपवान् सः मित्र इत्युच्यत इत्याहुः । यस्मात् पारसीकवेदेऽपि अयं प्रतिपाद्यते तस्मात् तद्देशजनानां एतद्देशजनानाञ्च विभागात्प्राक्काल एव मित्रदेवतास्वरूपग्रहणमासीदिति निश्चीयते । ऋक्संहितायां अस्य पृथक स्तुतिः प्रायो नास्ति । सर्वदा वरुणेन सह द्वन्द्वभावेनैवायं स्तूयते । अस्ति तु केवलमेकं सूक्तम्, यत्र अस्य पृथगुपादानम् ।

---

## सूर्यः ।

प्रायः इदं नामधेयं ज्योतिर्मण्डलसम्बन्धापरित्यागेन स्वार्थं बोधयति । सूर्यस्य चक्षुः असकृत्कीर्त्यते । सर्वदर्शी सः सर्वकर्मसाक्षी भवति । साधु वा असाधु वा यत्किमपि जगति कर्म क्रियते तत्सर्वं स पश्यति । सः जङ्गमस्य स्थावरस्य च आत्मा परिपालयिता च । सप्ताश्वं रथमधिरुह्य स प्रयाति । तेन प्रेरिताः सर्वे मनुष्याः स्वं स्वं कर्म कुर्वन्ति । चर्मेव तमः स वेष्टयति । अस्मिन् उदिते नक्षत्राणि चोरवन्निलीयन्ते । उषसः अङ्कात् स प्रकाशते । क्वचित् उषसः भर्ताऽपि स उच्यते । रूपान्तरेण अग्निरेवायं दिवि देवैः स्थापितः । अन्तरिक्षे सञ्चरन् श्येन इव पततीति च स व्यपदिश्यते । एष दिनानि माति । आयुर्दीर्घयति च । व्याधीन् दुस्स्वप्नांश्च हरति । सर्वाणि भूतानि सूर्याश्रितानि, यतोऽस्य विश्वकर्मेति नाम भवति । एतत्स्तुतिपराणि एकादश सूक्तानि ।

अथ तावद्भिरेव सूक्तैः स्तुतः अपरः सूर्यसम्बन्धी देवताविशेषः सविता नाम । कर्मसु प्रोत्साहकत्वं यत्सूर्यस्य तेनाकारेण एवमयं अभिधीयते । हिरण्मयोऽयं देवः ; हिरण्यपाणिः हिरण्यभुजः हिरण्यरथः । आ भूमेरन्तात् स भुजान् प्रसारयति । सर्वाणि भूतानि उत्थापयति

अनुगृह्णाति च। हिरण्मये रथे स्थितः सर्वान् जन्तून् पश्यन् उपरि च याति अधश्च। उषसः पन्थानमनु स प्रकाशते। पिङ्गलकेशः सूर्यकिरणैः प्रकाशमानः अयं सविता शश्वत् प्राच्यामुदेति, दुस्स्वप्नान् नाशयति। असुरान् कृत्यानिरतांश्च विद्रावयति। देवेष्वमृतत्वं मनुष्येषु आयुर्दैर्घ्यं च आदधाति। इतः प्रेत्य गच्छतः सुकृतिनां लोकं गमयति। अन्ये देवा अस्य शासनमनुसरन्ति। न कश्चिदिन्द्रवरुणादिरूपोऽपि देवः तस्य सङ्कल्पं ऐश्वर्यञ्च प्रतिषेद्धुमलम्। सायङ्कालसम्बन्धः अस्य मुहुः प्रतिपाद्यते। एकत्र अस्तमेष्यत्सूर्यरूपेणाऽयं निबद्धः। अन्वहमत्रैः त्रिसन्ध्यं जप्यमाना गायत्री एतद्विषया। अत एव सावित्रीत्यपि तस्या अभिधानम्। छन्दोनिमित्तं तु गायत्रीति।

---

## पूषा।

एतत्स्तुतिपराणि अष्ट सूक्तानि। पोषणार्थत्वादस्यास्य धातोः सूर्यस्य पश्वादिपोषणोपयुक्तः स्वभावविशेष इह प्रवृत्तिनिमित्तत्वेनाभिसंहित इति प्रतीयते। अत एव असकृत् श्रुतिषु 'पशवो वै पूषा' इत्याम्नायते। तद्रथस्य अजा वाहाः। तोत्रं वहति। सर्वान् मार्गान् विदन्नयं प्रेतान् पितृलोकं प्रति गमयति। यथा पशवः यूथात् न भ्रश्येयुः तथा परिपालयति। मनुष्याणां पशूनां च पुष्टिं सम्पादयति।

## विष्णुः।

अस्य स्तुतिपराणि सूक्तानि अन्येभ्यः अल्पानि। अथापि पश्चात् सर्वप्रधानभूते देवताद्वये एको भवन्नयं विष्णुः तदनुगुणं प्राधान्यं प्रागेवाभजत। त्रयो विक्रमा अस्य विशेषतः स्तूयन्ते। तृतीयोऽस्य विक्रमः द्यौः यत्र देवाः पितरश्च वसन्ति। यत्सूर्यः प्रातः प्राच्यामुदयमानः मध्यंदिने ऊर्ध्वं गच्छन् पुनस्सायं प्रतीचीं गच्छति तदवदधानैः स एव त्रिविक्रमो विष्णुरिति ऋषिभिर्गृहीत इत्युत्प्रेक्षन्ते। त्रयोऽपि इमे एतदीया विक्रमा मनुष्याणां क्षेमायैवेति बहवो मन्त्राः प्रतिपादयन्ति। अत्रैव विष्णोः दशस्ववतारेष्वन्यतमस्य त्रिविक्रमावतारस्य बीजरूपेणावस्थानमिति च मन्यन्ते।

---

# वैदिका विशेषाः ॥

(Vidyalankara V. R. Srinivasa Tatacharya Siromani)

## 1 चन्द्रस्याश्विन्यादिभार्यासु समप्रतिपत्तिः ।

तैत्तिरीययजुःसंहितायाः द्वितीयकाण्डे तृतीयप्रपाठके पञ्चमानुवाके 'प्रजापतेस्त्रयस्त्रिंशत्... अमुञ्चन्' इत्ययं वेदभागः राजयक्ष्मगृहीतस्य इष्टिं विधातुमित्थं प्रस्तौति—अम्बा दुला नितत्निरभ्रयन्ती मेघयन्ती वर्षयन्ती चुपुणीका इत्येवमाम्नाताः सप्तकृत्तिकाः। अवशिष्टा अश्विन्यादयः षड्विंशतिस्तारकाः । ता एतास्त्रयस्त्रिंशत्प्रजापतेर्दुहितर आसन् । स ताः सोमाय राज्ञेऽददात् । सोमस्तासां मध्ये रोहिणीमुपैत् । तत्र रोहिणीव्यतिरिक्तास्तदीयं सुखमसहमानाः प्रजापतिमगच्छन् । सोमस्ता अन्वसरत्। स ताः प्रजापतिमयाचत। प्रजापतिस्ता अस्मै पुनर्न व्यतरत्। स सोममेवमब्रवीत्— 'साम्येन ता उपैष्यामीति शपथं प्रतिपद्यस्व ततस्तास्ते पुनर्दास्यामि' इति। सोमः शपथमकरोत्। प्रजापतिस्ता अस्मै पुनर्व्यश्राणयत् । सोमस्ताः स्वीकृत्य शपथमुल्लङ्घ्य पूर्ववद्रोहिणीमेवोपाविन्दत्। तं यक्ष्म आर्छत्। ततो राजानं यक्ष्मः प्राप्नोदिति हेतुना राजयक्ष्मनाम्नो व्याधेर्जन्म सम्पन्नम्। यस्मादेवं सोमः पापीयानभवत् तस्मादेतत्प्राप्त्या पापयक्ष्मस्य जन्म सम्पन्नम्। यस्माज्जायाभ्यो निमित्तभूताभ्यो व्याधिमलभत, तस्माज्जायेन्यनामकस्य व्याधेर्जन्म सम्पन्नम् । त एते यक्ष्मव्याधेरवान्तरविशेषाः । य एवमेतेषां यक्ष्माणां जन्म वेद, नैनमेते यक्ष्मा विन्दन्ति । ततः स एता एव नमस्यन्नसेवत । ताः सोममाचक्षत 'साम्येनास्मानुपगच्छेति वरं वृणामहै' इति। तास्तस्मै व्याधिपरिहाराय एतमादित्यं चरुं निरवपन्। तेनैव एनं सोमं प्रबलाद्रोगादमोचयन्—इति।

श्रुतिरेवमर्थवादमाख्याय 'यः पापयक्ष्मगृहीतः ... मुञ्चन्ति' इति वाक्यैः राजयक्ष्मगृहीतस्य इष्टिं विधत्ते । अनया आख्यायिकया शपथोल्लङ्घनमनर्थावहमित्यवगम्यते ।

8



R
V
00991

## 2 अमावास्यापौर्णमास्योः यज्ञियत्वम् ।

तैत्तिरीययजुःसंहितायाः द्वितीयकाण्डे पञ्चमप्रपाठके षष्ठेऽनुवाके 'सोमस्य वै ... य एवं वेद' इति वेदभागः अमावास्यापौर्णमास्योस्ति-थ्योः यज्ञियत्वमाख्यायिकयैवं प्रपञ्चयति—सोमस्य राज्ञः अर्धमासस्य कृष्णपक्षस्य शुक्लपक्षस्य च रात्रयः पत्न्य आसन् । तासां मध्ये सोमो-ऽमावास्यां पौर्णमासीं च नोपैत् । ते सोममाभिमुख्येन सम्भोगायागृह्णी-ताम । बलात्कारेण भुज्यमानं तं सोममतिव्यवायेन क्षयव्याधिरासाद-यत् । ततो राजानं यक्ष्मः प्रापेति कारणेन राजयक्ष्मनाम्नो व्याधेर्जन्म सम्पन्नम् । यस्मादयं सोमः पापीयान् तस्मादेतत्प्राप्त्या पापयक्ष्मस्य जन्म सम्पन्नम् । यस्माज्जायाभ्यां निमित्तभूताभ्यां व्याधिमलभत तस्माज्जायेन्यनामकस्य व्याधेर्जन्म सम्पन्नम् । त एते त्रयो यक्ष्मव्या-धेरवान्तरविशेषाः । तज्जन्मवेदिनो यक्ष्म व्याधेरलाभः फलम् । सोमः अमावास्यापौर्णमास्यावेव नमस्यन्नसेवत । ते अब्रूताम् 'आवामुभे एव देवानां हविर्भागधारिण्यौ असाव । आवयोरेवोपरिष्टात् अग्न्यादयो देवा इज्यन्तामिति वरं वृणावहै' इति । तस्मात्सदृशीनाँरात्रीणाममावास्यायां च पौर्णमास्यां च देवा इज्यन्ते । एते अमावास्यापौर्णमास्यौ देवानां भागधारिण्यौ । एतयोर्भागधारित्वं जानते मनुष्याः सर्वेऽपि भागं धार-यित्वा प्रयच्छन्ति—इति ।

अथ, भूतानीत्यादीनि भ्रातृव्यमित्यन्तानि वेदवाक्यानि मनुष्या-दिसाम्योपन्यासेन उक्तार्थमेव पुनः प्रशंसन्ति । तत्र अर्धमासे देवाः क्षुधमघ्नन् (घ्नन्ति), अर्धमासे देवा इज्यन्ते, इत्यंशः प्रकृते उपयुज्यते । अस्य पर्वणि पर्वणि यष्टव्या देवा इत्यभिप्रायः । अनया कथया अतिव्य-वायः क्षयव्याधिहेतुरित्यवसीयते ।

---

## 3 अग्निना हविषो वहने हेतुः ।

तैत्तिरीययजुःसंहितायाः द्वितीयकाण्डे षष्ठप्रपाठके षष्ठेऽनुवाके अग्नेस्त्रयो ज्यायाँस इत्यादिः प्रीणातीत्यन्तो वेदस्य भागः परिधीनां परिधानं विधातुमित्थं प्रस्तौति— अग्नेस्त्रयो ज्यायाँसो भ्रातर आसन् । ते देवेभ्यो

हव्यं वहन्तः प्रामीयन्त । सोऽग्निरबिभेत यथा भ्रातरस्त्रयो हविर्वहन्तो मृताः इत्थमेव यो हविर्वक्ष्यति स मरणं प्राप्स्यतीति । अथ स यथा देवैर्न ज्ञायेत तथानिलीनोऽभवत्, निलीय च उदकमध्ये प्राविशत्। देवतास्तमुद्दिश्य प्रकर्षेण अन्वेषणं कर्तुमैच्छन्। तदा जले स्थितो मत्स्यः देवानामग्रेऽग्निं तत्र स्थितमब्रवीत् । ततोऽग्निस्तं मत्स्यमेवमशपत् 'हे मत्स्य, यस्त्वं देवानामग्रे मामेवं पिशुनो भूत्वा प्राब्रवीः तादृशं त्वां कैवर्तो-जालादिसाधनेन यदा यदा हन्तुं धीर्भवति तदा तदा (रात्रावहनि वा) वधं कुर्वन्तु' इति । यस्मादेवं शप्तस्तस्मात् मत्स्यं तदा तदा ते घ्नन्ति । देवाः मत्स्यमुखेन वह्निं व्यजानन्। तदनु ते तं प्रति 'अस्मत्समीपे समा-गच्छ, अस्मदीयं हव्यं वह' इत्याचक्षत। अथ जातवेदाः 'स्रुचि गृहीतस्य हविषः संबन्धि यत् द्रव्यं होमात्पूर्वं परिधिभ्यो बहिः प्रच्यवेत, तदस्म-दीयानां भ्रातॄणां भागोऽस्त्विति वरं वृणे' इत्यभाषत। तस्मात् स्रुचि गृही-तस्य हविषः संबन्धि यद्द्रव्यं होमात्पूर्वं परिधिभ्यो बहिः स्कन्दति, तत् वैश्वानरस्य भ्रातॄणां भागो भवति। यजमानः स्कन्नेन तेन द्रव्येण पावकस्य भ्रातॄन् प्रीणयति—इति ।

इत्थं परिधिपरिधानविधानार्थमर्थवादमभिधाय, यस्मात्परिधिबहि-र्देशोऽग्नेर्भ्रातॄणामुपयुक्तस्तस्मात्परिधीनग्निं परितः स्थापयेत् तत्तु रक्षसा-मपघाताय भवतीत्यर्थकेन 'परिधीन्परिदधाति रक्षसामपहत्यै' इति वाक्येन परिधिपरिधानं व्यधीयत, तत्फलं प्रत्यपाद्यत च । केचित् (1) अग्निरेकं मत्स्यमशपत्, धीवरास्तु तत्कुलप्रसूतान् सर्वान् मत्स्यान् यथेच्छं घ्नन्ति, अनेन एकः पैशुन्यमाचरेच्चेत् तत्पापेन तत्कुलप्रसूतानां सर्वेषां तत्प्रयुक्तदुःखानुभवसम्भवात् पैशुन्यं न कार्यमिति, (2) स्वामिनः कर्मकराणां च सर्वेष्वपि समयेषु वैमत्यमस्तीति कर्मकराणां तस्मिन् काले स्वल्पं यत्किञ्चिद्वस्तु प्रदाय स्वामिना मनसः समाधानं कार्यमिति, (3) स्वभ्रातॄणामभ्युदयाय कस्यचित् मरणमपि श्रेय इति चात्र सूच्यते इति वदन्ति।

## 4 शंयुना हविषः स्वगाकरणे हेतुः।

तैत्तिरीययजुःसंहितायाः द्वितीयकाण्डे षष्ठप्रपाठके दशमानुवाके 'देवा वै यज्ञस्य' इत्यादिः 'एनसा भवति' इत्यन्तो वेदस्य भागः शंयुवाकमन्त्रान् व्याख्यातुमित्थं प्रस्तौति—देवा यज्ञस्य, असङ्करेण हवींषि स्वस्वदेवतायै यो गमयिता, तद्रूपं स्वगाकर्तारं नाविन्दन्। 'यस्मै देवाय यद्धविर्विहितं तस्य हविषः साङ्कर्यमन्तरेण तस्य देवस्य हविः स्वगतं कुरु' इति बृहस्पतिपुत्रं शंयुनामानं प्रति देवा अब्रुवन्। स एवं प्रत्यवदत् "'एतत्काम एतेन यज्ञेन यजेत' इत्येतादृशेन ब्राह्मणेनानुक्तो यः कश्चित् स्वेच्छयैव यजेत, यश्चान्यः श्रद्धारहितो यजेत, तयोरुभयोः यज्ञद्वयस्य फलं ममास्तु इति वरं वृणे" इति। तत आरभ्य अब्राह्मणोक्तो यो यं यज्ञं यजते, अश्रद्दधानो यो यं यज्ञं यजते, तयोस्तद्यज्ञद्वयफलं बार्हस्पत्यं शंयुमेव गच्छति। पुनरपि शंयुरेवमुवाच– 'तदेतदुभयं फलं मम सम्पन्नम्। मदीयायै पुत्रपौत्रादिरूपायै प्रजायै किं दास्यथ' इति। ततो देवाः, 'यस्ताडनोद्योगं वेदविद्ब्राह्मणविषये कलयेत्, परुषं भाषेत वा, तं पुरुषं शतनिष्कदण्डेन क्लेशयेत्, यस्ताडयेत् तं सहस्रनिष्कदण्डेन पीडयेत्, यस्तु वेदविद्ब्राह्मणशरीरे लोहितं ताडनेन निःसारयेत्, रक्तं भूमौ पतित्वा यावतः परमाणून् व्याप्नुयात् तावतः संवत्सरानयं पितृलोकं नासादयेत्, किन्तु यमयातनामनुभवेत्, अपगोरणादिकर्तुरेषा यातना त्वत्प्रजाधीना भवतु' इति वरमददुः। यस्मादुक्तरीत्या वेदविद्ब्राह्मणताडनोद्योगादौ प्रत्यवायोऽस्ति तस्मात् वेदविद्ब्राह्मणाय नापगुरेत, तं न निहन्यात्, तस्य लोहितं न निर्गमयेत्, करणे च स पूर्वोक्तपापेन युक्तो भवति– इति। तदनु 'तच्छंयोरावृणीमह इत्याह यज्ञमेव तत्स्वगाकरोति' इति वाक्यं शंयुवाकमन्त्रस्य पाठं प्रशंसति। अस्य वाक्यस्य एतन्मन्त्रपाठकः अस्य यज्ञस्य हविः तत्तद्देवानामसाङ्कर्येण स्वगतं करोति इत्यर्थः। अनेनार्थवादेन विधिश्रद्धाविकलं कर्मानुष्ठानं निष्फलमिति, अनिष्टसाधनं वेदविद्ब्राह्मणापगोरणादिकं न कार्यमिति च प्रतिपाद्यते।

---

शेक्स्पिअर्-कृतं

# यथाभिमतम्॥ III.2

प्रविशति निकषोपलः । आद्री च। पृष्ठतो जाक्विस्।

निकषोपलः— त्वरितमेहि, भद्रे आद्रि; अहं ते अजान् आनेष्यामि आद्रि। अथ कथं आद्रि? अद्य वा कच्चिदहमेव वरः? अपि मे रूपं ते रोचते?

आद्री— तव रूपाणि! देवोऽस्मान् पातु! कानि रूपाणि?*

निकषोपलः— अहमत्र त्वया त्वद्जैश्च सह वर्ते, यथा प्राक् प्रतिभानवतां कवीनामग्रणीः आर्जवशाली ओविद् गाथ्-जनानां मध्ये।‡

जाक्विस्— (अपवार्य) हा अस्थानस्थं विज्ञानम्; तृणपटलगृहवर्तिनं बृहस्पतिमपेक्ष्य शोच्यतरम्।†

निकषोपलः— यदा कस्यचिन्मनुष्यस्य श्लोका अगृहीतार्था भवन्ति, कस्यचिन्मनुष्यस्य प्रतिभा वा वर्धिष्णुशिशुसाधारणेन ग्रहणेन सम्प्रतिपत्तिं न विन्दति§ 'तत् मनुष्यं नितरां विचेतनं करोति, अल्पस्य गृहस्य

---

* अतिग्रामीणतया रूपशब्दार्थं अत एव प्रश्नार्थं चानवगच्छन्ती सम्भ्रान्ता च सती आद्री भगवति आत्मरक्षां प्रार्थयते पृच्छति च रूपशब्दार्थः क इति।

‡ एते अतिपामरा जनाः। प्रथमशतके स्वस्थानात् निष्कासितोऽयं लाटिन्-कविः एषां जडानां मध्ये न्यवसदिति वदन्ति । कच्चिन्मय्यनुरक्ताऽसीति वक्रोक्त्या गभीरं पृच्छन् निकषः जडस्वभावतया अगृहीतभावां आद्रीं दृष्ट्वा खिन्न इदमाहेत्यवधेयम्।

† पामरेषु स्वप्रज्ञाविशेषं प्रकाशयन् निकषोपलोऽपि पामरप्राय एवेति मन्यते। तस्मात् शोचति 'हा अस्थानस्थं' इति।

§ कविकृतानां श्लोकानामर्थग्रहणे यद्यपि क्लेशो भवेत् तथाऽपि बुद्धिमन्तो यदा भाषन्ते तदा तद्बुद्धिस्थमिदमिति श्रोतृभिर्ग्रहीतव्यम् । तद्बुद्धिस्थसकलसूक्ष्मार्थग्रहणेऽपि शिशुवत् प्रस्फुटार्थस्य स्थूलग्रहणे वा शक्तैर्भाव्यम्। तस्याप्यभावे वक्तॄणां मरणक्लेश एव साक्षाज्जायत इत्यात्यन्तिकमात्मनः खेदमाविष्करोति निकषोपलः।

10

कृते महतो वित्तस्यापेक्षणात ।*—'परमार्थतः अस्ति मेऽभिलाषः विधाता त्वां काव्यपद्धतिज्ञां‡ निर्मितवान् भवितुमर्हतीति ।

आद्री— किं नाम काव्यपद्धतिज्ञत्वमिति न मे विदितम् । किं तत् क्रियायां वाचि च आर्जवम् ? किं तत् किमपि पारमार्थिकं वस्तु ?

निकषोपलः— नैव, नूनम् । काव्यं हि सर्वं केवलं कल्पनामयम् । कामिनश्च काव्यपराः । यत् ते काव्यरीत्या प्रतिजानते तत् कामिभिः सद्भिः तै कल्पितमिति शक्यं वक्तुम् ।

आद्री— तत् किं त्वं मन्यसे देवा मां काव्यपद्धतिज्ञां सृष्टवन्तो भवितुमर्हन्तीति ?

निकषोपलः— सत्यमहं तथा मन्ये ।

आद्री— नाहं रूपवती । तदहं प्रार्थये देवा मां आर्जववतीं कुर्युरिति ।

निकषोपलः— सत्यम् , आर्जवस्य कस्याञ्चित मलीमसायां दुर्भगायां प्रक्षेपणं च तादृशं भवति यथा अन्नस्य अशुद्धे पात्रे निधानम् ।

आद्री— नाहं दुर्भगा, यद्यपि देवानामनुग्रहेण मलीमसाऽहमस्मि ।†

निकषोपलः— साधु । तव मलीमसत्वस्य कृते देवाः स्तूयन्ताम् । दुर्भगत्वमितःपरमुपनमेत् । तत्पुनर्यथा तथा भवतु । त्वामहं परिणेष्यामि । एतदर्थं पुरोहितं आर्यं आलिवर् मार्टेक्स्ट् इमं प्रार्थितवानस्मि । सः अस्मिन् अरण्यस्थले आगत्य आवां विवाहयितुं प्रतिज्ञातवान् ।

जाक्विस्— (आपवार्य) अस्ति मे कौतुकम् ; इदं सङ्गतं द्रक्ष्यामि ।

आद्री— साधु । देवा आवां सुखयन्तु ।

निकषोपलः— तथा ! अयं पुरोधा आयाति ।

---

* अत्र मूलम्— It strikes a man more dead than a great reckoning in a little room. इति । अत्र केषांचिद्विवरणम्— 'To have one's poetry not understood is worse than the bill of a first-class hotel in a pot-house'. अर्थान्तरमन्वेषणीयमिति भाति ।

‡ रसिकां विदुषीमिति भावः ।

† 'नगरनारीवत् पटवासाङ्गवासविविधमण्डनादिविरहेऽपि न मे जुगुप्सनीया उद्वेगजनिका अङ्गविक्रियाऽस्ति' इति भावः ।

[प्रविशति पुरोहितः सर् आलिवर् मार्टेक्सट् ।]

सर् आलिवर् मार्टेक्सट्, शोभनं तावदागतोऽसि। किमिहैव अस्य वृक्षस्याधस्तात् आवां सङ्गमयिष्यसि अथवा आवाभ्यां आलयशाला त्वया सह गन्तव्या ?

सर् आलिवर्—किमत्र कन्यां दातुं न कश्चिदस्ति ?

निकषोपलः— नाहमेनां परिग्रहीष्यामि अन्येन केनचिद् दीयमानाम्।

जाक्विस्—(अग्रत आगच्छन्) उपरि कर्तव्यं कुरु। अहं तां दास्यामि।

निकषोपलः—सुसायम्, स्वामिन्, किन्नामासि ? कथं वर्तसे आर्य ? शोभनस्तावत् ते समागमः । पूर्वं यत्समागतोऽसि तस्य भगवदनुग्रहस्ते अस्तु। भवद्दर्शनेन प्रीतोऽस्मि। अल्पमपि इह महद् भवति, आर्य।† दयया शिरस्त्रमाधत्स्व।*

जाक्विस्— विवाहितो नु भविष्यसि, चित्रवसन ?

निकषोपलः— यथा वृषभस्य युगम्, अश्वस्य रश्मिः श्येनस्य पादबन्धन्यः‡ तथा मनुष्यस्य कामाः सन्ति।

जाक्विस्—एवमुदारवृत्तो भवान् किं याचनकवत् गुल्मच्छायायां विवाहं वर्तयिष्यति ? आलयं गच्छ । वृणु कुशलं पुरोहितं यो विवाहस्य तत्त्वं ते बोधयिष्यति। अयं वटुः तथा युवां सङ्गमयिष्यति यथा ते चित्रफलकम् । ततः युवयोरन्यतरः सङ्कुचितखण्डफलककल्पः सम्पद्येत। आर्द्रदारुवच्च अत्यन्तकुटिलः।

निकषोपलः— (अपवार्य) अनेनैव कार्यमाणो विवाहो मे श्रेयान्, नान्येनेत्येषैव मे मतिः, यतः नैष मां यथावद् विवाहयिष्यति। अयथावद् वृत्ते च विवाहे, भार्यापरित्यागस्य सा समीचीना उपपत्तिर्भविष्यति।

जाक्विस्— मया सह आगच्छ ; शृणु ममोपदेशम्।

निकषोपलः— एहि, प्रिये आद्रि। आवयोर्विवाहेनावश्यं वृत्तेन भाव्यम्। कुशली भव, साधो स्वामिन् आलिवर्। न

---

† किं पुनर्भवादृशा इति भावः।

* हस्ते धृतं शिरस्त्रं शिरसि निधाय कन्यादानाय सज्जो भवेदिति विवक्षितम्।

‡ पक्षिवर्धकाः प्रत्यभिज्ञानाय पादे वलयं बध्वा पक्षिणो विहरणाय मुञ्चन्तीति वदन्ति।

'हे मधुरः आलिवर्, हे धीर आलिवर्,
इह मां त्यक्त्वा व्रज न त्वम्'

अपि तु

'परिवृत्य याहि, अपगत एधि ।
मत्परिणयने नेच्छामि त्वाम् ।'

(निष्क्रामन्ति जाकिस्, निकषोपलः आद्री च)

सर् आलिवर्– एषु सर्वेषु यस्यकस्यापि भ्रान्तस्य धूर्तस्योपहासेन नाहं मम वृत्तिं परित्यक्ष्यामि ।

# वृद्धभाषितम् ॥

रामः–सखे कृष्ण, अद्यतनीं लोकस्थितिं चिन्तयतो मे पदे पदे काऽप्यवस्था जायते, याम् इयमिति ईदृशीति वक्तुं न शक्नोमि । त्वं पुनर्भाग्यशाली यतो येन केनापि हेतुना अविकृतचित्तः निश्चिन्तः सुखं सर्वं कालं यापयसि ।

कृष्णः—न तथा मित्र । सर्वप्रकारदुरवस्थोपहते अस्मिन् काले कस्य पीडा नास्ति ? कः सुखं जीवति ? अपि तु केन किं क्रियताम् ? अस्य अतिमहतः उच्चावचस्य कष्टवर्गस्य कः परिहारः ? कथं परिहारः ? क इमं चिन्तयिष्यति ? कः प्रवर्तिष्यते ? न किमपि ज्ञायते । उत्तरोत्तरं सङ्कटतरा सङ्कटतमा दुरवस्था भविष्यतीति निश्चितं भाति । सर्वथा दुष्परिहरेऽस्मिन् विषये अस्मादृशैः अवस्तुभूतैः क्रियमाणया चिन्तया किं भविष्यति ? केवलमात्मन आयासनमेवैतत् । तेन 'तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि' इति भगवत उपदेशं स्मरन् यत्नात् तच्चिन्तां परिहरामि । सुखमिव जीवामि ।

रामः— तथाऽपि त्वं सुकृती । न हि मया तथाकर्तुं शक्यते । सर्वदा सैव स्मृतिः । सदा आकुलोऽस्मि, आर्तोऽस्मि ।

कृष्णः—किं क्रियताम् । भिन्नभिन्ना प्रकृतिः । न च प्रकृतिसिद्धस्य चिकित्साऽस्ति ।

रामः—तत् तथा काममस्तु, मित्र। उचितं यत् किमपि अत्र कर्तव्यमिति ममान्तरात्मा मां बलवत् प्रेरयति। किमहं कुर्याम। तूष्णीमवस्थातुं सर्वथा न शक्यते। किमपि कुरु, किमपि कुरु, इति सन्ततं मां कश्चित् निर्बध्य प्रेरयतीव।

कृष्णः—सखे, सहृदयं मां विद्धि। जानामि ते अन्तरवस्थाम्। इति-कर्तव्यतां तु न जानामि। ततो ब्रवीमि किं वृथा आत्मन आया-सनेनेति।

रामः—मित्र, यत् किमपि अकुर्वतोऽपि अस्त्येव निरन्तरः कश्चिन्मानसः क्लेशः। तदियं क्लेशचिन्ता मा भूत्। या काचिदत्यल्पापि वा प्रवृत्तिः सुकरा न वा, तद्विचिन्तय। अद्यतनानि सङ्कटानि यथा निवर्तेरन्, सर्वकुशलमयी शान्तिसमृद्धा च लोकस्थितिर्यथा सम्पद्येत तथा किमपि कर्तव्यम्।

कृष्णः—अशक्ये कर्मणि उत्सहमानः नूनं शोचनीयतरो भविष्यसि। क्व तावत् लोकस्थितेः परिष्करणम्; क्व च ते शक्तिः। अनात्मज्ञ इति त्वां नूनमभिज्ञाः परिहसिष्यन्ति।

रामः—मित्र, परिहसन्तु मां यदि परिहसिष्यन्ति। नाहं तत् ईषदपि गणयिष्यामि। कच्चिदद्यतनीं समाचारपत्रिकामपाठीः? बस्-शकटेन प्रयाणिनः प्रयान्तः सन्ति। परिमोषिणः मार्गस्य प्रतिरोधं कल्पयित्वा 'बसं' अवस्थाप्य प्रयाणिषु यच्च यावच्च धनमस्ति तत् सर्वमादाय गच्छन्ति। तावता अतृप्यन्तः केचन तस्कराः बसमपि दहन्ति॥ स्वगृहे कश्चित् सम्पन्नः तरुणवयाः विस्रब्धं शयितो निद्राति। तं कश्चित् नलिकदाहेन क्षणान्मारयति॥ दिवा स्वगृहे गृहिणी स्वकार्यव्यग्रा वर्तते। धूर्तः कश्चिदन्तः प्रविश्य तामुपरुध्य आभरणानि आच्छिद्य धावति॥ इमा वार्ताः श्रुत्वा किं नाम सचेतसा केनचित् अविकृतेन स्वस्थेन भवितुं शक्यम्?

कृष्णः—हृदयातङ्कहेतुनिदर्शनाय किमिति एतत् सर्वं प्रतिपादनीयम्। आहारक्लेशः कियान् गृहे गृहेऽन्वहमनुभूयते। पञ्चषाः शिशवः। दरिद्रदम्पती। अतिस्वल्प आयः। कोद्रवयवागूः अर्धोदरपूरणक्षमां

शिशुभ्यः प्रदाय स्वयमनशनावेव रात्रौ शयाते । शिशूनामपि अनावृतं स्थण्डिलमेव शयनम् । सन्निहितेषु गृहेषु एवं वर्तमानं दारिद्र्यताण्डवं पश्यतः कस्य मनो न दूयेत ? न द्रवीभवेत् ? परं तु केन किं कर्तुं शक्यम् ? स चरमः प्रश्नः, यस्य उत्तरं दातुं न कश्चित् समर्थः ; यः सर्वमुत्साहं अत्यन्तमवसादयति ; सर्वथा निर्व्यापारान् निरुद्यमान् अस्मान् करोति ।

रामः—अपि च पञ्चसंवत्सरानुवृत्तेन अवग्रहेण धान्योत्पत्तिर्नास्ति । न परं क्षेत्रकूपाः, गृहकूपा अपि बहुषु ग्रामेषु नगरेषु च शुष्का अभवन् । न केवलं अशनाच्छादनदुर्भिक्षः अपि तु पानीयदुर्भिक्षोऽपि तीव्रो जनान् बाधते । न चास्य सन्निहिते काले निवृत्तिर्भविष्यतीति अस्ति प्रत्याशायाः प्रसरावकाशः । ईदृश्यां स्थितौ किं उदासीनैरेव केवलं अस्माभिरवस्थातव्यं सर्वसङ्कटसाक्षिमात्रभूतैः । महद्भिः सम्भाषेमहि । शृणुयाम, यदि ते किञ्चिद् ब्रुवन्ति ।

कृष्णः— के ते महान्तः, यैः सम्भाषेमहि ; ये नः सर्वसङ्कटशमनोपायमुपदेक्ष्यन्ति । अद्य महान्तः त एव, ये राज्यशासने तिष्ठन्ति । ते यथाशक्ति जनानां योगक्षेमविधाने जाग्रत्येव, प्रयतन्त एव । तेषामपि अशक्ये विषये किं ते कुर्युः ?

---

# तात्पर्यान्तरम् ॥

---

महाकविः कालिदासः अनुत्तमे उत्तमे स्वकीये रघुवंशकाव्ये चतुर्दशे सर्गे लङ्कातो निवृत्तस्य भगवतो रामस्य भरतसमागमात् परं यद् वृत्तं तद् वर्णयति । तत्र प्रथमं रामलक्ष्मणौ मातरौ कौसल्यासुमित्रे अभिगम्य प्रणम्य ताभ्यामुपलालितौ अभवताम् । अथ सीता उपसृत्य ते ववन्दे । एतत्प्रतिपादनपरोऽयं श्लोकः—

क्लेशावहा भर्तुरलक्षणाऽहं सीतेति नाम स्वमुदीरयन्ती ।
स्वर्गप्रतिष्ठस्य गुरोर्महिष्यावभक्तिभेदेन वधूर्ववन्दे ॥

इति। अत्र मल्लिनाथस्य व्याख्यानमेवं दृश्यते—क्लेशावहेति। आवहतीत्यावहा। भर्तुः क्लेशावहा क्लेशकारिणी। अत एवालक्षणाऽहं सीतेति स्वं नामोदीरयन्ती। स्वर्गः प्रतिष्ठाऽऽस्पदं यस्य तस्य स्वर्गस्थितस्य गुरोः श्वशुरस्य महिष्यौ श्वश्र्वौ। वधूः स्नुषा। 'वधूः स्नुषा वधूर्जाया' इत्यमरः। अभक्तिभेदेन ववन्दे। स्वर्गप्रतिष्ठस्येत्यनेन श्वश्रूवैधव्यदर्शनदुःखं सूचितम्।

इति। अत्र श्वाश्र्वाविति वक्तव्ये किमिति कविः 'स्वर्गप्रतिष्ठस्य गुरोर्महिष्यौ' इति वक्रोक्तिमाद्रियतेत्याशङ्क्य मल्लिनाथः 'स्वर्गप्रतिष्ठस्येत्यनेन श्वश्रूवैधव्यदर्शनदुःखं सूचितम्' इति एवंविधदुःखव्यञ्जनं तत्प्रयोजनमिति दर्शयति। एवमपि 'स्वर्गप्रतिष्ठस्य नृपस्य पत्न्यौ' इत्येवंविधयाऽपि रचनया तत्सम्पत्त्या 'गुरोर्महिष्यौ' इति पदद्वयविशेषप्रयोजनं नोक्तं भवति। अभक्तिभेदेनेत्यस्य कोऽर्थ इति न ज्ञायते। एका वस्तुतः श्वश्रूः, अपरा धर्मतः। अथापि न भक्तिभेद इति स्यात्। "भर्तुः प्रणाशादथ शोचनीयं दशान्तरं तत्र समं प्रपन्ने।" इति पूर्वं स्फुटमेव कौसल्यासुमित्रावैधव्यदुःखस्य प्रतिपादितत्वात् पुनरिह तद्व्यञ्जनस्य नातीवापेक्षाऽस्ति। तदत्र तात्पर्यान्तरं वक्तव्यं मन्यामहे। वनगमनात् पूर्वं दशरथः श्वशुरः चक्रवर्ती बभूव। तस्य पट्टमहिष्यौ कौसल्यासुमित्रे। सीता केवलं स्नुषा यथार्हं तयोर्भक्तिमती आसीत्। अद्य तु विभिन्ना स्थितिः। रामश्चक्रवर्ती। सीता पट्टमहिषी। अथापीयं दृप्ता नासीत्। ते एव महिष्यौ मेने। आत्मानं स्नुषामेव। पूर्वं यादृशी तयोर्भक्तिः तादृश्येवाद्यापि। न मनागपि भेदः। स्वर्गं गतोऽपि दशरथोऽद्यापि गुरुरेवेति।

---

# प्रकृतिभेदः॥

I

गां दुग्ध्वा, अभ्यागतैर्बहुभिः सह सम्भाषणं कुर्वत्याः स्वगृहिण्याः पुरस्ताद् पूर्णं दोहनपात्रं निधाय शेषार्यः 'अयि,

इदमादाय अन्तर्निधेहि' इति गम्भीरं तामादिशत्। अयथापूर्वं पयः-पात्रं पूर्णं पश्यन् जातकुतूहलः कुमारो रङ्गः अन्येषु जनेषु गतेषु मातरमभ्येत्य अपृच्छत्— 'कथमम्ब, अस्मिन् दिने इयत् पयोऽलम्भि। पश्य दोहनपात्रम्। आग्रं हि क्षीरेण पूर्णं तत्। न चैवं पूर्वं कदाचिदभवत्'।

तं माता प्रत्यब्रवीत्—'तात, त्वत्पितुर्वृत्तं त्वं न जानासि। अस्माकं गौः इयत् भूरि पयो ददातीति परैर्भन्तव्यमिति स मन्यते। तेन अल्पेऽपि दुग्धे जलमासिच्य पात्रं पूरयित्वा तेषु पश्यत्सु तत्र न्यधात्। एवं दम्भशीलस्ते पिता।

II

पुत्रः—पश्याम्ब, अस्मिन् दिने न बहु दुग्धम्। प्रतिदिनं हि पात्रं पूर्णं भवेत्। अद्य पश्य पादांशोऽपि न पूर्णः।

माता—न तथा जात। गृहे हि बहव आगताः सन्ति। यथापूर्वं समग्रदोहे कस्यचित् दृष्टिस्तत्र पतेदिति तव पितुर्भीतिः। पूर्वं कस्मिंश्चिद् दिने दोहनसमनन्तरं तस्य हस्ते स्थितं फेनिलेन पयसा पूरितं पात्रं अनन्तरगृहवासिनी वृद्धा काचित् दृष्ट्वा 'का नु रे तात तव न्यूनता। यावदपेक्षं दुग्धे गौः। अदृष्टशाली त्वम्। भुङ्क्ष्व सम्यक्' इत्यभिनन्दनमुखेन असूयामुज्जगार। ततः परं बहूनि दिनानि अल्पमपि क्षीरं नालभ्यत। एकस्मिन् दिने स्रस्तरज्जुर्वत्सः पपौ। अन्यस्मिन् गौरेव अपोथयत्। अपरस्मिन् दोहनपात्रं हस्तात् गलितमधस्तात् पतति स्म, इति। तेनाद्य ते पिता अल्पमेव दुग्ध्वा वत्स एव समग्रं पिबत्विति विमुक्तवानिति भाति।

---

TIRUPATI LIBRARY

# पुस्तकपरामर्शः ॥

**पद्यपुष्पाञ्जलिः।** विद्यारत्न साहितीवल्लभ साहित्यालङ्कार-विरुदभाजा मधुरापुरस्थ श्रीरामेश्वरदेवस्थानपाठशालाध्यक्षेण श्री **सुब्रह्मण्यार्येण** विरचितः। रूप्यद्वयमूल्यः।

पद्यमयोऽयं ग्रन्थ इति नामैव प्रथयति। नानाविषयाणां खण्डकाव्यानां समुच्चय इह कृतः। द्विभागस्यास्य प्रथमभागे पञ्चविंशतिः अन्तिमे षोडश च प्रकरणानि सन्ति। आद्यो भागश्चिन्तारूपः, अन्त्यः कथारूप इति विशेषः।

स्वाभाविकी कवितावासना कवेरस्य स्फुटमत्र प्रकाशते। निदर्शन-तया एकं पद्यमुदाहरामः—

त्रायस्व नः क्षिप्रतरं नरेन्द्र करेण तीक्ष्णेन नितान्तदूनान्।
कृतेऽशुभेऽन्यैरसि रक्षिता त्वं त्वय्येव रुष्टे शरणं कुतो नः॥

अत्र हि स्वाभाविको भावप्रसरः। अयत्नागतानि पदानि। अक्लिष्टं मसृणं गुम्भनम्। इति समग्रा गुणा दृश्यन्ते।

अद्य लोके महाकाव्यापेक्षया कतिपयश्लोकमात्रशरीरे क्षुद्रकाव्य एव जनानामभिरुचिरिति युक्तं यदेष कविः ईदृशकाव्यनिर्माणे प्रवृत्तः। अस्मिन् काले संस्कृतज्ञा विरलाः। तत्र शास्त्रज्ञा विरलतराः। तत्रापि कवयो विरलतमाः। एवं सति अयं कविः अन्ये च कतिपये संस्कृतकवि-शून्यत्वापप्रथाया जगद्रक्षन्तीति संस्कृतप्रियैर्मुदितैर्भाव्यम्।

छन्दस्सु यतिविषये, पदानां रूपविषये च स्वातन्त्र्यमवलम्बितुं कालानुसारेण प्रवृत्तिर्भवेदेव। अथापि यथाशक्ति तन्नियमपरिपालनं रचनासौन्दर्याय कल्पेतेति अस्माकं मतिः।

---

Registered No. M 2300.

Book XXV ॥ श्रीः ॥ Nos. 3 & 4

14

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥

पु. २५] कलि ५०५२ खर { वृश्चिक / धनुः } सञ्चिके ३ & ४

# THE UDYANA PATRIKA.

A
SANSKRIT MONTHLY

November & December 1951

For the rate of subscription please see inside

# UDYANA PATRIKA.

Annual Subscription Rs. Two only.
Do. With Sastraic Supplement Rs. 3—0—0

उद्यानपत्रिका ॥

१. अस्या वार्षिकं मूल्यं द्वे रूप्ये । सानुबन्धायाः त्रीणि रूप्याणि।
२. कन्यामासे साधारणसञ्चिका अनन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणसञ्चिकाः षट्सु मासेषु अनुबन्धसञ्चिकाश्च प्रकाश्यन्ते ।
३. ग्राहकीबुभूषद्भिर्दययया प्रथममेव मूल्यं प्रेषणीयम् ।
४. वर्षमध्ये ग्राहकीभवतामपि कन्यासञ्चिकादिरेव पत्रिका प्रेष्येत।
५. एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन् । गद्यरूपेषु अधिकतर आदरः ।
६. प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसम्पादकाय प्रेषणीयाः ।
७. एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः। (संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण ।)
८. लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या।

मुद्रणकारः— S. Vijayaraghavan,
*Proprietor,* The Srinivasa Press,
Thiruvaiyaru P. O., Tanjore Dt.

निर्वाहकसम्पादकः— *Mimamsarnava Mimamsakesari,*
*Panditaraja* D. T. Tatacharya Siromani, M. O. L.
Sri Venkateswara Oriental Institute
TIRUPATI.

## विषयाः ॥

1 मेनका।
2 व्याजोक्तिरत्नावली।
3 विवेककल्पलता।
4 संस्कृतग्रन्थजातम्।
5 वैदिका विशेषाः।
6 यथाभिमतम् ।
7 वृद्धभाषितम्।
8 प्रकृतिभेदः ।
9 पुस्तकपरामर्शः ।
10 प्रतिबोधनम् । (wrapper)

कनकाम्बा— न मे अन्यान् प्रति तावद् व्यसनम्। ग्रामं गतस्य स्वयम्प्रमाणरायस्य वृत्तां आपदं स्मरन्त्याः स्मरन्त्या मे अनल्पं व्यसनं भवति। किमरे, रङ्गराजो, तस्य स्वं किं बह्वस्ति ? तस्य हि पक्षवातेन पाणिपादं स्तब्धमभवत्। तस्य कृते खलु सर्वं वित्तं व्ययितमासीत्। न खलु स व्याधिर्निवर्त्स्यति। तस्य पत्नीपुत्रा आहारार्थं किं कुर्युः ?

रङ्गराजुः— अहमपि तथैव अश्रौषम्। पूर्वं अर्थं सञ्चित्य सञ्चित्य समुदितं गणिकायै ददासीत्। अद्य गृहे ताम्रिकाऽपि न वर्तते। तत्पत्नीपुत्रादयः किल धनिकेभ्यो याचित्वा तस्मै यवागूं ददति।

कनकाम्बा— आः, को नामायं लोकः ! का शिरोलिपिः। अनन्तरे निमेषे का निहीना स्थितिरस्माकं भविष्यतीति खलु न ज्ञायते। क उद्योगः ? किं वृथा गौरवम् ? न मे किमपि रोचते—इत्यवोचत्।

तदाकर्ण्य कञ्चित् कालं तूष्णीं स्थितः साम्बशिवः 'इदं सर्वं मम आश्चर्यं न भाति। रङ्गराजोः चतुश्शतानि रूप्याणि दत्तवान् वृद्धः हीरास्वामिरायः एकदिनज्वरेण यत् झटिति ममार, तत् स्मारं स्मारं मम मनः सन्तोषेण पूरितं भवति।' इत्यभिधाय शिशुवत् स्वप्रहर्षं प्रकाशयन् स्मितमकरोत्।

तदाकर्णितवती कनकाम्बा प्रेमभरितं "दैवं विना नु लोककार्यं सर्वं प्रवर्तते। अत्यन्तदुर्लभगुणयुक्तस्य दयालुमनसश्च अस्मदीयस्य रङ्गराजोः ईश्वरो न कदाचिदपि काञ्चन हानिं करिष्यति। पद्मावत्याः पत्यौ त्रिशिरःपुरस्थे सति, वित्तदानमात्रेण हीरास्वामिरायः किं तां लभेत ? सौन्दर्यवति यौवनाढ्ये विद्यासम्पन्ने च सुन्दररायै सप्रतीक्षं स्थिते, न परं हीरास्वामिरायः एतद्देशमहाराजोऽपि यदि तस्यै स्पृहयेत किं नाम तत् फलेत् ? यद्यपि बाला पद्मावती तथापि तस्या यन्महामनस्कत्वं जीवकारुण्यं च तद् वृद्धानामपि न भवेत्। तथा नाम गुणवतीं कन्यां किमीश्वरः कलुषनयनां रोदनपरामवस्थापयेत् ? न जात्वपि। जगत् सर्वं सृष्ट्वा पालयन् सर्वं निगूढः स्थित्वा सर्वं पश्यन् सर्वज्ञो भगवान् साधून् परिपाल्य जीवयितुं किं न जानाति ?" इति विद्रुतमुवाच।

अनुपदं साम्बशिवः रङ्गराजुं प्रति 'किमेष सुन्दररायः पितृष्वसुस्ते पुत्रः' इत्यपृच्छत्।

रङ्गराजुः— अथ किम् ।

कनकाम्बा—अभिमत एव हि कन्यायाः तद्विवाहः ?

रङ्गराजुः— अतीवाभिमतः । 'स इहैव आनीय वासयितव्यः, ताभ्यामुभाभ्यां निर्वृताभ्यां भवितव्यम्' इत्येव स्वामिना विवाहाय दत्तैः द्वाभ्यां सहस्राभ्यां रूप्यैः समीचीनमेकं सौधमक्रीणाम् ।

कनकाम्बा— साध्वी समालोचना । तस्य अत्रैव कमपि उद्योगं सम्पादयेम—इत्यब्रवीत् ।

तदा तस्य गृहस्य द्वारदेशे कश्चित् सेवकः निश्शब्दमागत्य स्थित्वा रङ्गराजुं प्रति लेखं कञ्चित् प्रासारयत् । तद्दर्शी रङ्गराजुः त्वरितं गत्वा तं लेखं प्रतिगृह्य साम्बशिवमुपसृत्य सविनयं प्रासारयत् । स तं गृहीत्वा उपरि विलासमालोक्य 'वत्सायाः मेनकाया आगतः । गत्वा समर्प्य आयाहि' इत्यवदत् । तदाकर्णितवती कनकाम्बा 'कस्य पुरस्य मुद्रा तत्र विन्यस्ता, पश्य' इत्यवदत् ।

साम्बशिवः तां दृष्ट्वा 'मद्रपुरादागतः' इत्यब्रवीत् ।

सपदि रङ्गराजुः तमादाय तृतीयां भूमिमारुह्यागच्छत् ।

इन्द्रविमान इव मन्मथशयनगृह इव च तत्र मञ्चाः, तूलिकाः तूलिकासनानि, चित्राणि, स्थिरदर्पणाः, विद्युद्व्यजनानि, इत्येवमादिभिः असङ्ख्यैर्वस्तुभिः अलङ्कृतायां शालायां आसञ्जिततूलिकायां महत्यां चतुष्पद्यां वराहस्वामी सानन्दं साचीभवन्नवर्तत । तस्य कर्णयोः करयोश्च वैडूर्याणि जिलुजिलिति व्यद्योतन्त । रत्नकम्बलास्तृते विशुद्धे तले उपविष्टा कोमलाङ्गी मेनका वराहस्वामिनः पादमादाय स्वाङ्के निधाय तदङ्गुलीभिः किमपि 'विषमं' कुर्वती तेन सह सरसं सल्लपन्ती चावर्तत । मूर्तिमान् प्रेमा विनयश्चेति स्थिताया आनन्दमय्याः तस्याः सुन्दर्याः कृत्स्ने वपुषि वैडूर्याणि नक्षत्राणीव जाज्वल्यमानान्यासन् । उभौ तौ युवानौ दिव्यगन्धर्वयुगलशङ्कादायिनौ ज्योतिर्मयौ व्यराजेताम् । अननुभूत-यत्किञ्चित्क्लेशाविव तौ महानन्दपूर्णौ अदृश्येताम् । तस्याः कामनीयके पूर्वतः शतगुणमभिवृद्धेऽपि चर्या अविपर्यस्ता एकरूपा बभूव । विपत्तेः प्राक् सा पत्या सह स्थिता विकटं सहास्यं च भाषित्वा तं नन्दयितुं प्रवर्तेत । ततः परं तु हास्यवद्भाषणं सर्वथा संस्थापयामास ।

तथा भाषणे कदाचित् भर्ता साहसिकी इयमिति मन्येतेति भीत्या सा स्ववृत्तिविपर्यासमकरोत् । तं प्रति विनीतता, आन्तरं प्रेम, अकपटता, तच्छन्दानुवर्तनं इत्येवमादीनेव गुणान् धारयन्ती, नारायणस्य भगवतो निखिलकैङ्कर्यकरणेन प्रीतिमावहन् आदिशेष इव, श्रीराघवस्य सर्व-विधशुश्रूषाकारी लक्ष्मण इव, जीवेन एकीभवन् देह इव, देहेन सम्पृक्ता छायेव च सा भर्तरि अवर्तत । वराहस्वामिनो हृदयमेव सेति युक्तं वक्तुम् । तस्य यत् प्रियं तदेव अस्या अपि प्रियम् । तस्य प्रहर्षणमेव आत्मनो महाभाग्यं मेने । तेन पठेत्युक्ते पठेत् । गायेत्युक्ते गायेत् । कथां कथयेत्युक्ते कथां कथयेत् । पादौ संवाहयेत्युक्ते तथैव कुर्यात् । तदुपसेवने यावत्स्वपि अहोरात्रेषु गच्छत्सु तस्या जामिता नासीत् । सोऽपि तां स्वजिवितावलम्बनं, अनन्यसुलभं अप्रतिमं भागधेयं चामन्यत । कार्यालये कर्मकरणकालेऽपि मेनकाया हावभावसुन्दरं रूपमेव तस्य चक्षुषोः पुरस्तात् ताण्डवकारि तिष्ठेत् । तथा तौ क्षणमात्रमपि अवियुक्तौ कपोतमिथुनमिव चक्रवाकद्वन्द्वमिव च सततमेकीभूतावास्ताम् । तथापि 'शीलितं शीलितं पयोऽपि अम्लेत्' इत्याभाणकविप्रतीपं तयोरात्मानौ अयःकान्तवत् अपृथक्सिद्धौ एकाकारौ अभवताम् । तयोरनुरागः इक्षु-दण्डस्य अग्रादधोऽध इव रसः उत्तरोत्तरं रस्यतरः आनन्दकारी च भवन् अवर्धत । माण्डलिकस्य स्वयमेका पुत्रीति, उपप्राड्विवाकस्य पत्नीति च मनागपि भावनामकुर्वती अदृप्यन्ती च भर्त्रभिमतवर्तिनी गृहिणीत्येतामेव वृत्तिं दृढमवलम्बमाना अवर्तत । अद्य झटिति उन्नतपदभाजां गृहेषु स्थितानां स्त्रीणामिव एकाकितया सेवकैश्च मोटारशकटेषु सञ्चरणं, वस्तुक्रयणाय गमनं, पाचकसेवकप्रभृतिभिः निर्लज्जं भाषित्वा पुरुषवत् अधिकारं कृत्वा सन्देहास्पदेन प्रकारेण वर्तनं च मेनकाया ईषदपि न परिचितम् । तुलायां गुरु अवनमति लघु उन्नमति इत्येतद् यथा, तथा प्रशान्ता सङ्कुचिता आनन्ददानेन नन्दन्ती सानुरागं जीवनमेव श्लाघ्यं जीवनमिति मत्वा सा द्वारानतिलङ्घिनी धर्मपत्नी भूत्वा पश्यतां विस्मयकारिवृत्ता देवताकल्पा अवर्तत ।

एवंविधयोरपूर्वयोर्बालदम्पत्योः उभयोः पूर्वोक्तरीत्या मूर्तिमदानन्द-रूपयोरुपविष्टयोः रङ्गराजुः द्वारकवाटं मृदु ताडयित्वा 'अम्ब, अम्ब' इत्याजुहाव ।

तस्य ध्वनिं जानती मेनका ससम्भ्रममागत्य कवाटमपावृणोत्। ततः स मुद्रादागतं लेखं तस्यै विनीतं दत्त्वा अपासरत्। स लेखः किं स्वभर्तुरागत इति सन्दिहाना सा सद्यः मुखविलासमपश्यत्। तत्र स्व नामैव स्थितं, हस्ताक्षरं च नूर्जहान्-अस्याः सम्बन्धि पश्यन्त्याः वक्त्रे अनुरागः आनन्दश्च पुष्प्यति स्म। 'नूर्जहान् लेखं लिखितवती'ति मधुरं भाषमाणा तस्य सविधं जगाम। सविधमागतां तां प्रेम्णा समाकृष्य स्वकीये आसने स्वपार्श्वे उपवेश्य वामेन करेण आश्लिष्य 'वाचय तावत्। किं लिखितमस्ति पश्येम' इत्युक्तवति वराहस्वामिनि मेनका लेखमुद्घाट्य एवमवाचयत्—

'दुर्लभसहोदरि, मेनके, अभ्यधिकेन प्रेम्णा त्वया मे लिखितश्चरमो लेखोऽलम्भि। दृष्ट्वा अतीव प्रमुदिताऽभूवम्। अहमद्यावधि कतिषु नाम पुस्तकेषु कथाः पठितवत्यस्मि। प्रत्यक्षं च कति नाम स्त्रियो दृष्टवत्यस्मि। परं तु भवदीयान् कल्याणगुणान् बिभ्रतीर्नारीः नाहं दृष्टवत्यस्मि, न च श्रुतवती'। इतीदं प्रथमवाक्यं मेनका पपाठ। तदाकर्णितवान् वराहस्वामी 'आम्। तात्त्विको विषयः' इत्युक्त्वा तस्याः कपोले सानुरागं चुम्बितं कृत्वा उपरि पठितव्यमवोचत्। सा उपरि पठति— 'अथापि मया मत्पित्रा च कृतं अल्पमुपकारं पर्वतीकृत्य अतिमात्रं सम्भाव्य यल्लिखितवत्यसि तन्मे मनसो भृशं क्लेशावहमासीत्। इतः परं तं विषयं प्रति न लेखनीयमिति प्रार्थये।

अपरमेकं मुख्यं विषयं त्वयि आवेदयितुमिच्छामि। पालकप्रत्यवेक्षकेण सञ्जीव्यार्येण कृतैः कैश्चिद्दुष्करैस्तन्त्रैः मम भर्ता पूर्वस्मरणानि अत्यन्तं विहाय नवो मनुष्यः संवृत्तः। सोऽद्य मयि पारमार्थिकं प्रेम अनुरागं च कृत्वा सत्पुरुषचर्यां चरन् वर्तते। आवामुभौ परमानन्देन कालं गमयन्तौ स्वः। ईश्वरस्य कृपया इतः परं सर्वदा आवां एवमेव वर्तिष्यावह इति निश्चिता मे मतिर्भवति। ह्यो रात्रौ मम पितुः प्रासादं गतवत्यासम्। तदानीं युष्मद्योगक्षेमश्रवणेन महान्तमानन्दमलभत। त्वद्भर्तुः अतर्कितं उपप्राड्विवाकपदलाभोऽभूदिति, स कस्य पुरुषकारेणाभूदिति मत्पितरं पृष्ट्वा लेखनीयमिति च किल त्वं लिखितवत्यासीः। तत्प्रति तस्मिन् अहं प्रश्नमकार्षम्। सः स्वयमेव

कण्डूतिं जनयन् सचन्द्रकशतं दंशेन कुर्वन् वपु-
र्नासान्तः प्रविशन्नहो मशक, मां तल्पोदरे नर्तयन् ।
सूक्ष्माकारतयाऽप्यशक्यहननः प्रस्फोटनिष्पेषणैः
स्वल्पप्रेप्सितविश्रमं तुदसि किं स्वापोपरोधी हठात् ॥ ९३ ॥

Causing an itch (by your contact) and making the body spotted all over with your bites, and entering the nasal cavity, alas ! oh Musquito ! you make me restlessly rolling on my bed. As you are very small in size, I am not able to kill you either by striking you or by crushing you. Why do you thus harass me wantonly disturbing my sleep while I direly need a little rest ? 93

कस्त्वन्मरुतामपि व्यतिकरः किंपाक, पाकाय न-
स्त्वच्छायामुपगम्य विश्रमजुषां बर्बूर, का वा स्थितिः ।
आतिथ्यं कियदेव शाल्मलितरो, त्वामुच्छ्रितं जग्मुषां
किं युष्मासु वनस्पतित्वबिरुदं स्वैरं न विश्राम्यतु ॥ ९४ ॥

Oh, Kimpaka tree ! what the consequence is to us who happen but to contact your breeze, had better not be described. Oh Barbura tree ! what kind of rest people who resort to your shadow can enjoy need not be dwelt upon. Oh Salmali tree ! what wonderful hospitality you extend to those who, seeing your height, approach you (with eager expectation) is too well known for being recounted. Is it not in the fitness of things, therefore, that you three should be the distinguished recepients of the title of Vanaspati (the lord of the forest) ? 94

[किंपाकः 'माकाल' इति ख्याते वृक्षे– a poisonous tree,
बर्बूरः கருவை மரம் ; see Bhallata 35
शाल्मलिः the silk cotton tree, இலவ மரம்]

वस्तूत्पादनशक्तिमात्रविषयं साधर्म्यमस्त्वेतयोः
कस्तूरीहरिणस्य यातु तुलनां काप्यूर्णनाभः कथम् ।
शोधिन्याऽपनयन्ति कर्म जटिलं सासूयमेकस्य य-
च्छोभायै तिलकं मदेन च परस्येच्छन्ति वामभ्रुवः ॥ ९५ ॥

Of course, it must be admitted that a comparison within the limited sphere of the possession of a capacity to produce things exists as between these two; yet how can the spider in any manner be stated to deserve an honourable comparison with the musk deer? The fair-browed damsels sweep off the netted fabrics of the former with a stroke of the broom, while they eagerly make the decorative mark on the forehead with even the latter's secretion. 95

संहृत्य श्वसितं निमील्य नयने संमुद्य वक्त्रं हठा-
त्प्रच्छाद्याङ्कमाशिरःपदमपि प्रावारकेण स्थितम् ।
त्वन्निर्यन्त्रणरन्ध्रपातचकितं त्वत्स्पर्शकुत्साभृतं
हा किं मां मशकाभिपत्य दशसि काप्येव लब्धान्तरः ॥ ९६ ॥

Withholding the breath, closing the eyes, forcibly holding the mouth sealed up and drawing tightly from head to foot over the body a blanket, I lie down, timorous of your audacious onslaught at a vulnerable point and loathing the very touch of yours. And yet alas! oh Musquito! you manage to pick a hole somewhere and wheeling your flight towards it, you bite me. 96

अश्लीलाः स्मृतिगोचरा अपि नृणामुद्वेगदा दर्शनेऽ-
प्युत्सार्या हठतः क्वचित्कृतपदा ये नाम भव्येष्वपि ।

एते भूतगणा गतागतकृतः कैलासनाथान्तिके
याच्यन्ते मुरभिन्मुखैरपि सुरैरन्तःप्रवेशक्षणम् ॥ ९७ ॥

These demons who are inauspicious even to think of, who frighten men who happen to catch a look at them, who should be exorcized with determined effort from any place which they seek to possess-if at all people should live in peace—these demons going about hither and thither in the presence of the Lord of Kailasa are waited upon by the Gods including Vishnu Himself, soliciting permission to enter inside. 97

पीयूषेन्दुसहोद्भवं किमु भवेत् क्षीरोदमध्याद्विषं
कस्तत्त्वं विचिकाय मूढमतयो हाहारवैर्दुद्रुवुः ।
तावद्वीर इवाभयप्रद इवाभ्येत्यान्यदुःखार्जितं
सारं क्षीरमहोदधेः कमपि तं शम्भो, त्वमेकोऽग्रहीः ॥९८॥

It could not have been any poison which arose out of the milky ocean along with the moon and nectar. Who paused to investigate the truth ? The fools took to their heals crying alas ! alas ! At that juncture, oh Sambhu ! you entered into the scene like a hero ostensibly coming for succour, and devoured that something which was the essence of the milky ocean and which was produced by the arduous efforts of others. 98

स्वामिप्रेमविधेयतासुमतिताविश्वासकार्तज्ञयभूः
श्वा नामाशुचिरास्तिकेन भवनद्वारादपि प्रेर्यते ।
लुण्ठाको य इहाखुभुङ्न च मनाग्येनोपकारः कचि-
द्धूर्तः स्वार्थपरः स एव तु चतुःशालान्तरे खेलति ॥ ९९ ॥

The dog who is distinguished for his gratitude fidelity intelligence, obedience and love of his master, is condemned by an orthodox person as impure, and driven away even from the front door. But the very cat (eater of rats) through whom nothing useful accrues anyway, who is a thief and a rogue and keen upon selfish interests, freely disports himself in the inner quadrangle of the house. 99

कर्णोदारगिरः शृणोमि किममूर्मैनाकमम्भोनिधि-
स्त्रस्तं वज्रधरादरक्षदचलेष्वेकः स पक्षीति च।
आतिथ्यप्रणयं दधत्स कतमः श्याले महोदारिषु
श्लाघ्यो वाऽथ कियत्सगन्धविपदि स्वार्थप्रवीणोऽपरः ॥१००॥

Do I hear such words as these spoken calculated to be pleasing to the ear, namely-'The ocean gave protection to Mainaka who was afraid of the weilder of the thunderbolt, and among the mountains he (Mainaka) alone still remains winged'? How among the reputed generous can be counted he (the ocean) who entertained with affection his own brother-in-law? And how much is the other Mainaka deserving of praise who while his kinsmen were all in a sad plight, cleverly looked to his own interest? 100

तुङ्गे तत्र हिमालयाग्रशिरसि प्रायः सिरान्तर्वह
द्रक्तोद्वेजकशैत्यधाम्नि भुजगानाबिभ्रता निर्विषान्।
भूयस्तेष्वपि शङ्कयैव शिरसा धृत्वौषधीनां पतिं
मूढानां महिमोपदर्शनविधिः शम्भो, त्वया सम्भृतः॥ १०१ ॥

In that most exalted peak of the Himalayas where it is so cold that the blood flowing in the veins gets nearly frozen, you wear the serpents which are poisonless; and out of suspicion even from them, as a measure of

# उद्यानपत्रिका ॥

"अन्या वाचो विमुञ्चथ"

वेदापहारविक्रोशद्बोधःखेदविमर्दिनम् ।
पण्णातीरपरिष्कारं पारिजातमुपास्महे ॥

पु. २५] कलि ५०५२ खर { वृश्चिक } साधारण सं २
धनुः } शास्त्रानुबन्ध सं २
आहत्य सं ४

# विवेककल्पलता ॥

भाषासु पदपदार्थयोः, वाक्यवाक्यार्थयोः, रचनासु च समीचीना व्युत्पत्तिः बहुसुकृतलभ्या । अस्यां सम्पन्नायां परकीयेषु वाक्येषु अविद्यमानदोषारोपणप्रमादवर्जनं विद्यमानगुणग्रहणपाटवं च, स्वकीयेषु वाक्येषु दोषोपनिपातपरिहरणं समग्रगुणसम्भरणसामर्थ्यं च पुष्कलं सम्पद्येरन् । अतः विमर्शनीयतया प्रसक्तेषु निबन्धेषु स्थितानि पदानि वाक्यानि च यानि परिशीलनार्हाणि भान्ति तान्युपादाय क्रमेणावधेयानंशान् सहृदयरीत्या, अस्मान् प्रति उद्भावितानां दोषाणां परिहरणमुखेन च विशदीकरिष्यामः ।

1) श्रीमद्वेङ्कटनाथगुरुस्तोत्रमिति द्वात्रिंशत्पद्यात्मा कोऽपि स्तोत्रग्रन्थः अस्यद्य प्रकाशितः (श्रीरामानुजन्, मार्च् 1952) । द्वात्रिंशदपि पद्यानि शार्दूलविक्रीडितवृत्तबद्धानि । इमानि 'श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी । वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥' इत्यस्य श्रीमन्निगमान्तमहादेशिकविषयस्य मुक्तक-तनियन्-पद्यस्य यानि द्वात्रिंशदक्षराणि तेषु क्रमेण एकैकं आदौ घटयित्वा रचितानि । तत्र

यज्ञे धातुरुदित्वरः स वरदः श्रीहस्तिशैलेश्वरः
स्वीये वाहनमण्टपे परमया प्रीत्या समास्थापयन् ।
वारं वारमनुग्रहं प्रकटयन् विद्योतते तादृशप्रख्यातासितवैभवो गुरुवरो मे सन्निधत्तां हृदि ॥

इत्यस्मिन् पद्ये यमिति यच्छब्दः गुरुवरपरामर्शी । तादृशेति तच्छब्देन किं स एव परामृश्यते उतान्यः ? अर्थः कः ? इत्यभिज्ञैः स्वयं चिन्तनीयम् । आङ्पूर्वस्तिष्ठतिः सकर्मकः । 'महेन्द्रमास्थाय महोक्षरूपम्' इति कालिदासः । आतस्थिवान् मन्त्रमयं शरीरम्, आस्थितः कुन्दशाखाम्, इति एतत्स्तोत्रविषयभूतः श्रीवेङ्कटनाथगुरुः । तदिह 'वाहनमण्डपे आस्थापयन्' इति सप्तमी किं युज्यत इत्यालोचनीयम् ।

अष्टमे पद्ये 'यस्मै नतिः श्रेयसी' इत्यत्र श्रेयसीपदार्थो विचार्यः । श्रेयःपदस्य द्वौ अर्थौ । अभ्युदयः, अभिमतार्थः, सुकृतं, मोक्षः, इत्येवं बहुधा स्थितः प्राप्यार्थरूप एकः । यथा श्रेयो न ह्यरविन्दलोचन, श्रेयः किरन्तु, श्रेयांसि सर्वाण्यधिजग्मुषस्ते, इत्यादौ । प्रशस्यतर इत्यपरः । यथा श्रेयान् स्वधर्मो विगुण इत्यादौ । तत्र 'यस्मै नतिः श्रेयसी' इतीदं 'यस्मै नतिः नत्यन्तरात् प्रशस्यतरा' इतीममेवार्थं बोधयितुं क्षमम्, न त्वभिमतफलप्रदेति इममर्थम् । अयमेवार्थो विवक्षित इति तु स्तोता स्वयं द्राविडीविवरणे स्पष्टमावेदयति । तत्रेदं श्रेयसीति पदमवाचकम् । श्रेयस्करीति भाव्यम् । 'यस्मै नतिः श्रेयसे' इति तु युक्तं भवितुम् । वृत्तानुरोधात् ।

'काव्यज्ञशिक्षयाऽभ्यास इति हेतुस्तदुद्भवे' इति काव्यनिष्पत्तिसामग्र्यां काव्यज्ञशिक्षया क्रियमाणमभ्यासमन्तर्भूतं लक्षणकारा उपदिशन्ति । छन्दोव्याकरणादिसर्वशास्त्रपाण्डित्ये सुसम्पन्नेऽपि ततः परं काव्यवृद्धशिक्षानुसारिणा अभ्यासेनाधिगन्तव्या बहवो विशेषाः काव्यमार्गे सन्ति । तेष्वेकमिह प्रस्तोतव्यं पश्यामः । शार्दूलविक्रीडितवृत्ते द्वादशात् वर्णात् परं यतिरिति प्रसिद्धमेतत् । तेन एकैकस्मिन् पादे द्वौ भागौ भवतः–आद्यो द्वादशाक्षरात्मा, अन्त्यः सप्ताक्षरात्मेति । पठनावसरे वर्णसमुदायस्य यस्य कस्यापि उपक्रमस्थवर्णोच्चारणे प्रयत्नस्य तीव्रता ततो वर्णान्तरोच्चारणे क्रमेण मन्दता, एतदनुसारेण ध्वनौ विशेषश्च भवतीति सर्वानुभवसिद्धमेतत् । तदिह शार्दूलविक्रीडितपादेषु प्रथमे चरमे च भागे आदौ उच्चारणयत्नतीव्रता ध्वन्युच्चता च, अवसाने यत्नस्य मन्दता ध्वनेरनुच्चता च भवतीति प्रतिपत्तव्यम् । 'पत्या संयमिनमनेन जगतामत्याहितच्छेदिना' इत्यत्र 'पत्या' इत्यस्य यथा किञ्चित् सावष्टम्भमिवोच्चारणं तथैवोत्तरत्र 'अत्या' इत्यत्रापि । अत एवेदं प्रासविशेषस्थानम् ।

अथ ये युष्मदस्मच्छब्दयोः अनुदात्तादेशाः त्वा मा, वां नौ, वः नः, ते, मे इत्यादयः ते पादादौ वाक्यादौ च न प्रयोक्तव्या इति तावद्विदितम्। एवमेव पद्यानां पादेषु यतिनियमेन यत्रानेको भागोऽस्ति तत्र उत्तरभागस्य आदावपि ते न प्रयोक्तव्याः। प्रथमभागारम्भवत् तदारम्भस्यापि सावष्टम्भमुच्चारणीयत्वादिति काव्यज्ञशिक्षयाऽधिगन्तव्यः सूक्ष्मो विषयः। प्रकृते स्तोत्रे 'मे सन्निधत्तां हृदि' इत्युत्तरभागारम्भे 'मे' इति प्रयुक्तं न शोभते। महते वैरस्याय कल्पते। 'तन्नः प्रमाणं शिवः' इत्युदयनः। 'नस्तत् प्रमाणं' इति नैव ब्रूयात्। 'तन्मे मनः कृन्तति' इत्यन्ये। 'मे तन्मनः कृन्तति' इति नूनं श्रोतॄणां मनः कृन्तति। 'तरतमतया जुष्टायास्ते' इति देशिकः न तु 'ते जुष्टायाः' इति।

इदमपि सकृद् द्विः प्रयुज्यमानं कथञ्चित् सह्येत। द्वाविंशत्यपि पद्येषु चरमो भागोऽयमेकरूपः आम्रेड्यते। एरण्डतैलं पिबद्भिरिव, दुर्वीथिकां लङ्घमानैरिव, कामप्यवस्थां प्राप्नुवद्भिः स भागः पठनीयो भवति।

एवं पदे पदार्थे वाक्ये रचनायां च अस्ति बह्ववधेयमिति किञ्चिद्दीदृशाम। अथ प्रबन्धं अखण्डमुपादाय अवधेयं प्रति किञ्चिद् ब्रूमः। ग्रन्थस्य वैशिष्ट्यं त्रेधा वदन्ति— ग्रन्थस्वरूपस्य कर्तुः विषयस्य च वैलक्षण्येन। प्रकृतग्रन्थस्वरूपं प्रति उक्तं यद्वक्तव्यम्। विषयो भगवान् निगमान्तमहादेशिकः अस्माकं पूज्यतमः महत्तमः आचार्यः। येषामस्मिन् भक्तिर्नास्ति ते यद्यप्यत्र विषयवैलक्षण्यं तथा न प्रतिपद्येरन्, तथापि तच्चरणारविन्दैकदैवतानामस्माकं तत्प्रतिपत्तिः समग्रा। तेनास्मदृष्ट्या उत्तमोत्तमविषयताऽत्र स्थिता। परं तु सोऽस्माकं बहुमानः कर्तृस्वरूपस्वभावचिन्तायां अत्यन्तं नश्यति। स्तोत्रनिबन्धेषु आत्मभूतः सारांशः कविगतः स्तुत्यविषयो भावः रतिविशेषः। स सहृदयैरास्वाद्यः। यथा यथाऽयमास्वादो विशिष्यते तथा तथा स्तोत्रकाव्यं विशिष्यते। एवं सति, वस्तुतः स्तोतुः स्तुत्ये रतिर्नास्ति, प्रत्युत द्वेषो रूढमूलः, भक्तेः केवलाभिनयमात्रमिति यदि श्रोतॄणामस्ति प्रतीतिः तत्र अस्वादस्य का प्रसक्तिः? हासः शोको वा परं भवेत्। महाश्रोत्रियं स्वयं व्यापाद्य तस्य चरमश्लोकबन्धं कृत्वा यदि कश्चित् साडम्बरं व्याचक्षीत तदाकर्णने या चित्तवृत्तिर्भवेत् साऽत्र भवति। ज्ञानेन शीलेन आर्जवेन सत्येन अद्वेषेण सर्वजनस्नेहेन

हृदयमार्दवेन आस्तिक्येन अनहङ्कारेण भगवद्भक्तिभूम्ना च यः सम्पन्नः स लोके कविर्भवितुमर्हति। तेन कृते काव्ये रसकल्लोलाः प्रादुर्भवेयुः।

अद्वेषमात्रमपि वा येषां वेदान्तदेशिके।
वीटीचेटोऽस्म्यहं तेषामिति वीथीषु घुष्यताम्॥

इत्येवं कवयतो महापुरुषस्य बुद्धिं प्रविश्य 'सा कथं व्याप्रियत। तत्र प्रतिभाविशेषप्रादुर्भावितस्वरूपं किं किमवर्तत' इति यदि सावधानं निपुणं निरूपयेम तत्र यत् पश्येम तस्य प्रकृतस्तोत्राभिव्यङ्ग्यस्य च भावस्य कियदन्तरं भवति?

2) श्रीदेशिकः सच्चरित्ररक्षायां 'महते दैवताय' इत्येतदर्थविचारे 'समस्तस्यैव तथा रूढत्वात्, व्यस्तस्य नामधेयतया प्रसिद्ध्यभावात्' इति यदाह तस्यार्थमेवं वदन्ति— 'समस्तमेव पदं शिवे रूढम्। व्यस्तं शिववाचकतया न दृष्टम्' इति। एवं वदन्तः पादुकासहस्रे यद्देशिकः 'नमति महति देवे' इति व्यस्तं शिववाचितया प्रयुङ्क्ते तद्भ्रमादेवेति घोषयन्ति। अत्र प्रामाणिकैरवधेयम्। 1) यथावत् शास्त्राभ्यासविरहात् प्रौढग्रन्थेषु पङ्क्तीनामर्थं ग्रहीतुं न शक्नुवन्ति। 2) अहङ्कारभूम्ना स्वस्य ग्रहणसामर्थ्यवैकल्यं न बुध्यन्ते। 3) द्वेषेण अवज्ञया च देशिको भ्रान्त एवेत्यध्यवस्यन्ति। 4) नास्तिक्यात् किमीदृशस्यैव देशिकस्य वेदान्ताचार्यबिरुदं सर्वतन्त्रस्वतन्त्रबिरुदं च दिव्यदम्पती अन्वगृह्णीतामिति हयग्रीवानुग्रहः किं भ्रमफलक इत्यालोचयितुमवसरं न लभन्ते। 5) इदं पाण्डित्यम्, अस्यास्य ईदृशमीदृशं पाण्डित्यम् इति ग्रहणाभावात् दूषणसम्भ्रमात्, शास्त्रार्थचर्चास्वनधिकाराच्च अस्मादृशैर्विविच्य क्रियमाणानि निरूपणानि नावधारयन्ति। 6) अतः ग्रहीतग्राहितया उक्तमेव दूषणं परिहृतमपि पुनः पुनर्मुद्रयित्वा प्रकाशयन्ति। एतैः कारणैः अत्र अस्मिन् अत्यल्पे विषये वस्तुतो भ्रान्त एव देशिक इत्येषां वादः। एतैः क्रियमाणं 'वाजिग्रीवकृपाकटाक्षविभवोदञ्चत्प्रभावोज्ज्वलः' इत्यादि देशिकस्तोत्रं कियत्पारमार्थिकम्? कियद्गौरवमर्हति? अथ 'व्यस्तस्य नामधेयतया प्रसिद्ध्यभावात्' इति देशिकोक्तेः 'व्यस्तं शिववाचकतया न दृष्टम्' इति यदर्थमाहुः तदनुपपन्नमिति व्युत्पन्नानां सुगमम्। नामधेयं हि रूढं वाचकम्। तेन 'नामधेयतया प्रसिद्ध्यभावात्' इत्यनेन 'रूढत्वाभावात्' इत्येवोक्तं भवति।

यो हि देवदत्तो नाम पाचकः तस्य देवदत्तपदं नामधेयम् । साङ्केतिकं रूढम् । पाचकपदं तु न तथा । अथापीदं तद्वाचकमेव । यौगिकत्वात् । तस्माद् देशिकेन नामधेयत्वाभावे, रूढत्वाभावे, विशेषे उच्यमाने सामान्यं बोधकत्वाभावमुक्तं कृत्वा दूषणं दूषयितुरतिमहद् दूषणम् । 'समस्तस्यैव रूढत्वात्' इति पूर्वत्र एवकारेण व्यस्तस्य रूढत्वं व्यवच्छिद्यत इति तावत् स्पष्टम् । इदमेव हि उत्तरत्र प्रतिपाद्यम्, इति वाक्यव्युत्पत्तौ सत्यामेतावत् सङ्कटं नैवाभविष्यत् । अन्यदुद्यानपत्रिकायाः पूर्वसञ्चिकाविशेषे अस्मत्कृते प्रकृतग्रन्थविवरणे द्रष्टव्यम् । उदाहृतेन ग्रन्थेन रूढ्यभावः प्रतिपादितः । अथ प्रकारान्तरेण देवतान्तरबोधकत्वमस्तु इति बोधायनादिप्रयोगावष्टम्भेन प्रत्यवस्थाने सति 'सत्यं व्यस्तस्य प्रकारान्तरेण प्रकरणादिना तद्बोधकत्वं भवति । किन्तु तादृशं प्रकरणादिकमिह नास्तीति' समाधानमुच्यत इति अवद्यगन्धोऽप्यत्र नास्ति ।

इदं सच्चरित्ररक्षाग्रन्थदूषणमुखेन चिरादभिनिविश्य क्रियमाणमाचार्यदूषणं अद्य भूमिकान्तरपरिग्रहेण क्रियते । परस्तात् 'न वयं देशिकदूषणकृतः किन्त्वन्ये' इति लोकप्रतारणसौकर्याय । 'यथा श्रीशठकोपमुनिप्रभृतयः नायिकातन्मातृप्रभृतिरूपं परिगृह्णन्ति तथा वयं वेषान्तरपरिग्रहं कुर्मः' इत्यतिरोहितं च कदाचिद्भाषन्ते । स्वस्य स्वामित्वव्यवहारेण उत्कटा प्रशंसा, देशिकस्य तदीयानां वा उत्कटा निन्दा यदा कर्तव्या भवति तदा एषां रूपान्तरपरिग्रहः । भगवदनुभवे अभ्यधिकाय रसाय भक्तानां रूपान्तरग्रहणम् । आचार्याणां भागवतानां च दूषणे आत्मस्तवने च तादृशाय रसाय एषां रूपान्तरग्रहणमित्यास्तां नामायं अल्पो विशेषः ; वेषान्तरधारणं तेषामप्यस्ति एषामपीति तत्तुल्या एवैते ! कोऽत्र सन्देहः ?

उच्चावचं जगदिदं सृजतोऽम्बुजाक्ष
या शक्तिरद्भुततमा तव साऽतितुच्छा ।
कौटिल्यराशिमयमीदृश इत्यगम्य-
मेतं ससर्जिथ यया त्वमियं ह्यपारा ॥

९) वाक्यरचनासु परान् शिक्षयितुं प्रवृत्ताः, 'प्राचीनग्रन्थोक्तार्थप्रतिपादकः अर्वाचीनग्रन्थः' इति वक्तव्यम् । न तु 'अर्वाचीनग्रन्थोक्तार्थप्रतिपादकः प्राचीन ग्रन्थ' इति । 'न्यायसिद्धाञ्जनानुगुणं श्रीभाष्य'मिति

सर्वथा असम्बद्धमिदं वचनमिति प्रतिजानानाः किमपि किमप्यलिखन् नैवमेतदिति निरूपयन्तो वयं 'इदानीं कापिलतन्त्रसिद्धाब्रह्मात्मकप्रधान-पुरुषादिप्रतिपादनमुखेन' इत्यानुमानिकाधिकरणश्रीभाष्यश्रीसूक्तिमुदाहृत्य 'साङ्ख्यग्रन्थोक्तानर्थान् प्रतिपादयन्ति उपनिषदः' इत्येव वाक्यशैली दृश्यत इत्यवोचाम । अत्र प्रतिवदन्ति—

> एवं लिखतां श्रीभाष्यवासनैव नास्तीति युक्तमध्यवसानम् । 'आशङ्क्य तन्निराक्रियते' इति अत्र वाक्यसमाप्तिः । 'एवं प्राप्ते प्रचक्ष्महे' इत्यतःपूर्वं स्थिताः पङ्क्तीरुदाहृत्य 'अयं हि भाष्यकारसिद्धान्तः' इति व्यामोहयन्तः वस्तुतस्तथैवेति गृह्णन्तश्च सन्ति । 'असावपि च तद्गोष्ठीनिविष्टेष्वग्रिमः खलु' ।

इति ।

> सङ्गतमेकं श्रोतुं भाषणमेषां चिरादभिलषामः ।
> किं नु स कालो भविता पूर्येतायं मनोरथो यत्र ॥

वाक्यविन्याससाधुत्वासाधुत्वे प्रति हि सम्प्रति चिन्ता । न प्रमेयप्रामाणिकत्वाप्रामाणिकत्वे प्रति । पूर्वपक्षोपन्यासपरवाक्यविन्याससाधुत्वमपि किं सिद्धान्ते निराक्रियते ?

> ग्राम्याभाणकपाठाद्वा तर्जनाद्वाऽवहेलनात्
> नापैति परपाण्डित्यं स्वपाण्डित्यं न सिद्ध्यति ।

4) भगवद्रामानुजदर्शनावलम्बिनः सर्वे प्राज्ञाः श्रीमन्निगमान्तमहादेशिकेन यथा व्यवस्थापितं तथैवेदं दर्शनमादरणीयमिति तथा आहृतमेव श्रेयस्करमिति च अध्यवस्यन्ति ।

> गुरौ वादिहंसाम्बुदाचार्यशिष्ये जना भक्तिहीना यतीन्द्राप्रियाः स्युः ।
> यतीन्द्राप्रिया विष्णुकारुण्यदूराः कुतो मुक्तिवार्ता हि तादृग्विधानाम् ॥

इति ते घोषयन्ति । केनापि हेतुना प्रथमं श्रीदेशिके वैमुख्यं कृतवन्तोऽपि तद्ग्रन्थसेवनेन प्रबुद्धाः तस्मिन् अपारां भक्तिं भेजिरे । एवंविधो भारद्वाजश्रीनिवासाचार्य इति स्वयमेव सः स्वकृते न्यायपरिशुद्धिव्याख्याने

> इयतःसमयानहं महान्तं मतिभेदं विवशः प्रपद्यमानः ।
> स्वमवद्धयमञ्जसाऽद्य देवान्निगमान्तार्यनिबन्धतः प्रबुद्धः ॥

इत्यावेदयति । अत्र अप्रबोधप्रबोधाभ्यां आत्मनो द्वे अवस्थे, तत्र पूर्वा

वस्थायां स्वस्य निगमान्तदेशिकानभिमतसम्प्रदायान्तरस्थितिं उत्तरत्र तद-भिमतसम्प्रदायप्रविष्टतां च प्रकाशयत्ययं श्रीनिवासाचार्य इति स्पष्टमेतत्। अनृतरतयः सर्वविपरीतवादिन इह वदन्ति 'पूर्वमद्वैती सन् अयमनन्तरं विशिष्टाद्वैतमतं प्रविष्ट' इति ।

द्रमिडोपनिषद्देशिकमाधववंश्येन नीतिपरिशुद्धेः ।

इति वदन् श्रीनिवासाचार्य एव एषां रभसात् यत्किञ्चनभाषणशीलता-मप्रामाणिकपरिबृढतां च प्रकटयति । अन्यदपि लिखन्ति— 'मतान्तर-प्रवेशमनुदिनमद्य वर्तमानं पश्यामः। अधःप्रदेशादुद्गमनं कृच्छ्रसाध्यम्। प्राकाराग्रात् अवपतनमनायासेन कर्तुं शक्यम्। ब्राह्मणादयो भूत्वा बहवः क्रैस्ता माहाम्मदाश्च नित्यं परिणमन्ते । न ते पुनर्ब्राह्मणगोष्ठीप्रवेशमि-च्छन्ति । इच्छन्तोऽपि न प्रतिगृह्यन्ते— इति । अभिज्ञो भारद्वाजश्री-निवासाचार्यः स्वपरिगृहीतं यन्मतं निगमान्तदेशिकप्रतिष्ठापितं प्रतिपाद-यति तदेवं बहुमानयन्त इमे देशिकविषयं यत् स्तोत्रं रचयन्ति, यच्च तस्य स्तोत्रस्य शततमीमपि कलां महाचार्यादिकृतं स्तोत्रं नार्हतीति घोषयन्ति, तत्र किं तत्त्वविद्भिः प्रतिपत्तव्यमिति विवेकिनो नूनं विमृष्टुमर्हन्ति। अथ वा किं विमर्शेन। यत् प्रतिपत्तव्यं तज्झटिति प्रतिपत्स्यन्त एव।

---

# संस्कृतग्रन्थजातम् ॥

## मरुतः ।

रुद्रस्य इमे पुत्राः। एषां माता पृश्निः। त्रिस्सप्तेति त्रिषष्टिरिति एषां संख्या कीर्त्यते । युवानः सांग्रामिकाः शूलकुठारायुधाः किरीटधारिणः हिरण्मयैरलङ्कारैरलंकृताः अङ्गदिनः नूपुरवन्तश्च इमे मरुतः। हिरण्मये विद्युत्प्रदीपिते रथे एते संचरन्ति। वायुमेव कदाचित् स्वरथे वाहत्वेन अयुञ्जत । सिंहवत् भयङ्करा इमे। स्वरथनेमिभ्यां पर्वतान् भिन्दन्तः वनस्पतीन् शकलयन्तः मत्ताः अरण्यगजा इव वृक्षान् ध्वंसयन्ति । तेषां प्रधानं कर्म वृष्टिजननम् । वृष्टिरेव तेषां वस्त्रमिति, वृष्टिधाराभिः सूर्यस्य चक्षुः इमे पिदधतीति च उच्यते। घृतेन पयसा च ते भूमिं समर्धयन्ति । एषां संचारेण ध्वनिविशेषाणां जायमानत्वात् इमे गायका इत्युच्यन्ते। इन्द्रयुद्धेषु एते सहैव वर्तन्ते।

## वायुः वातो वा।

त्रीण्येव सूक्तानि एतत्पराणि । प्रायः इन्द्रेण साकं द्वन्द्वभावेन वायोः स्तुतिः। पर्जन्येन साकं वातस्य। वायुः मनोजवः शोणाभ्यामश्वाभ्यामुह्यमानं रथमधितिष्ठति । तत्रत्ये स्वर्णमये आसने अयमास्ते। इन्द्रोऽस्य सखा।

## पर्जन्यः।

इयं वृष्टिदेवता । त्रिषु सूक्तेषु स्तुता। अनेन नाम्ना वर्षणोन्मुखः मेघः अभिधीयत इत्याहुः। वृषभोपमानेनासकृत्स्तूयते।

## आपः।

चतुर्षु सूक्तेषु स्तुताः । मातर इति पत्न्य इति अभीप्सितवरप्रदा देवता इति च इमाः प्रतिपाद्यन्ते । आसां पुत्रः अपान्नपादित्युक्तम्। अनृतवदनेन अभिशापेन हिंसया दुश्चरितेन च जायमानं सर्वं पापं हरन्तीति, व्याधिचिकित्सामायुषो दैर्ध्यममृतत्वं च कुर्वन्तीति च स्तूयन्ते। सोमः अप्सु युवतिषु तासां कान्त इव रमते । कान्त इव ताः अभिसर्पति।

## नद्यः।

सिन्धुनद्याः स्तुतये एकं सूक्तम्, विपाश्-शुतुद्र्योः स्तुत्यर्थमपरं सूक्तं च दृश्यते। नदीषु सर्वप्राधान्यं सरस्वत्याः, यस्याः स्तुत्यर्थं त्रीणि अखण्डानि सूक्तानि, विप्रकीर्णाः बह्वय ऋचश्च प्रवृत्तानि । मातृषु नदीषु देवतासु च इयं उत्तमेति स्तुतिः क्रियते । धनानि समृद्धिं पुष्टिमपत्यं च इयं ददाति। कश्चिदृषिः अस्यास्तीरात् नाहमन्यत्र नीतो भवेयमिति प्रार्थयते । दिवः पर्वतोत्तमाच्च यज्ञदेशं प्रति आगन्तव्यमिति तां प्रति प्रार्थना क्रियते। यत्पश्चात् गङ्गायाः द्युलोकादवतरणं प्रसिद्धं तदितस्समुत्थानं भवितुमर्हतीति मन्यन्ते । ऋक्संहितायां यद्यपि नदीमात्ररूपा इयं सरस्वती वर्तते अथाऽपि ब्राह्मणेषु वागधिष्ठात्री देवता इयमिति प्रसिद्धाऽभूत्। ततःपरं सर्वविद्याधिदेवतेति ब्रह्मपत्नीति च। इत्यन्तरिक्षदेवताः।

## अथ पृथिवीदेवताः।

पृथिवी। पृथिव्याः प्रायः दिवा सहैव स्तुतिः । ऋक्त्रयमात्रवति अत्यल्पे एकस्मिन् सूक्ते इयं पृथक्स्तुता। तत्राऽपि दिवःस्मरणं न परित्यज्यते।

# अग्निः । 2-3

पार्थिवेषु देवेष्वयं प्रधानतमः । सूक्तसंख्यानुरोधेन इन्द्रादनन्तरप्राधान्यं अग्नेरिति प्रागेवोक्तम् । ज्वलनात्मकस्यास्य प्रत्यक्षदृष्टत्वात् एतदीयशरीरावयवकल्पना दृश्यमानरूपविनिर्मुक्ता प्रायो न भवति । घृतकेशः घृतास्यः घृतपृष्ठः ज्वालाकेशः इत्येवमयं विशेष्यते । हिरण्मयाः तीक्ष्णाः प्रकाशवन्तः अस्य दन्ताः । ते च आयसाः । तदीयजिह्वा असकृत्कीर्त्यते । सप्त अस्य जिह्वा इत्यप्युच्यते । यज्ञदेशात् देवेभ्यः हव्यवहनाय युज्यमानः अश्वः अयमिति रूपणाऽपि भवति । तथा पक्षीति । तीक्ष्णैर्दन्तैः अरण्यमयं भक्षयति । विद्युदिव सूर्य इव उषा इव अयं प्रकाशते । तथाऽपि तस्य वर्त्म कृष्णं भवति । वायुना प्रेरितोऽयं अरण्यमनुप्रविशति । पृथिव्याः केशान् वापयति, यथा नापितः श्मश्रु । अस्य ज्वालाः समुद्रतरङ्गकल्पा गर्जन्ति । अरण्यानि अभियुञ्जानः अयमुक्षेव नर्दति । अस्य स्फुलिङ्गोत्थानध्वनिभ्यः पक्षिणो बिभ्यति । धूमोऽस्य केतुः । यदरणिभ्यः अग्निरुत्पाद्यते तत्र स्वप्रतिभां व्यापारयन्तः ऋषयः बहुधा वर्णनां कुर्वन्ति । अरणी अस्य पितरौ । जातमात्रः शिशुरप्ययं स्प्रष्टुमशक्यः । जातमात्रोऽयं पितरौ हिनस्ति । दश कन्याः इमं जनयन्ति । अत्र अङ्गुलयः अभिप्रेताः । यदरणिमथने बहु बलमपेक्ष्यते तस्मात् सहसः पुत्र इत्ययमभिधीयते । प्रत्यूष एव अस्य प्रज्वलनात् उषर्बुध इत्याख्या । एवमहन्यहनि जायमानत्वात् देवेष्वयं कनिष्ठः । अथाऽपि प्रथमयज्ञस्य एतत्कर्तृकत्वात् पुराणतमः । एवं युवेति पुराण इति च विरोधाभासेनायं स्तूयते । अयमग्निरप्सु जायत इति प्रागुक्तम् । तथा दिवस्सकाशादानीत इति । एवं दिवि अन्तरिक्षे पृथिव्यां च जायमानत्वात् त्रिस्थानोऽयम् । पश्चात् त्रिमूर्तिप्रसिद्धेः अत्र उपक्रम इति मन्यन्ते । यदयं बहुभिः स्वस्वगृहेषु समिध्यते तस्मादपि अस्य जन्मानि बहूनि । एवं बहुरूपत्वेऽपि एक एवायमिति ऋषयः प्रतिपादयन्ति । रूपाणि बहूनि परिगृह्णाति । बहूनि नामानि भजते । अथाऽपि तु सर्वान् देवानयमभिव्याप्नोति । यथा नेमिः अराणि । एवं रूपेषु बहुषु सत्सु यदैक्यमत्र प्रतिपाद्यते तत् आत्मैक्यवादस्य बीजस्थानीयमिति मन्यन्ते । मर्त्यानां गृहे अमृतोऽयं दीप्यते । अतिथिरित्यपि असकृदभिधीयते । गृहपतिरित्यपि । देवेभ्यो हविषो वहनाद् दूत इति । देवानां यज्ञदेशं प्रति

आनयनात् होतेति । स्वाराधकानां योगक्षेमं अयं निर्वहति । तेषां शत्रून् शुष्कमिव तृणं दहति । धनानामयं निधिः । यथैवं योगक्षेमपरिकल्पनं तथा भूताद्यपसर्पणमपि अग्नेः कार्यम् । 'रक्षोहा' इति ऋषयः अग्निं विशिंषन्ति ।

---

# वैदिका विशेषाः ॥

(Vidyalankara V. R. Srinivasa Tatacharya Siromani)

---

## 1 यागे रजतं न देयम् ।

तैत्तिरीयसंहितायाः प्रथमकाण्डे पञ्चमप्रपाठके प्रथमानुवाके 'देवासुराः' इत्यादिके 'बर्हिषि न देयम्' इत्यन्ते वेदस्य भागे 'देवासुराः' इत्यादिना 'रुदन्ति' इत्यन्तेन निन्दार्थवादेन रजतनिन्दाद्वारा विधेयभूतस्याध्वरे रजतदाननिषेधस्य प्राशस्त्यमेवं प्रतिपाद्यते— 'देवासुरा युद्धसन्नद्धा आसन् । ते देवा विजयं प्राप्नुवन्तस्सन्तो यदि कथञ्चिदसुरा अस्मान् जेष्यन्ति तदाऽस्माकमेतद्धनमापद्युपयोक्ष्यत इति मत्वा असुरेभ्योऽपहृतं मणिमुक्तादिकं श्रेष्ठं धनं रक्षणायाग्नौ न्यक्षिपन् । अग्निस्तद्धनं नितरामकामयत । स, धनेन सह देवेभ्योऽपाक्रामत् । देवा असुरान् विजित्य धनं जिघृक्षन्तस्तमन्वसरन् । ते तस्य धनं सहसाऽऽदातुमैच्छन् । सोऽरोदीत् । स यस्मादरोदीत् तस्मात् रुद्रशब्दवाच्योऽभवत् । तस्य यदश्रु भूमावपतत् तत् रजतरूपं धनं पर्यणमत् । तस्माद्रजतरूपं धनं दक्षिणां नार्हति । तस्याश्रुजन्यत्वेन दक्षिणां प्रत्ययोग्यत्वाद्यस्तद्यज्ञे ददाति संवत्सरात्पुरैवास्य गृहे किञ्चिद्रोदननिमित्तं भवति । तस्मान्मखे तन्नवितरेत्' इति ।

## 2 प्राजापत्यशृङ्गशून्याजालम्भः ।

तैत्तिरीयसंहिताया द्वितीयकाण्डे प्रथमप्रपाठके प्रथमानुवाके 'प्रजापतिर्वा इदम्' इत्यादिः 'पशूनसृजत' इत्यन्तोऽर्थवादः 'यः प्रजाकामः' इत्यादिना 'प्रजनयति' इत्यन्तेन वेदभागेन विधास्यमानस्य प्राजापत्यशृङ्गरहिताजालम्भस्य प्राशस्त्यमित्थमाचष्टे— 'यदिदं प्रजापशुरूपं

जगदिदानीं दृश्यते तदिदं सृष्टेः पूर्वं प्रजापतिरेवासीत। नान्यत्किञ्चित्। स प्रजापतिः प्रजाः पशून् सृजेयमित्यकामयत। स प्रजापशुसृष्ट्यै स्वशरीराादुदरमध्यवर्तिनीं पटसदृशीं वपां छित्वोदहरत। तां वपामग्नौ प्राक्षिपच्च। दग्धाया वपायाश्शृङ्गरहितोऽजस्समभवत्। स तमजं स्वात्मरूपां देवतामुद्दिश्याऽऽलभत। स तत्कर्मसामर्थ्यात्प्रजाः पशूनसृजच्च' इति। अत्राभिहितो निन्दाप्रशंसार्थवादयोरुपयोगः चित्रमीमांसायां 'तत्रापि स्वेन स्वस्य सादृश्यस्य सदृशान्तरव्यवच्छेदे रुद्ररोदनवपोत्खननाद्यर्थवादेऽसदर्थस्य निन्दास्तुत्योरिव द्वारमात्रतया वर्ण्यमानत्वेन' इति ग्रन्थे दृष्टान्ततया प्रादर्श्यत।

## 3 ऋणत्रयापाकरणम्।

तैत्तिरीयसंहितायाष्षष्ठकाण्डे तृतीयप्रपाठके दशमानुवाके 'जायमानो वै' इत्यादिः 'तदवदानानामवदानत्वम्' इत्यन्तो वेदभागो हृदयाद्यवदानान्येवं प्रशंसति — 'जायमानो ब्राह्मणः ऋषिदेवपितृभ्यः क्रमेण वेदाभ्यासयज्ञप्रजारूपऋणवान् भवति। यः पुत्री यज्वा वेदाभ्यासाय गुरुगृहवासी च एष एवानृणो भवति। वेदाभ्यासादिभिरपाकर्तव्यं यदृणं तत् हृदयाद्यवदानैरेवापाकरोति। ऋणमवदयते* एभिरिति व्युत्पत्त्या हृदयाद्यवदानानि अवदानशब्देनव्यपदिश्यन्ते' इति। मनुः

ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत्।
अनपाकृत्य मोक्षं तु सेवमानो व्रजत्यधः॥

अधीत्य विधिवद्वेदान् पुत्रांश्चोत्पाद्य धर्मतः।
इष्ट्वा च शक्तितो यज्ञैर्मनो मोक्षे निवेशयेत्॥

इति श्लोकाभ्यां ऋणत्रयानपाकरणे प्रत्यवायमुक्त्वा त्रीणि ऋणानि प्रादर्शयत्। श्रीभाष्यकाराः पुरुषार्थाधिकरणे ऋणश्रुतिरविरक्तविषयैवेत्यभाषन्त।

## 4 स्त्रीपुंसयोर्विवाहे विशेषः।

तैत्तिरीयसंहितायाष्षष्ठकाण्डे पञ्चमप्रपाठके प्रथमानुवाके 'तस्मादेको बह्वीर्जाया विन्दते' इति वाक्यं सायणभाष्ये 'एको मुख्यस्स्वतन्त्रः पुरुषः परतन्त्रा बह्वीर्जाया लभते' इति व्याख्यायत। तत्रैव काण्डे षष्ठप्रपाठके चतुर्थेऽनुवाके 'यदेकस्मिन् यूपे द्वे रशने परिव्ययति तस्मादेको

---

* अवदयते-अवद्यति।

द्वे जाये विन्दते यन्नैकाᳶरशनां द्वयोर्यूपयोः परिव्ययति तस्मान्नैकाद्वौपती विन्दते' इति वाक्यानां कस्मिंश्चित् सायणभाष्यपुस्तके 'लौकिकदृष्टान्तेन एकस्मिन्नग्निष्ठे रशनाद्वयवेष्टनं अग्निष्ठद्वये एकरशनावेष्टननिषेधद्वारा पुरुषस्य विवाहद्वयविधिः स्त्रिया विवाहद्वयनिषेधश्च विदधत् एकस्मिन्यूपे रशनाद्वयं विधत्ते' इत्यवतारिका दृश्यते। तत्पुस्तकान्तरे तु तेषां 'लौकिकदृष्टान्तेन रशनाद्वयं विधत्ते' इत्येवावतारिकोपलभ्यते। इमे श्रुती अपि स्मृत्यादिसम्मतस्याद्ययावत्क्रियमाणस्य पुंसोऽनेकविवाहस्य स्त्रिया एकविवाहस्य च प्रमाणम्।

## 5 प्रपन्नस्य तद्विरोधिनेऽप्रदानम्।

तैत्तिरीयसंहितायाष्षष्ठकाण्डे पञ्चमप्रपाठके षष्ठानुवाके 'देवा वै यज्ञात्' इत्यादिः 'न प्रतिप्रयच्छन्ति' इत्यन्तो वेदभागः सोमरसग्रहणायाऽऽदित्यग्रहस्यादानं निरूपयितुमेवमाख्यायिकामाह— 'देवा यज्ञं कुर्वन्तस्तस्मिन् यज्ञे रुद्रं व्यस्मरन्। स रुद्र आदित्याननुप्राप्याबाधत। तेन बाधिता आदित्या ऐन्द्रवायवादिग्रहान् शरणं प्रापद्यन्त। ते ग्रहास्तानादित्यान् रुद्राय न प्रतिप्रायच्छन्। तस्माल्लोके परैर्वध्योऽपि चोरादिर्यदि शरणं प्राप्नुयात् तदा तं परेभ्यो नैव प्रत्यर्पयन्ति' इति। तत्रैवाष्टमेऽनुवाके 'देवा वै त्वष्टारम्' इत्यादिः 'त्वष्ट्रेऽपि गृह्यते' इत्यन्तो वेदभागः 'अग्ना इ पत्नीवास्सजूर्देवेन त्वष्ट्रा सोमं पिबस्वाहा' इत्यस्मिन् पात्नीवतग्रहस्य होममन्त्रे त्वष्टुः परामर्शो न युक्त इति शङ्कामेवं वारयति— 'देवास्त्वष्टारमजिघाᳬसन्। स त्वष्टा पत्नीः प्रापद्यत। ताः पत्न्यस्तं देवेभ्यो न प्रतिव्यतरन्। तस्माल्लोके वध्यमपि चोरादिकं प्रपन्नं न प्रतिविश्राणयन्ति। यस्मात्पत्नीश्शरणङ्गतस्तस्मात् त्वष्टा पत्नीरनुभागीभवति' इति। अत्र 'तस्मादपि वध्यं प्रपन्नं न प्रतिप्रयच्छन्ति' इति श्रुतिः वात्स्यवरदार्यमहागुरुप्रणीते प्रपन्नपारिजाते प्रमाणपद्धतौ

'अपि वध्यं प्रपन्नं न प्रयच्छन्त्येवमादिकाः। बह्व्यश्श्रुतयो मानम्' इत्यत्र प्रपत्तिप्रमाणतयोपादीयत।

## 6 स्त्रियो दायविभागानर्हाः।

तैत्तिरीयसंहितायाष्षष्ठकाण्डे पञ्चमप्रपाठकेऽष्टमानुवाके 'स सोमो नातिष्ठत' इत्यादिः 'वशे कृत्वा गृह्णाति' इत्यन्तो वेदस्य भागः पात्नीवत

ग्रहे घृतमेळनमेवं विधत्ते– 'स सोमः पत्नीरूपाभ्यो देवताभ्यो गृह्यमाणः स्त्रीदेवताकत्वमसहमानः स्वात्मानं न प्राकाशयत् । देवाः तं सोमं घृतं वज्रायुधं कृत्वाऽताडयन् । ताडनेन निर्वीर्यं जातं तमगृह्णंश्च । यस्मात् स्त्रीदेवताभ्यो गृह्यमाणस्सोमो निस्सामर्थ्यः तस्मात् लोके स्त्रियस्सामर्थ्य-रहिता अपत्येषु दायभाजो न भवन्ति । लोकाः पतितात् पुंसोऽपि स्त्री-स्वरूपं क्षीणतरं वदन्ति । घृतेन पात्नीवतं मेळयतीति यत् तत् एतस्य पात्नीवतस्य वज्रेणैव वशे कृत्वा ग्रहणम्' इति । इयं श्रुतिरपि अद्ययावत् विद्यमानस्य स्मृत्यादिसिद्धस्य दुहितृभ्यो दायाविभागस्य मूलं भवति ।

---

# यथाभिमतम् ॥ III.4

4 प्रेक्षणकम् । वन एव प्रदेशान्तरम् । कुटीरस्य पुरस्तात् ।

प्रविशतः रोसलिन्द् सिलिआ च ।

रोसलिन्द्– मां प्रति किमपि न भाषस्व । अहं रोदिष्यामि ।

सिलिआ– कुरु, प्रसीद । अपि तु इदं तावद् दयया चिन्तय– किं पुरुषस्य अश्रुमोक्षो युक्त इति ।

रोसलिन्द्– अथापि किं मे रोदितुं कारणं नास्ति ?

सिलिआ– यावत् काचिदिच्छेत् तावदस्ति । रुदिहि ।

रोसलिन्द्– तदीयस्य केशपाशस्य यो वर्णः स एव तावत् व्यामोह-कारी ।

सिलिआ– *जुडास्-अस्य यः ततः किञ्चिद् गौरतरः । अये तस्य चुम्बितानि जुडास्-अस्य साक्षादपत्यानि ।

रोसलिन्द्– परमार्थतः तस्य केशः रुचिरवर्णः ।

सिलिआ– उत्तमवर्णः । यस्तवाभिमतः स एको वर्णः ।

रोसलिन्द्– अथ तस्य चुम्बितं तथा पावनं यथा हविषोऽपूपस्य (holy bread) स्पर्शः ।

---

* मतविशेषावलम्बिनां कूटस्थोऽयम् । अत्यन्तपूज्यं तं उपमानकोटौ प्रवेश्य किमपि किमपि वदन्ती सिलिआ रोसलिन्द्-इमामुपहसति ।

सिलिआ— †डआना-अस्या अभिजातं ओष्ठद्वयं अयं लब्धवान्। वर्षाकालकन्यामठश्रमणी न तथा परिपूतं चुम्बति यथा अयम्। ब्रह्मचर्यस्य परमं शैत्यं अस्य चुम्बितेष्वस्ति।

रोसलिन्द्—स कथं 'अद्य प्रातरागमिष्यामि' इति प्रतिज्ञामकरोत्। न चागच्छति।

सिलिआ— न। नूनं तस्मिन् सत्यं नास्ति।

रोसलिन्द्— किं त्वं तथा मन्यसे ?

सिलिआ— आम्। इयं मे मतिः— न स पणभस्त्राहरः, न अश्वचोरः। अनुरागविषये तु पिहितमुखं पात्रमिव, क्रिमिभुक्तोदरं फलबीजमिव रिक्तः सः।

रोसलिन्द्— अनुरागविषये सः असत्यः ?*

सिलिआ— आम्, अनुरागस्तस्य यदि स्यात्। न तु सोऽनुरक्तः।

रोसलिन्द्— अनुरक्तोऽस्मीति ऊर्जितां प्रतिज्ञां कुर्वन्तं तं त्वमश्रृणोः।

सिलिआ— स भूतः कालः, न वर्तमानः। किञ्च कामिनो वचः शौण्डिकस्येव न स्थिरम्। उभाविमौ मिथ्याव्यवहाराभिषङ्गिणौ। सोऽस्मिन् वने तव पितुः राज्ञः सेवकः।

रोसलिन्द्— ह्यः राजानमहमपश्यम्। बहु च सम्भाषणमकरवम्। को मे अभिजन इति स मामपृच्छत्। 'यादृशस्तव तादृशो मम' इत्यहमवोचम्। ततः स हसित्वा मां व्यसृजत्। अथ किं नामास्माकं पितॄन् प्रति भाषणेन, आर्लण्डो अस्मिन् महापुरुषे वर्तमाने।

सिलिआ— अये, स उदारः पुरुषः। उदाराणि पद्यानि लिखति। उदारा वाचो वक्ति। उदाराः प्रतिज्ञाः करोति। उदारं च ता भञ्जयति कान्ताया हृदये तिरश्चीनम्; यथा कश्चिदकृतहस्तोऽश्वसादी अश्वं एकस्मिन् पार्श्वे तुदन् निजमायुधं (दण्डं) जडवद् दुष्प्रयुञ्जीत तथा। किन्तु तत् सर्वमुदारं यद् यौवनं कारयति, जाड्यं व्यवस्थापयति। कः पुनरयमागच्छति ?

---

† डआना इति काचित् कन्या मृगयादेवतेति वदन्ति।

* "मयि सः अनुरक्तः। मयि सः असत्यः" इति किं त्वं मन्यसे ? इति रोसलिन्द् पृच्छति। त्वय्यनुराग एव तस्य नास्तीत्यहं वदामीति सिलिआ प्रतिवक्ति।

कारिन् प्रविशति ।

कारिन्— स्वामिनि, स्वामिन्, असकृद् भवत्यौ अनुयोगमकुरुतां तं कामपीडितं अजपालं प्रति, यं शाद्वले मम समीपे उपविश्य इमां जुगुसाशीलां अजपालां स्वकान्तां स्तुवन्तं भवत्यौ अपश्यताम् ।

सिलिआ— साधु । किं तस्य ।

कारिन्— अस्ति किञ्चिद् दृश्यं सम्यगभिनीयमानं, यत् एकतः अकृत्रिमेण उद्रिक्तेन कामेन अपरतः दर्पावज्ञाभूयिष्ठेन तीव्रेण तिरस्कारेण च प्रवर्तते । यदि वां दिदृक्षा इतो मनाक् गच्छतम् । अहं वां नेष्यामि, यदि तदवलोकयिष्यथ ।

रोसलिन्द्— अये, एहि गच्छेव । कामिनां दर्शनं कामयमानान् आप्याययति । नयास्मान् यत्र तत्पश्येम । त्वं वक्ष्यसि यथाऽहं तयोर्नाटके बहु व्यापृतं पात्रं भवामीति ।

# वृद्धभाषितम् ॥ (2)

रामः— सत्यम्, अधिकारे स्थिताः शक्यं सर्वं कुर्वन्ति । को नेत्याह । न बुद्धौ तेषां मन्दता ; न प्रयासेऽल्पता । किन्तु फलं शून्यम् । तन्मां बाधते ।

कृष्णः— तत्र कः किं करोतु ? प्रवृत्तिः पुरुषायत्ता । फलं दैवायत्तम् । स्वतन्त्रं दैवं चेत् विसंवदति, स्वोचितां प्रवृत्तिं कुर्वति पुरुषे का वाच्यता ?

रामः— दैवप्रस्तावं कृतवानसि । अस्मज्जीवने दैवस्यापि अस्ति कश्चिद् व्यापार इति नूनं त्वं मन्यसे ।

कृष्णः— कः संशयः ? सुदृढमहं तथा मन्ये ।

रामः— राज्याधिकारे स्थिताः प्रायो दैवं न गणयन्ति । सर्वथा ते तद् विस्मृतवन्तः ।

कृष्णः— भवतु ; किं तेन ?

रामः— अये, विचित्रं भाषसे। यदि अस्मत्सुखजीवने दैवं हेतुः तर्हि सर्वदा अस्माभिः स्मर्तव्यम्। विशेषतश्च लोकक्षेमविधानप्रवणैः राज्यपालकैः। तेन जीवनम्, तदेव विस्मृतमिति कथमेतद्युज्यते?

कृष्णः— अस्मत्स्मरणेन तस्य किं जायते? विस्मरणेन किं हीयते? स्मरन्तु वा तत् इमे मनुष्याः, विस्मरन्तु वा। नित्यं हि तत्; परिपूर्णं च; अस्मदीयेन कर्मणा तस्य कर्तव्यं न किञ्चिदस्ति।

रामः— दैवस्मरणं सर्वथाऽस्माकमनपेक्षितमिति तव सिद्धान्त इति पर्यवस्यति।

कृष्णः— तथा नाम। किमतः?

रामः— अद्य मनुष्यप्रयत्ने परिपूर्णेऽपि दैवानुकूल्यविरहात् प्रजाः क्लिश्यन्त इत्यवादीः?

कृष्णः— आम्, अवादिषम्।

राम— दैवं, मन्ये, दयालु।

कृष्णः— कः सन्देहः? परमदयालु।

रामः— किमिति तर्हि अद्य अनुग्रहं न करोति, अत्यन्तमस्मान् क्लेशयति?

कृष्णः— (किञ्चित् सम्भ्रान्तः) महानेष प्रश्नः। वृद्धाः प्रष्टव्याः।

रामः— दैवं ये कदाचिदपि न स्मरन्ति, सर्वथा विस्मरन्ति, तेषां तेन न कापि हानिरिति च त्वं मन्यसे?

कृष्णः— आम्।

रामः— ये दैवमस्तीति मन्यन्ते ते आस्तिकाः। ये नास्तीति, ते नास्तिकाः। आस्तिकानां नास्तिकानां च नास्ति कश्चन विशेष इति त्वया अङ्गीकृतं भवति।

कृष्णः— अये राम, व्यवहारस्थले वागाजीवाः साक्षिणमिव किमपि किमपि पृष्ट्वा मां परितो रुणत्सि। महान्त इमे प्रश्नाः। अभिज्ञानुपसृत्य पृच्छेम। नाहं वेदान्तविद्यानिपुणः।

रामः— अस्माकमिदानीं चिन्ता न वेदान्तविद्यां प्रति। अपि तु प्रजानां सङ्कटपरिहारं प्रति। 'तदुपयोगितया यत् किमपि अस्माभिः कर्तुं शक्यं न वा? तूष्णीं स्थातुं हि न शक्यते' इत्यालोचयितुमद्य प्रवृत्ताः स्मः।

कृष्णः— सत्यमेवम्। तत्र न किञ्चिदस्मद्बुद्धौ विशदं भाति। ये विषयज्ञाः तैरेवास्माकं बुद्धेः प्रसादो जननीयः। तानुपेत्य प्रार्थयेवहि।

रामः— के ते वृद्धाः, ये एतदर्थं अस्माभिरुपसर्पणीयाः ?

कृष्णः— अयमपि नूनं महान् प्रश्नः। अस्य प्रबलस्य सन्देहस्य परिहारं कर्तुं समर्थाः के कुत्र सन्ति, इति प्रथमतोऽस्माभिरुपलम्भः कार्यः। ये राज्यतन्त्रनिर्वाहिणः त एवात्र सर्वेषामस्माकं वृद्धाः, कर्तव्येषु विषयेषु उपदेष्टारः। तानेवोपसृत्य विषयं प्रस्तुयाम।

रामः— समीचीनं तावत् कर्म कर्तुं निरचैषीः। राज्यनिर्वाहे स्थितानां स्थितिं त्वं न जानासीव। प्रत्येकं अतिमहान्ति असङ्ख्येयानि कार्याणि प्रत्युपस्थितनि भवन्ति। तेषां यथार्हं अवलोकनाय अवधारणाय कालो न पर्याप्नोति। तेन सर्वेण सहसा गत्वा द्रष्टुं ते न शक्यन्ते। कथंचिद्दर्शनेऽपि द्वित्रनिमेषाधिकं कालं अस्मदर्थे विनियोक्तुं न पारयेयुः। यद्युष्माकं विवक्षितं तत् सर्वं पत्रिकारूढं कृत्वा प्रेष्यताम्। पर्यालोच्य कर्तव्यं करिष्याम" इति वदिष्यन्ति। पत्रिकाप्रेषणे यद् भवति तज्जानीमः। कूपे क्षिप्ता शिलैव सा।

अन्यच्च त्वमालोचयितुमर्हसि। प्रजानां सर्वसङ्कटपरिहाराय क्षेमसम्पत्तये च यत् कर्तव्यतया ते निश्चिन्वन्ति तत् ते स्वयं कुर्वन्ति अन्यान् कारायन्ति च। अभिनवमन्यत् किं नाम ते उपदेक्ष्यन्ति ?

कृष्णः— सत्यमेतद् यद्भवानाह। अनालोच्यैवाहं तदुपगमनं प्रास्तौषम्। अन्ये हि बहवः सन्ति बुद्धिमन्तः, विविधासु विद्यासु अधीतिनः, लोकविदः, तानुपेत्य पृच्छेम, सम्मन्त्रयेम।

रामः— साधु भाषसे। किन्तु किञ्चिदेतच्चिन्तय। ये पाश्चात्यप्रक्रियया विद्यामधिगतवन्तः ते प्रायस्सर्वे मन्त्रिप्रभृतिभिः राज्याधिकारिभिः समानाः। अद्य वर्तमानानधिकं किमपि वक्तुं ते न पारयन्तीति मम प्रत्ययः। अथ येऽस्मद्देशविद्यासु कृतपरिश्रमाः ते तपस्विनः समुचित-जीविकाविरहेण बहु क्लिश्यमानाः कथमपि कालं क्षिपन्ति। लोक-चिन्तां कर्तुं ते अवसरं न लभन्ते।

कृष्णः—आं, राम। तद्व्यस्माऽर्म। सन्ति हि आचार्यकं कुर्वाणा महा-जनाः शास्त्रज्ञाः गुणसमृद्धाः वैराग्यनिधयः लोकहितप्रवणाः। तानु-पयाम, प्रार्थयेमहि, उपदेशं लभेमहि।

रामः— युक्तमुक्तं भवता। किन्तु तेषां स्थितिं शृणु। तेषां मानसी व्यथा सम्प्रत्यपारा। किमपि वाचा वक्तुं ते नेच्छन्ति। स्वस्थानोचितं यदवश्यं कर्तव्यं अपरिहार्यतया तत्कुर्वन्ति। सर्वदा तु अन्तरात्मनि भगवन्तं प्रति प्रार्थनां कुर्वन्ति— "दयानिधे भगवन्, झटित्यस्मान्

त्वच्चरणारविन्दपरिसरं प्रापय। उत्तरोत्तराभिवृद्धिदारुणे पापिनि कलौ न शक्नुमोऽस्थिरमिह भूलोकेऽवस्थातुम्" इति।

कृष्णः— कुत एतत्?

रामः— नाहं तत् सर्वं विवृत्य वक्तुं शक्नोमि। वर्तमानां लोकस्थितिं प्रति ते सर्वथा अतृप्ता इति परं जानामि। परिष्कारं तु सर्वथा अशक्यं मन्यन्ते। तेन आत्मन एव जीवनकालस्य ह्रासं प्रार्थयन्ते।

कृष्णः— राम, किन्नु ते न भाति, इम एव आचार्याः सम्प्रति अस्मान् सङ्कटात् मोचयितुं क्षमा इति। तानुपेत्य सनिर्बन्धं प्रार्थयेमहि।

रामः— सम्यग् भाति। न पुनस्ते अस्माकं सुलभाः। तत्सन्निधिं गच्छतोऽस्मान् ते नानुमंस्यन्ते। का प्रसक्तिः प्रार्थनस्य वा उपदेशलाभस्य वा?

कृष्णः— अये, कथमेतत्। लोकानुग्रहाय आचार्यकं कुर्वन्तः सर्वे नूनं मृदुहृदयाः। अत्रेऽपि अतिनीचेऽपि जने अनुकम्पां कुर्वन्ति। एवं सर्वे वदन्ति। त्वं तु विपरीतं भाषसे। तत्त्ववेदने प्रवृत्तिमकुर्वन् स्वयमेव कञ्चिद् दुरभिप्रायं तेषां विषये वहसीति भाति।

रामः—न तथा कृष्ण। नाहं तेषां विषये कञ्चिद् दुरभिप्रायं वहामि। न तेषु यं कमपि दोषमारोपयितुं प्रकाशयितुं इच्छामि। परं तु वस्तुतत्त्वं ब्रवीमि—तेषां सन्निधिं गन्तुमस्माकमनुमतिर्नास्तीति।

कृष्णः— कस्मात्?

रामः— किं अपूर्वं पृच्छसि कस्मादिति। कथं तव शिरो वर्तते? कथं मम?

कृष्णः— अरे तात! अयं नु प्रमादः? केशो यादृशतादृशोऽस्तु। तेनापेक्षितोपदेशदानस्य किमायातम्?

रामः— केशकर्तनमेकम्। अपरं वस्त्रधारणम्। निर्वृत्तविवाहा वयम्। वासः कथं धारयामः। अकच्छम्; परिवीतम्। एवमादि बहु। 'सर्वमिदमेवमस्तु। एतत् प्रति का तेषां चिन्ता? आगतानागतान् परिगृह्य अपेक्षितमुपदेशं कुतस्ते न कुर्वन्ती'ति त्वं पृच्छसि। आचारव्यवस्थापकं शास्त्रमस्ति। तद्विरुद्धमिदं सर्वं यद् वयमाचरामः। यथाशास्त्रं सर्वमनुतिष्ठन्तस्ते कथमुपेक्षितशास्त्रान् स्वच्छन्दवर्तिनोऽस्मान् स्वसविधगमनाय अनुमन्येरन्? 'यस्य आचारो नास्ति तस्योपदेशो न कर्तव्यः। कुतो विफलं विपरीतफलश्चे'ति ते वदन्ति।

कृष्णः – लोकसङ्कटस्य कथं परिहारः । तदर्थं किमस्माभिः कर्तव्यमिति चिन्तयन् त्वं आर्तोऽसि, ताम्यसि । अस्मत्सम्बन्धिन एव प्रश्नाः सम्प्रति महत्तमा भान्ति । एकतस्ते शास्त्रज्ञाः आचारशीला प्राचीनधर्मसम्प्रदायानुवर्तिनः अस्मत्संसर्गं परिहरन्तः किमपि कुर्वन्त आसते । अपरतो वयं तद्विपरीतं कामचारवादनिरताः प्राचीनक्रमे अत्यन्तमश्रद्धालवो वर्तामहे । तैः परिपाल्यमाना नियमाः यद्यपेक्षिताः उपयुक्ताः तर्हि अस्माभिरपि ते अनुष्ठेयाः, आदर्तव्याः । अन्यथा तैरपि ते परित्यक्तव्याः । कुतोऽयं 'ते अन्ये, वयमन्ये' इति भेदः । तेषामुपगमनादपि त्वं बिभेषि । सर्वे वयं मनुष्याः । अस्मिन् देशे समाने कुले जाताः । तथा सति कथमयं भेद आपतितः ? कथमस्य परिहारः ? इत्यपि हि चिन्तनीयम् ।

रामः— उत्तरोत्तरं निपुणं, विषयेषु प्रविश्य च भाषसे । सत्यमिदमपि सर्वं विचार्यम् । स्वयं विचारे निर्णये च वयमशक्ताः । अभिज्ञानामाचार्याणां सेवा दुर्लभा । किं क्रियताम् ।

कृष्णः – पश्य राम, मम किञ्चिद् भाति । धैर्यमालम्ब्य तथा कुर्याम । आवश्यकं चेत् पुनः अस्मदभिमतानुसारेण वर्तिष्यामहे ।

रामः – किं तत् ? किं वदसि ?

कृष्णः— कृत्तकेशतामपनयेम । शिखां धारयेम । पञ्चकच्छं परिदधीमहि । उज्ज्वलं पुण्ड्रं धारयेम । अन्यदपि यत् किञ्चित् अस्माभिः कर्तव्यमादिशन्ति, तत् सर्वं अविशङ्कं सद्यः कृत्वा आचार्यानुपगच्छेम । सर्वान् सन्देहान् पृच्छेम । यदि तृप्तिकरं उपदिशन्ति कृतार्था भविष्यामः । अन्यथा पूर्वस्थितेर्न हानिः । इदं मे अद्य कर्तव्यं भाति । किं त्वं मन्यसे ?

रामः अये अतिमात्रं वैदिकोऽसि संवृत्तः । शिखां प्रति, वस्त्रं प्रति, पुण्ड्रं प्रति कतिकृत्वः कियन्नाम गृहवृद्धाः सनिर्बन्धं सक्रोधं सानुनयमवोचन् । सर्वं तद् वयमवधीरितवन्तः स्मः । अद्य एवं करणे ते विस्मिताः स्युः ।

कृष्णः— विस्मिताः सन्तु । को दोषः । मा स्म सङ्कोचं विन्दः । उद्दिष्टकार्यगौरवमनुसृत्य किमपि किमपि कर्तव्यं भवति । तत्र परे एवं मन्येरन् तथा मन्येरन् इति शङ्का नोचिता ।

रामः अस्तु कृष्ण, तथैव कुर्याम । अयमिदानीमावयोः सिद्धान्तः ।

# प्रकृतिभेदः ॥

पुत्रः— मातर्मातः, लेखो लेखः ।

गृहिणी— पितरि अर्पय । स वाचयित्वा वदिष्यति—केन लिखितं, किं लिखितमिति ।

पतिः— (आदाय वाचयन्) आगच्छति किल । सर्वा अपेक्षा पूरिता भविष्यति । न ततः परं किञ्चिदपेक्षणीयम् । .... ....

गृहिणी— को नाम आगमिष्यति ? किमर्थम् ?

पतिः— अन्यत् किमपि कार्यमेषां नास्ति । कुत्र गच्छेम, कं पीडयेम, इति सर्वदा परोपद्रवे दत्तदृष्टयः ....

गृहिणी—पृच्छामि खलु, क आगमिष्यति ? क इदं लिखितवान् ?

पतिः— किमयि, त्वमेकतः पीडयसि । यदाकदाचित् यत्रक्वापि धूमशकटे गच्छन् केनचित् कतिपयान् निमेषान् सम्भाषितवानासम् । तं परिचयमालम्ब्य अद्य लिखति 'भगवत्सेवायै परश्व आगमिष्यामि । नूतनं स्थलम् । परिचिता न सन्ति । भवद्गृहे स्थातुं संविधानं कार्यमिति । कालः कः ? तस्य तस्यैव हि कालयापनं दुष्करं भवति । तत्र वयमपि चेद् गच्छेम, तं भारं कथं ते बिभृयुः ? इति तावच्चिन्ता अल्पाऽप्येषां न भवति ।

गृहिणी— मा स्म तथा ब्रूत । अयं नु विषयः । अन्यो यः कोऽपीति मनितवत्यभूवम् । य आगच्छति स आगच्छतु । अस्मद्गृहे यदस्ति तद्भुङ्क्ताम् । कं धर्मं वयं कर्तुं शक्नुमः ? स्वयमेव भगवान् तेषां बुद्धिं प्रदाय अस्मद्गृहे वासयित्वा अस्माकं अल्पं पुण्यं सम्पन्नं करोति । क्षेत्रवासस्य परमं फलमिदं वदन्ति यद्भगवत्सेवार्थिनामल्पमुपकृत्य अयत्नसिद्धमहासुकृतैर्भूयत इति । अत्र सन्तोष्टव्ये को नाम विषादः । निश्चिन्ताः कर्तव्यं कुरुत ।

# पुस्तकपरामर्शः ॥

1) **प्रकृतिविलासः ।** महामहोपाध्याय पण्डितराज, के. एस्. कृष्णमूर्तिशास्त्रिणा, मद्रराज्य-आस्थानकविना विरचितः । मूल्यं द्वे रूप्ये ।

प्रकृतिसौन्दर्यवर्णनपरं काव्यमेतत् । अर्णववर्णनपरं सारस्वतसर्वस्वम्, काननकामनीयकम्, पर्वतपारम्यम्, समीरसमर्हणम्, त्रिपथगासौभाग्यम्, द्विजराजसाम्राज्यम्, प्रभाकरप्रभावः शर्वरीसौन्दर्यम्, इत्यष्टानां खण्डकाव्यानां समुच्चयोऽयम् । "नैसर्गिकी च प्रतिभा श्रुतं च बहु निर्मलम् । अमन्दश्चाभियोगोऽस्याः कारणं काव्यसम्पदः ।" इति काव्यनिष्पत्तौ सामग्रीमाह दण्डी । नैसर्गिकी प्रतिभेति जन्मान्तरवासनासमृद्धिमूलः प्रज्ञाविशेष उच्यते । श्रुतं विद्या । तद् बहु निर्मलं चापेक्षितम् । विद्यास्थानबाहुल्याद् बहुत्वम् । असन्दिग्धं निर्मलमित्येके व्याख्यातारः । सत्सम्प्रदायागतमित्यन्ये । अभियोगोऽभ्यासः । अत्र प्रत्येकं चकारं घटयन् दण्डी "एकैकस्यापि विरहे काव्यं न निष्पद्येत । निष्पन्नं वा निश्शोभं भवे"दिति ज्ञापयति । प्रकृतं प्रकृतिविलासं वाचयन्तो वयं अस्मिन् कवौ शास्त्रिणि लक्षणकारोक्तमिदं काव्यसम्पत्कारणं पुष्कलं सम्पन्नं पश्यन्तः प्रमोदामहे । संस्कारवन्ति पदानि, अयत्नसम्पन्नालङ्कारसम्भृतसौन्दर्या अर्थाः, कवेर्वर्ण्यमानार्थतन्मयीभवनाभिव्यञ्जकानि तत्तद्वस्तुवर्णनानि चात्रत्यानि सहृदयानां चेतसश्चमत्कारमभ्यधिकमावहन्ति । शब्दानामर्थानां च गुम्भनमत्र तथा प्रौढं परिपक्वं च यथा पद्यानि पठतां अतिप्राचीनमेव किमपि काव्यं पठाम इति मतिर्भवति । एतन्निदर्शनतया कांश्चन श्लोकानिहोदाहरामः—

पीयूषकल्पमकरन्दमिलद्रजांसि
नीहारसीकरकरम्बितकेसराणि ।
प्रत्यूषशीतपवनेरितपादपेभ्यः
पुष्पाणि वृन्तगलितान्यपतंस्तटिन्याम् ॥ १२ ॥

त्वत्कान्तिलेशमुपजीव्य निशि भ्रमद्भि-
श्चन्द्रादिभिर्दिगुपभुक्तचरी मघोनः।
पूतात्मनः किमुचिता विहृतिस्तयेति
प्रोद्यन्तमर्यमणमम्बुजिनी जहास ॥ १५ ॥

गीतिं मुदा मधुकरीषु वितन्वतीषु
हंसीषु पक्षपुटताडनतोऽप्सु तालान्।
तीरद्रुमेषु विकिरत्सु सुमान्यभीक्ष्णं
लक्ष्मीर्ननर्त सरसीरुहरङ्गधाम्नि ॥ १७ ॥

श्यामायितेऽपरिमितैस्तरुभिर्वनान्ते
निश्शेषमेष विनिहन्तुमिनप्रकाशः।
नैवाशकत् सततसन्तमसाधिकारं
मूर्खस्य चेतसि विमोहमिवोपदेशः ॥ १८ ॥

जम्बूफलानि गलितानि पचेलिमत्वा-
दातन्वताच्छसलिलान्यरुणच्छवीनि।
शैलेन्द्रकन्दरपथात् सरयं वहन्त्या
धुन्या निमज्जदिभराजविराजितायाः ॥

प्रक्रान्तचाटुवचनाः प्रणदद्द्विरेफैः
पुष्पोद्गमैश्च रुचिरैः कृतमन्दहासाः।
रक्तैर्भृशं किसलयैरनुरागपूर्णाः
पर्यष्वजन्त लतिकाः सहकारवृक्षान् ॥

प्रकृतिसौन्दर्यमनुभवितुं अनभावयितुं च प्रवृत्तोऽयं कविः, समुद्रं, तत्तीरस्थं काननं, तेन परिवृतं छन्नं च पर्वतं, तमारुह्य सेवनीयं पवनं, अस्य शीतिमप्रदां तत्र प्रवहन्तीं गङ्गां, तत्र प्रतिफलनादुपरि दृष्टं चन्द्रं अस्याप्यायकं अस्तमये उद्यन्तं च सूर्यं, एतदस्तमये प्रादुर्भवन्तीं शर्वरीं च क्रमेण वर्णयामासेति प्रतीमः। स्वस्य शास्त्रित्वं विशिष्य वैयाकरणतां च विस्मृत्य ललितमतीनामपि झटिति रसावहानि अपराण्यपि बहूनि सुकुमारतराणि खण्डकाव्यानि रचयन्नयं अस्मद्राजधान्यास्थानकविश्चिरं विजयतामित्याशंसामहे।

(सं)

Registered No. M 2300.

Book XXV ॥ श्रीः ॥ Nos. 5, 6, 7 & 8

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

ये संस्कृतप्रियाः सन्तस्तेषां सद्मानिसद्मानि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥

पु. २५] कलि | ५०५२ खर, ५०५३ नन्दन { मकर, कुम्भ, मीन, मेष } सं ५, ६, ७, ८

# THE UDYANA PATRIKA.

A

SANSKRIT MONTHLY

January, February, March & April 1952

For the rate of subscription please see inside

# UDYANA PATRIKA.

Annual Subscription Rs. Two only.
Do. With Sastraic Supplement Rs. 3—0—0

## उद्यानपत्रिका ॥

१. अस्या वार्षिकं मूल्यं द्वे रूप्ये । सानुबन्धायाः त्रीणि रूप्याणि ।
२. कन्यामासे साधारणसञ्चिका अनन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणसञ्चिकाः षट्सु मासेषु अनुबन्धसञ्चिकाश्च प्रकाश्यन्ते ।
३. ग्राहकीबुभूषद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम् ।
४. वर्षमध्ये ग्राहकीभवतामपि कन्यासञ्चिकादिरेव पत्रिका प्रेष्येत ।
५. एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन् । गद्यरूपेषु अधिकतर आदरः ।
६. प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसम्पादकाय प्रेषणीयाः ।
७. एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः । (संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण ।)
८. लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या ।

मुद्रणकारः— S. Vijayaraghavan,
*Proprietor,* The Srinivasa Press,
Thiruvaiyaru P. O., Tanjore Dt.

निर्वाहकसम्पादकः— *Mimamsarnava Mimamsakesari,*
*Panditaraja* D. T. Tatacharya Siromani, M. O. L.
Sri Venkateswara Oriental Institute
TIRUPATI.

## विषयाः ॥

1 मेनका ।
2 व्याजोक्तिरत्नावळी ।
3 प्रहर्षः ।
4 महाराजः ।
5 संस्कृतग्रन्थजातम् ।
6 वैदिका विशेषाः ।
7 यथाभिमतम् ।
8 वृद्धभाषितम् ।
9 तात्पर्यान्तरम् ।
10 प्रकृतिभेदः ।
11 पुस्तकपरामर्शः ।
12 प्रतिबोधनम् । (wrapper)

शासितरि पुरुषकारीभूय तमुद्योगं दापयति स्मेति, स विषयो गूढो रक्षणीय इति च मह्यावेदयत्। इदं त्वद्भर्तारे ज्ञापय।

अहमद्य प्रातः अन्यं कञ्चन विषयमश्रौषम्। सोऽपि ते अवश्यं ज्ञातव्यः। अस्मदापणे करण (लेखक) पदे स्थितः मद्भर्तुः दुर्मन्त्रिभूतः त्वद्विषये विप्रलम्भकारी च यः श्यामार्यः तत्सम्बन्धी व्यवहारः अवसितः किल ह्यः। स किल मिथ्या-पत्रसृष्टेः पुरुषान्तररूपग्रहणस्य च कृते पञ्चवर्षानुभाव्यं गुरुदण्डं प्राप। तदाकर्णनेन महान् क्लेशोऽजनि। नङ्क्ष्यन् नाशं चिन्त-यतीत्येतत् सम्पन्नम्।

"अपि च त्वद्विषये मद्विषये च प्रत्युपकारनिरपेक्षं बहु परिश्रम्य उपकृतवान् पालकप्रत्यवेक्षकः सन्निहिते काले 'पालकप्रधान'पदं लब्धवान्। तदीयानां सद्गुणानां दाक्ष्यस्य च सा पदवी न समुचितः सम्मानः। परन्तु अचिरात् ततोऽप्युन्नततरां पदवीं स प्राप्नुयादिति पिता मे ब्रवीति। त्वदीये लेखे त्वया कृतां प्रार्थनामनुरुध्य पिता मे इमं सञ्जीव्यार्यं नियुज्य त्वन्ननान्दरौ अन्वेषयामास। तदन्वेषणपरेण तेन अनवेक्षितं स्थानं न किञ्चिन्मद्रनगरे अस्ति। कुत्र ते स्त इत्येतन्नैव ज्ञायते। अव-मानासहतया किं ते कूपे तटाके वा निपत्य जीवितमजहीताम्? किं वा दूरदेशं गत्वा निलीने वसतः? न किमपि ज्ञायते। जन्मदुर्बद्धी तथाशीले एवाभवताम्। सर्वदा तादृशवृत्ते एव भवेताम्। परैः यावत्युपदेशे कृतेऽपि, महति प्रयासे सत्यपि, तयोर्मनो वा गुणो वा वृत्तं वा नैव विपर्येतीति लोकानुभवसिद्धं ह्येतत्। अपि च त्वं अतीव अनुकम्पावती। प्रत्यागते अपि त्वन्ननान्दरौ ईषदपि क्लेशयितुं ते मनो न भविष्यति। तदास्ताम्। तथा क्रूरयोस्तयोः युवाभ्यां सहावस्थापनमनुचितम्। तस्मात् तयोरदर्शनमेव अनुकूलमिति मे मतिः। यद्यद्भवति तत्सर्वं क्षेमायेत्येतन्न खलु मिथ्या।

अथ मम पतिः पुनरपि एवं योग्यः परिणमेतेति नाहं स्वप्नेऽपि मतिमकरवम्। ईश्वरस्य कृपया अहमिदानीं अतीव सन्तुष्टा

वर्ते । त्वां पुनरपि कदा द्रक्ष्यामीति एकमौत्सुक्यं मे मनो व्यथयति। तदनुगुणा ईश्वरकृपा कदा नु भवेत्, न ज्ञायते ।

अहमद्य प्रातः अस्मदीयां भिषजं तूर्णीं दृष्ट्वा त्वया प्रेषितं पारितोषिकं रूप्यसहस्रं समार्पिपम् । तत्रभवती तत् प्रतिग्रहीतुं नैव सम्मन्यते स्म । परं तु त्वद्विषये तया क्रियमाणं आन्तरं प्रेम किमिति कथयेयम् । आः, तां विना तव गतिः कथम्भूता स्यादिति चिन्तयन्त्याः अद्यापि मे मनः सम्भ्राम्यति । राजकीयवैद्यशालाया अन्तः मिथ्याधात्रीवेषं धारयित्वा तव अवस्थापनं नाम कियद् धृष्टमिदं कार्यम् ! तच्चेत् उपर्यधिकारिणां विदितं, तेषामुद्योग एव हि निवृत्तः स्यात् । अतिघोरायां विपदि तवावस्थितिं विचिन्त्य, आत्मनः सम्भावितं कष्टमगणयित्वा ते एवमत्यन्तधृष्टं कार्यमकुर्वन् । तथा दुष्करमहोपकारकारिणीं तामम्बां परं यावज्जीवमस्माभिः सकृतज्ञभावं स्मरन्तीभिर्भाव्यम् ।

मदीयं प्रेम आशां च अपहृतवति दुर्लभगुणे सोदरि, युष्मत्क्षेमः तदा तदा आवेदनीय इति असकृत् प्रार्थये । सर्वसाधनसम्पत् सर्वं मङ्गलं च ते भूयात् ।"

इति प्रियसोदरी

नूर्जहान्

——इत्येवं स्थितं लेखमनुवाच्य अवसायितवती मेनका वराहस्वामिनमैक्षत ।

आनन्दसागरे निमज्ज्योन्मग्नः सः महता प्रेम्णा तामालोक्य अरे रे, का प्रीतिः, कोऽनुरागः । जातिर्वा मतं वा अनुरागप्रवाहस्य किं नाम प्रतिघाति भवेत् ? सर्वेषु भूतेषु समामनुकम्पां वात्सल्यं च ये दर्शयन्ति, त एव दैवप्रायाः ; त एव बन्धवः ; त एव सुहृदः ; त एव मातापितृसहोदराः ; त एव परमार्थतो विवेकिनः । मया सह जाता सोदरी मयि महाक्रूरा परिणता । या काचन महम्मदकन्या मतान्तरस्थायां त्वयि अपारां प्रीतिं सोदरीवृत्तिं च करोतीति ननु पश्यसि । मम

सम्भूतां सोदरीमपेक्ष्य तव सम्भूता सोदर्येव निस्समा। अन्यमतस्थाऽपि दैववदभ्यर्हणीया। त्वं सदा भाग्यशालिन्येव।" इति महत्या मुदाऽभिधाय तामनवधिकेन प्रेम्णा आश्लिष्यति स्म। आनन्दपारवश्यं गता सा 'निस्संशयमहमदृष्टशालिन्येव। ईदृशं पुरुषोत्तमं यदहं नाथमविन्दं तदतिरिक्तं मम प्राप्यं किमन्यद्भाग्यमस्ति'? इत्युक्त्वा मनसि अमाता अनुरागेण वराहस्वामिनमालिङ्ग्य चुम्बित्वा सरससल्लापं कर्तुमारभत।

**इति संस्कृतीकृतं मेनकाभिधानं नवीनकम्।**

## BOOKS READY FOR SALE.

| | | |
|---|---|---|
| १ | कपीनामुपवासः । (A Short Poem) | 0—4—0 |
| २ | मुग्धाञ्जलिः । ,, | 0—4—0 |
| ३ | मीमांसापरिभाषा—परिष्कारः अक्षरार्थः इति व्याख्याद्वयसहिता । | 2—8—0 |
| ४ | अर्थसंग्रहः, तन्त्रप्रकाशिकाख्यव्याख्यानसहितः । | 1—8—0 |
| ५ | मीमांसाभ्युदयः, नवीनरीत्या मीमांसासम्बन्धिबहुविषयबोधकः । | 1—8—0 |
| ६ | भामहीय-काव्यालङ्कारः, उद्यानवृत्तिसमेतः । | 5—0—0 |
| ७ | ,, आङ्गलोपोद्घातानुबन्धवर्जितः । | 4—0—0 |
| ८ | काव्यादर्शः, व्याख्याचतुष्टयसहितः । | 5—4—0 |
| ९ | रामायणसारसंग्रहः, श्रीरामावतार-वनवास-राज्य-परिपालनादिकालनिर्णयपरो ग्रन्थः । | 0—12—0 |
| १० | उद्यानपत्रिका—२४ वर्षीयाणि २४ पुस्तकानि । | 24—0—0 |
| ११ | ऋषिहृदयम् । | 0—6—0 |
| १२ | संस्कृतशिक्षा । | 0—14—0 |
| १३ | श्रीवेङ्कटेशकाव्यकलापः । | 4—0—0 |
| १४ | रूपकपरिशुद्धिः । | 1—8—0 |
| १५ | कठोपनिषद्भाष्यं श्रीरङ्गरामानुजमुनिविरचितम् । टिप्पण्या आङ्गलानुवादेन च सहितम् । | 3—0—0 |
| १३ | प्रश्नोपनिषद्भाष्यम् । ,, | 2—12—0 |

*Apply to:*

The Proprietor,
Srinivasa Press, Thiruvaiyaru P. O.
Tanjore Dt.

33

abundant precaution you keep posited on your head the lord of the medicinal herbs. Oh Sambhu ! you have thus concocted a scheme for impressing fools with your glorious importance ! 101

अंहो, केर, कशाह्वयस्य तु तरोर्मूले कथं वर्धितुं
प्रत्यासज्जसि, कः प्रहृष्यति तरुश्छायाममुष्याश्रितः।
क्षुद्रो निष्फलपत्रपुष्पकिसलो यः प्रांशुताविस्मितः
शाखावीजनशीत्कृतेन रमयन् जम्बूकमुत्सिच्यते ॥ १०२ ॥

Listen, oh Kera ! (Cocoanut plant), I am surprised to find you earnestly striving to grow underneath the Casurina tree (bearing the name of the whip) ! Which tree can ever thrive happily having come under his shade ? Petty as he is and bankrupt of fruits, foliage, flowers and sprouts, he is fed up with his lofty stature and nourishes his self-conceit entertaining the jackal with the whizzing noise of his waving boughs. 102

[ Casurina tree = சவுக்குமரம் ]

सौभाग्यं तव ताम्रचूड, जगतो नाम्नैव विख्याप्यते
शक्यं किं चरणायुधस्य भवतः शौर्येऽपि विप्रेक्षितुम्।
त्वद्वाचा समुदेति भानुरिति चेन्नैवाद्भुतं शृण्वतः
प्रत्यक्षं बत कीटकुट्टनपटुः पांसूत्किरः कुक्कुटः ॥ १०३ ॥

Oh Tamrachuda ! (red-crested one!) your beauty is proclaimed to the world by your very name. As you are Charanayudha (one whose foot itself is a weapon) who can ever deny you the reputation of a warrior ? None will be struck with amazement to hear from a distance the assertion that by your word the Sun rises. But lo ! you are, when directly sighted, none but the cock scratching the dust on the road and busily picking up the worms. 103

ग्रीवायां ग्रसतो मिथो विलुठतः क्षोण्यां निपत्योत्थिता-
वन्योऽन्यस्य विकर्षतः श्रुतिपुटीं संदश्य दंष्ट्राङ्कुरैः।
धावं धावमुपेत्य च प्रहरतो बाढं श्वपोताविमौ
नैतन्नाम नियुद्धमेष तु तयोः प्रेमावतारक्रमः ॥ १०४ ॥

It is true that these two puppies grasp each-other's neck with the mouth, falling upon the ground roll together rising up bite and pull out each other's ear-flap with their buddingt eeth vigorously, and ever and anon running against each other resume the fight; but you will be mistaken if you think they are really fighting against each other; for, as a matter of fact, this is their way of demonstrating their mutual affection. 104

पिण्याकाम्बु मुहुर्द्विरह्नि सबुसः कार्पासबीजाञ्जलिः
शुष्कं वा तृणमार्द्रमिष्टविधया ग्रासग्रहश्चत्वरे।
इत्थं देवकुलर्षभ त्वमनिशं पीनो भवन् पोषणैः
कस्माद्वक्ष्यसि भारमन्यवदहो मोदस्व गोभिः समम् ॥ १०५॥

Water in which oil-cake is soaked is served to you as often as you desire. Twice a day you have your meal of a handful of cotton-seeds mixed with bran. And you can always help yourself to dry or green grass in plenty. Added to all this, you roam about at the road-crossings and grasp at anything as you have a taste for, without hindrance. In this manner, oh temple Bull! taking plentiful nourishment, you have grown fat. Ah! wherefore will you pull loads like any other of your kind? Yes, have a jolly time of it in the company of cows. 105

भित्तेर्मूर्ध्नि परिभ्रमन् विवलितग्रीवोद्भटः कुक्कट-
स्त्वामाह्वानविधेयमिच्छति दिनारम्भाय जातत्वरम् ।
नोदेष्यामि किलेति किं क्षणमपि स्थातुं क्षमं,मास्म भूः
क्रोधापाटलमण्डलो दिनमणे! दुर्दैवमेवंविधम् ॥ १०६ ॥

The Cock strutting about over the wall-top with its neck arrogantly cast aslant, calls upon you authoritatively to hasten to inaugurate the dawn. Oh, jewel of the day! (Sun!) have you the choice to make delay even for a minute saying 'All right, let me see. I shall not rise at your bidding?' No. And then, why shouid you grow red on the surface with anger? Such is ill-luck due to Providential dispensation 106

यस्तु क्षीरसमुद्र एव वसति स्वामी च तस्य स्वयं
स प्रत्यालयगव्यचौर्यनिरतो गोपालकैर्दण्डितः ।
किं ब्रूमो विपरीततां हतविधेरप्यप्सरोवल्लभः
शक्रस्तापसकामिनीमभिरतः शापादभूद्दुर्भगः ॥ १०७ ॥

He who had made the milky ocean itself bis home and owned it to boot, became addicted to the theft of milk, butter etc. in each and every home (of Gokula) and suffered chastisement by the cowherds. Ah! what shall we say about the mischievous pranks of damned Destiny? Even Indra the beloved overlord of the celestial nymphs, became enamoured of the wife of the hermit and brought about an abominable curse upon himself! 107

तुल्यं वर्षति वारिदः क्षितिधरे तोयालयेऽब्धौ मरौ
संहृत्याद्रिरपः प्रवर्तयति नः क्षेमाय शैवालिनीः ।

तोयैः संकलितैः सरांस्युपचरन्त्यभ्यागतानम्बुधिः
क्षारीकृत्य दधाति तान्यथ मरौ नामापि न श्रूयते ॥ १०८॥

The cloud pours down water with an even hand over the mountain, the lake, the ocean and the desert. The mountain collects all the water and sends forth streams to bestow prosperity on us. With the waters safely held in store the lakes entertain casual guests. The ocean makes the waters saline and strictly keeps guard over them. And lastly, in the desert, the very name of the waters is not heard. 108

खेलन्नुत्प्लवते युनक्त्यपि सरः स्वामीव सर्वं रट-
न्नुच्चैर्दर्दुरकस्तु वेत्ति न मनाक् पार्श्वे सरोजावलिम्।
नेत्रानन्दकरीं मरन्दभरितामामोदमेदस्विनीं
तां जानन्ति मधुव्रताः सुकृतिनः केचित्कुतोऽप्यागताः॥१०९॥

The frog sportively hops about and enjoys possession of the tank in full, lustily croaking, as if he were its lord. But he pays little attention to the group of lotuses blossoming by his side. The lotuses are delightful to look at; they are full of honey; they are replete with fragrance. It is only the blessed honey-suckers (bees) who are strangers and who come from somewhere, that know how adorable are the lotuses. 109

अस्यां प्रावृषि वर्षताऽपि विततं नैते वराका मया
क्षोदेनाप्यभितर्पिता यदि नभस्यागामिनि स्मर्यते।
इत्युच्चावचमाकलय्य मनसि प्रायेण यातं त्वया
हा जीमूत, न वेत्सि चातकगणानद्यैव विध्वंसिनः ॥११०॥

# उद्यानपत्रिका ॥ 3७

"अन्या वाचो विमुञ्चथ"

वेदापहारविक्रोशद्वेधःखेदविमर्दिनम्
पण्णातीरपरिष्कारं पारिजातमुपास्महे ॥

पु. २५] कलि ५०५२ खर ५०५३ नन्दन { मकर कुम्भ मीन मेष } सं ५, ६, ७, ८

## प्रहर्षः ॥

चिरकालात्परं अद्य अस्मद्राज्यस्थितिः किञ्चिदिव शोभना संवृत्तेति जनाः प्रहृष्यन्ति।

अभिनवा मन्त्रिसभा समागता। तदधिष्ठाता प्रधानमन्त्री बुद्धिमान्, वृद्धः, अत एव राजतन्त्रे चिरानुभवशाली, अतिसमर्थश्च। सर्वत्र सर्वविधक्षोभक्षुब्धे राज्ये उत्तरत्र किं किं नाम सङ्कटं भविष्यतीति चिन्तासन्तत्या नितान्तं तान्तैर्महाजनैः अयमेकः शरणमिति निश्चित्य सनिर्बन्धं प्रार्थितः अनुनीतश्चायं महापुरुषः शान्तिकामोऽपि पुनरपि दयया राज्यनिर्वाहभरं वोढुं सममन्यत। अनुपदं सर्वेषां जनानां चिन्ताज्वरः शाम्यति स्म।

अस्मिन् राज्यनिर्वाहनिपुणे प्रधानमन्त्रिणि अनन्यसाधारणं कञ्चन विशेषं पश्यामः। ईश्वर ईश्वर इत्यसकृद् भाषते। तत्सद्भावे जनानां प्रत्ययं वर्धयति। तदनुग्रहेण अस्मत्कुशलं लब्धव्यमुपदिशति। अपेक्षितवृष्टिपतनाय तस्मिन् प्रार्थनां कर्तुं जनानादिशति। 'तेन विना तृणमपि न चलती'ति प्रसिद्धानुभावे भगवति एवं दृढविश्वासशाली महापुरुषो यदा राज्यभारं वोढुमङ्गीचकार तदा जनानां क्षेमबीजं सम्यगुप्तमिति कामं युक्तमिदं यत् आपण्डितपामरं सर्वे हृष्टा भवन्ति।

भगवद्भक्तिः भक्तिमत्तत्तत्स्त्रीपुरुषव्यक्तिमात्रविश्रान्तस्य श्रेयसो निदानमिति ये मन्यन्ते ते न तत्त्वविदः। भगवति यस्य परमार्थतो

भक्तिरस्ति स सात्त्विको यस्मिन् देशे वसति, तस्य कृत्स्नस्य देशस्यैव ततः क्षेमो भवतीति शास्त्रार्थरहस्यवेदिनो वदन्ति।

कदाचिदपि रङ्गभूरसिक यत्र देशे वशी
त्वदेकनियताशयस्त्रिदशवन्दितो वर्तते।
तदक्षततपोवनं तव च राजधानी स्थिरा
सुखस्य सुखमास्पदं सुचरितस्य दुर्गं महत्॥

इति भगवान् निगमान्तमहादेशिकः। इह 'त्रिदशवन्दितो वर्तते' इति विशिंषता आचार्येण 'सर्वेऽस्मै देवा बलिमावहन्ति' इति श्रुत्युक्तो विशेषः प्रतिपादितो भवति। यस्मिन् देशे भगवद्भक्तो वर्तते तस्मिन् देशे पर्जन्यः यावदपेक्षं काले वर्षति। वातः सुखं वाति। सूर्यः उचितं तपति। अग्निर्न गृहान् दहति। भूमिर्न कम्पते। सस्यानि समग्रं पच्यन्ते। एवं कुर्वन्तो देवाः तमुपचरन्तीति श्रुतेः तदनुसारिण्या आचार्यसूक्तेश्च भाव इति प्रतीमः। एवं चेत् एतल्लोकयोगक्षेमसम्पत्तयेऽपि भगवद्भक्तिरपेक्षितेति सुग्रहमेतत्। अत एव पूर्वमस्मद्देशे नास्तिक्यं तत्कार्यमीश्वरदूषणं च चौर्यादिवत् राजदण्डार्हापराधत्वेन परिगणितमासीत्। अस्मिन् काले एवमीश्वरदूषणस्यापराधत्वकल्पनं दूषणकर्तुं दण्डविधानं च यद्यपि न सुकरं तथापि राज्यनिर्वाहे स्थिताः यदि आस्तिका भवन्ति, तत्र तत्र तदा तदा तदुचितं प्रतिबोधनं च जनानां कुर्वन्ति, तर्हि नूनं नास्तिकानां दुश्चेष्टितं कुण्ठितं भवेत्; तेषां सङ्ख्या च न परं न वर्धेत, अपि तु क्रमेण क्षीयेत। अन्ततस्तेषां अत्यन्तलोप एव स्यात्।

अस्य महापुरुषस्य राज्याधिकारवहनारम्भसमनन्तरं अचिरादेव यद्देवो वर्षति स्म, तेन च जलदुर्भिक्षस्य मात्रया निवृत्तिरभूत्; तदपि भाविन्याः सर्वसङ्कटनिवृत्तेः सूचकं शुभं निमित्तं मन्यमाना जना हृष्यन्ति। चिरानुवृत्ता आहारविभजनक्लृप्तिः जनानां बहुधा पीडाकरी अभवत्। तामपि धीरतामवलम्ब्य प्रत्युद्धरन् एष प्रधानमन्त्री प्रायः सर्वैरेवाभिनन्दितः।

लोकाः समस्ताः सुखिनो भवन्तु।

# महाराजः ॥ 26

राजानं विना राज्यमित्येतत् पूर्वं यदाकदाऽपि यत्र कापि नासीत्। अद्य कलिना कार्यमाणासु दुष्प्रवृत्तिषु इयमप्येका यद् राजपदं अत्यन्तं विलोप्यते । प्रायो लोके सम्प्रति राज्यानि अराजकानि। क्वचित् क्वचित् स्थिता राजानः महतीं दुरवस्थामनुभवन्ति। बलाद्वा सिंहासनादवरोप्यन्ते, यथा स्वयं तत् परित्यज्य निर्गच्छेयुः तथा काचन दुरवस्था वा उत्पाद्यते।

स्वतन्त्राः सन्तो राजानः स्वेच्छया सर्वं कुर्वाणाः प्रजाः पीडयन्ति, स्वभोगप्रवणाः लोकयोगक्षेमसंविधाने न श्रद्दधति इति राजराज्ये दोषं पश्यन्ति । प्रजाराज्यं परं किं सर्वाकाररमणीयं दृश्यते ? कति कलहाः ? कति क्षोभाः ? कति कष्टानि ? सर्वेषामस्माकं प्रत्यक्षसिद्धं ह्येतत्। सर्वेषा-मात्मगुणेषु पुष्कलेषु सत्सु राजराज्येऽपि न कश्चिदपि दोषोऽस्ति । असत्सु तेषु प्रजाराज्येऽपि न कश्चिदपि गुणोऽस्ति । तस्माद् राजराज्यमिति प्रजाराज्यमिति वृथा विप्रतिपत्तिः, वृथा विमर्शः, वृथा राजनिष्कासनम्।

अचिरपूर्वावधि अस्मद्देशशासने स्थिताः आङ्गलाः अन्यान् जनान-पेक्ष्य बहुधा भाग्यशालिनः। तत्र हि सम्पूर्णं प्रजाराज्यं प्रवर्तते। अथापि अस्त्येव राजा, यस्मिन् ते सर्वे अत्यन्तमनुरक्ताः, अत्यन्तं बहुमान-शालिनः। कक्ष्याभेदे बहुधा सत्यपि सर्वे राज्ञि समानां प्रतिपत्तिं कुर्वन्ति। राज्यसम्बन्धिषु सर्वेष्वधिकारेषु प्रजाभिरेव उह्यमानेषु, ताभिः यद् यथा निश्चीयते तत् तथेति अनुमतिदानमात्रकर्तव्योऽपि, स्वतन्त्रं यत् किमपि कर्तुमशक्तोऽपि, अभिषिच्य सिंहासने स्थापितः राज्यस्य शिरसि वर्तमानो राजा प्रकारान्तरेण येन केनापि सर्वथा दुर्लभां काञ्चन शोभां राज्यस्य आदधात्येव । ईदृशराज्यभाक्त्वानुगुणं भाग्यं आङ्गलजनानामस्तीति सन्तुष्यन्त एव वयं कथमस्माकमिदं अत्यन्तलुप्तमिति चिन्तयन्तो भृशं विषण्णा अपि भवामः।

अस्ति काश्मीरेषु महाराजः । प्रजाराज्यं तत्र अचिरादुपक्रान्तम् । तद्व्यवस्थापकं शासनं निर्मातुं परिकल्पिता काचित् समितिः तत्सम्बधिनो विषयान् परिशीलयन्ती वर्तते । तत्र महाराज उद्वासनीय इति निर्णयः कृत इति श्रुतवतामस्माकं मनसि इयं चिन्तालहरी प्रादुरभवत्।

**कालः कलिर्जयति कः किल किं करोतु ?**

---

# संस्कृतग्रन्थजातम् ॥

## सोमः ।

यज्ञेषु अग्निः अत्यन्तं प्रधानभूतः । तथा सोमोऽपि । कृत्स्नं नवमं मण्डलं एतत्स्तुतिपरमित्युक्तम् । एवं प्राधान्ये इन्द्राग्निभ्यां अनन्तरं स्थानं भजन् सोमः तृतीयो भवति । लतारूपस्यास्य सर्वदा प्रत्यक्षदृष्टत्वात् पुरुषविधत्वं नातीव अभिवर्धितम् । ग्रावभिः अभिषुत्य सोमरसे पात्रेषु गृह्यमाणे यद्यत् विशेषतः किञ्चिद्वर्णयितुं शक्यते तत्सर्वं प्रतिभाशालिनः कवयः बहुधा वर्णितवन्तः । विवस्वतः पुत्रीभिः दशभिः सोमोऽयं पूतो भवति । अत्र दश अङ्गुलयः अभिप्रेताः । सोमरसः ग्रहानभिधावति महिषा इवारण्ये । एवमत्र पक्ष्युपमा च क्रियते । यदा सोमरसः अद्भिः मिश्रितो भवति तदा गवां मध्ये वृषभ इव तासामङ्के निविशत इति उच्यते । एवमस्य ध्वनिः युद्धे वीराणां ध्वनिना उपमीयते । तथा वृषभनर्दितेन । अस्य पीतं वर्णं परिगृह्य तेजस्वित्वं अस्य बहुधा वर्णयन्ति । तेजसि सूर्योपमाऽपि क्रियते । अस्य पानममृतत्वहेतुः । देवा अपि अस्य पानेन अमृता बभूवुः । यत्र यमो राजा निवसति तत् नित्यं पदं सोमः स्वसेविनः गमयति । सर्वव्याधिमेष परिहरति । अन्धं दृष्टिमन्तं करोति, पङ्गुं संचारयति । ओषधीषु प्राधान्यादयं वनस्पतिरित्युच्यते । अस्य प्रथमोत्पत्तिः यद्यपि दिवीति, ततः गायत्र्या इह आहृत इति च तत्र तत्र उच्यते तथाऽपि असकृत् पर्वतेष्वस्य वृद्धिः निवासश्च प्रतिपाद्यते । यत्पुनः चन्द्रस्याऽपि सोम इत्यभिधानं, यच्च तन्मूलं तयोस्तादात्म्यानुसन्धानं, ततश्चन्द्रस्य देवैः पीयमानत्वाभिधानं च, तत्र सर्वत्राशयः स्फुटो न भासते । इन्दुरित्यपि सोमस्यास्त्यभिधानम् । पारसीकवेदेष्वपि अस्याभिधानात् अस्य प्राधान्यमार्याणां पारसीकानां च विभागात्प्राक्काल एव निरूढमिति ज्ञायते ।

एवं स्थानत्रये प्रधानभूताः देवताः काश्चित्प्रत्यपाद्यन्त । गुणानामपि देवतात्वं कालक्रमेणाभिमतमासीत् । यथा श्रद्धा मन्युः काम इति । तत्र श्रद्धायाः एकं सूक्तम् । मन्योः सूक्तद्वयमस्ति । पुनरन्याहृश्योऽपि देवताः निष्पन्ना दृश्यन्ते । प्राचीनानां देवतानां गुणविशेषप्रतिपादनाय यानि विशेषणान्युपात्तानि तान्येव गच्छति काले देवताविशेषप्रतिपादकतया अगृह्यन्त । धाता प्रजापतिः इत्येवमादयः तादृश्यो देवताः ।

सवितुरपि प्रजापतित्वमुक्तं दृश्यते । तथा सोमस्य । एवमप्यर्वाचीनेषु ऋक्संहिताभागेषु एतन्नाम्नी पृथक् काचिद्देवता निष्पन्ना, यस्या नामान्तरं ब्रह्मेति । अर्थान्तरवाचिनां शब्दानां कालक्रमेण देवताविशेषवाचित्वं भवति इत्यत्र प्रजापतिवाचिनं 'कः' इतिशब्दं विमर्शका उदाहरन्ति । प्रश्नार्थकस्सन्नयं शब्दः ब्राह्मणकाले 'प्रजापतिर्वै कः' इति व्याख्यात आसीत् । प्रश्नार्थकत्वे सर्वनामत्वमस्य शब्दस्य भवति । देवताविशेषवाचित्वे प्रसिद्धे तु केवलनामत्वं, येनैव 'काय स्वाहा' इति चतुर्थ्यां रूपं भवति ।

## बृहस्पतिः ।

अस्य स्वरूपमेतदिति न निश्चीयते । ऋषीणां भक्तिरेव एवमभिधीयत इति केचन मन्यन्ते । अपरे तु अग्निरेव यज्ञेषु व्यापारावस्थायामेव-मुच्यत इत्याहुः । अग्नेरिव बृहस्पतेरपि यस्मात् पुरोहितत्वमस्ति तस्माद-ग्निना तस्य दृढस्सम्बन्ध इति कल्पयन्ति ।

## अदितिः ।

नास्याः कृते पृथक्सूक्तं प्रवृत्तम । तथाऽपि तत्र तत्रासकृदियं स्तूयते । द्वादशानामादित्यानां गणदेवतानामियं माता । सर्वेभ्यः पापेभ्यः विमोचनं, व्याधिभ्यश्च, इयं करोतीति आकारद्वयमेतत् पदे पदे स्तूयते । आदित्यशब्दपर्यालोचनया तत्र प्रकृतितया अदितिशब्दं परिकल्प्य इयं देवता निष्पादिता । अत एवेयं आर्यमात्रप्रसिद्धा देवता, न जनान्तरेषु प्रसिद्धेत्याहुः ।

एवंविधानां स्त्रीदेवतानां वैदिकसंप्रदाये प्रायेण अप्राधान्यमेव । उषाः, सरस्वती, पृथिवी, इत्यासां किञ्चित्प्राधान्यमस्तीति प्रागवोचाम । तथा रात्रिरपि एकेन सूक्तेन स्तुता । देवपत्न्यः यद्यपि कीर्त्यन्ते तथाऽपि देवपत्नीति पुंपरतन्त्रतयैव । न तु क्वचिदपि स्वातन्त्र्येण ।

मित्रावरुणौ अग्नीषोमौ द्यावापृथिव्यौ इत्येवं देवताद्वन्द्वानि कानि-चित्सन्ति । तथा गणदेवाः बहवः । तत्र एके मरुतः । अपरे रुद्राः । इतरे आदित्याः । तथा वसवः । एवं विश्वे देवाः । एषां स्तुतिः षष्टौ सूक्तेषु क्रियते ।

ऋभवो नाम केचन कीर्त्यन्ते। एषां न तथा मुख्यं देवतात्वम्। देवेभ्यः सर्वेभ्यः अवरा इमे । अद्भुतानां पात्राणां निर्माणे एवंविधेषु कार्यान्तरेषु च एषामद्भुता शक्तिः। स्वमातापित्रोः जरामपनीय पुनर्यौवनं समपादयन्निति एतद्विषये प्रशंसा क्रियते। एते कदाचित्सूर्यस्य गृहे द्वादश दिनान्यतिष्ठन्निति काचन कथा उच्यते। चन्द्रमानेन सूर्यमानेन च प्राप्तस्य संवत्सरवैषम्यस्य परिहारः इह अभिप्रेत इत्याहुः। गन्धर्वा इति, तासां स्त्रियः अप्सरस इति च ऋभुवत् देवेभ्यः किञ्चिन्न्यूनाः चेतनविशेषाः ऋक्संहितायामभिधीयन्ते । तत्र एकं सूक्तमस्ति, यत्र उर्वशीपुरूरवसोः संवादो निबद्धः । इयं कथा शतपथब्राह्मणे विस्तृता। अप्सरःपतित्वेन गन्धर्वः कीर्त्यते। गन्धर्वपदं ऋकसंहितायां अथर्वसंहितायां च एकवचनान्तमेव श्रूयते । वेदान्तरेषु बहुवचनान्तम् । तदत्र बहवो गन्धर्वाः सजातीयाः अभिप्रेता इति स्पष्टम्। ततः परमेषां गायकत्वं तथा प्रसिद्धं यथा सङ्गीतविद्याया गान्धर्ववेद इत्येव प्रसिद्धिः।

यथा देवकल्पाः इमे, तथा मनुष्येष्वपि केचित् देवचरितसम्बन्धवत्त्वेन प्रतिपाद्यन्ते । तत्र मनुष्याणां प्रथमः पिता मनुरेकः। तथा अङ्गिरसो नाम पुरोहिताः ऋषयः इन्द्रसम्बन्धिनीषु गविष्टिषु साहाय्यकारिणः। भृगवो नाम अपरे। एषां कृते मातरिश्वा दिवस्सकाशादग्निमानिनाय । तदुपज्ञञ्च अस्मिन् भूलोके वैतानिकाग्निसमिन्धनम्। एवं सप्तर्षयो नाम केचित् । यानि सप्तर्षित्वेन सप्त नक्षत्राणि संप्रति प्रसिद्धानि तेषां सप्तर्षित्वं संख्यासाम्यमात्रेण, नक्षत्रवाचकस्य ऋक्षशब्दस्य ऋषिशब्दसादृश्यवशेन च इत्युत्प्रेक्षन्ते।

चतुष्पात्सु ऋक्संहितायां प्रसिद्धः अश्वः । देवानां रथवहने अयमुपयुक्तः । सूर्यस्य अश्वरूपणा बहुधा क्रियते । एतत्स्तुतिपरस्य सूक्तद्वयस्य परिशीलने चिरात्पूर्वमेव अश्वमेधयागोऽत्र प्रसिद्ध इति ज्ञायते। ततोऽपि प्रसिद्धतरा गौः। गवा क्रियमाणस्य उपकारस्य भूयस्त्वात् एवमस्यां चिरात्पूर्वं गौरवमासीदिति ज्ञायते। वर्षोन्मुखस्य मेघस्य गोत्वेन रूपणा क्रियते, यत्र तस्य पृश्निरिति नाम भवति। सर्वेषां कामानां वर्षाधीनत्वात् कामधुक् इति नामापि प्रसिद्धमासीत्। एवं भूमिरपि गोत्वेन पदे पदे रूप्यते । अदितिरिति, देवीति, अघ्न्येति, एवंविधानि ऋषिभिः प्रयुक्तानि गोर्नामानि प्राचां तत्र देवताबुद्धिरासीदित्येतत् ज्ञापयन्ति।

अवस्ताग्रन्थेऽपि एतत्प्रशंसनं दृश्यमानं आर्यपारसीकविभागात् प्राकाल एव गवां माननीयत्वं निरूढमिति ज्ञापयति । गोमांसभक्षणात् महान् प्रत्यवाय इति शतपथब्राह्मणे उच्यते ।

अथ ऋक्संहितायां कीर्तितेषु दुष्टसत्त्वेषु मुख्यस्सर्पः । इन्द्रस्य शत्रुः वृत्रोऽप्येतदाकरः । देवोऽपि कश्चित्सर्परूप उच्यते, यस्य 'अहिर्बुध्न्यः' इति नाम । अर्वाचीनेषु ग्रन्थेषु गन्धर्वादिवत् सर्पजातीयाः देवेभ्यः अवराः केचन प्रसिद्धाः । एषां प्रीतये बलिरपि गृह्यसूत्रकारैर्विधीयते । नागा इत्यपि पश्चादेषां प्रसिद्धिरासीत् । अस्मिन्देशे सर्पपूजा सम्प्रति प्रायस्सर्वत्र प्रसिद्धा । यस्मादियं ऋक्संहितायां न प्रतिपादिता अथापि तु सर्वत्र आदृता दृश्यते, तस्मात् अनार्यपरिचयात् तेषु प्रसिद्धेयं आर्यैरपि परिगृहीतेति कल्पयन्ति ।

यथैवं प्राणिनां तथा अप्राणिनामपि देवतात्वकल्पनेन स्तुतिः क्रियते । तत्र एकं सूक्तं ओषधीनां स्तुत्यर्थं प्रवृत्तम् । अपरं अरण्यान्याः । एवं मनुष्येण स्वयं निर्मितानां उपकरणानामपि स्तुतिर्दृश्यते । यथा यूपस्य एकं सूक्तम् । तथा सोमाभिषवार्थस्य ग्राव्णः त्रीणि सूक्तानि । तथा काश्चन ऋचः फालं स्तुवन्ति । एवं युद्धोपकरणानामपि स्तुतिः एकेन क्रियते । अथर्ववेदे डिण्डिमस्तुतिपरं एकं सूक्तं दृश्यते ।

---

# वैदिका विशेषाः ॥

(Vidyalankara V. R. Srinivasa Tatacharya Siromani)

---

## 1 त्रिपुरासुरकथा ।

तैत्तिरीयसंहितायाः षष्ठकाण्डे द्वितीयप्रपाठके तृतीयानुवाके 'तेषामसुराणाम्' इत्यादिः 'प्राणुदत' इत्यन्तो वेदस्य भागः अग्नेतानुपसद्धोमान् विधातुमेवं प्रस्तौति—

'वरिष्ठेनाग्निना पूर्वं येऽसुराः पराभूतास्तेषामसुराणां पृथिव्यन्तरिक्षद्युलोकेषु स्वरक्षार्थं दुर्गरूपास्तिस्रः पुर आसन् । तासु पृथिवीवर्तिनीपूः लोहप्राकारवेष्टनादयमाऽभवत् । अन्तरिक्षस्था पुरी रजतप्राकारावृताऽवर्तत । द्युलोके विद्यमाना नगरी हिरण्यप्राकारसंवलिता व्यलसत् । देवा-

स्तादृशानि पत्तनान्यग्निना वरिष्ठेन सताऽपि जेतुं नाशक्नुवन् । ततस्ते युद्धं परित्यज्य तान्युपसदैव जेतुमैच्छन् । अस्य वाक्यस्य, दुर्गं परितोऽवस्थाय चिरं तत्समीपेऽवस्थाय तमुपवसत । चिरावस्थाने सति दुर्गमध्ये अन्नपानादिक्षयादन्तर्भेदाद्वा जयो भवतीति स्थान् प्रति प्रत्यपादयन्नित्याशयो भाष्यादवगम्यते । यस्माद्देवैश्चिरवासो जयोपायत्वेन विचारितस्तस्मान् लोकेऽपि यश्च ब्राह्मणादिर्वेदाध्ययनेन वेदविचारं जानाति यश्च शूद्रादिर्न जानाति ते सर्वेऽपि युद्धेनाजेयं महापुरमुपसदा जेतुं शक्यमित्याचक्षत । ततो देवाः कालविलम्बो मा भूदिति विचार्य युद्धेनैव जेतुमिषुं यथास्या अग्निः प्रथमभागकाष्ठं भवेत् सोमो लोहः विष्णुः तदग्रं तथा समस्कुर्वन् । तामिमां देवतात्रयसमष्टिरूपामिषुं स्त्रीबालसहितकृत्स्नासुरघातिनीं को नामास्यिष्यतीति विचार्य शक्तो निर्घृणश्च रुद्रः तस्मात्स एनामस्यत्विति निरचिन्वन् ।

स रुद्रः 'अहमेव पशूनामधिपतिरसानीति वरं वृणे' इति तान् प्रत्यब्रवीत् । ते तस्मै तं वरमददुः । तस्मात् रुद्रः पशूनामधिपतिरासीत् । स तामिषुं मुक्त्वा तया तत्तत्प्राकारवेष्टितास्तिस्रः पुरो भित्वा त्रिभ्यो लोकेभ्योऽसुरान् निरसारयामास' इति । तदनु 'यदुपसद उपसद्यन्ते भ्रातृव्यपराणुत्त्यै' इति वेदभाग. स्त्रीनेतानुपसद्धोमान् विधत्ते ।

श्रीमहाभारते अनुशासनपर्वणि त्रिचत्वारिंशदधिकद्विशततमेऽध्याये तु इयं कथैवं दृश्यते । 'दिवि वीर्यवतामसुराणामायसराजतसौवर्णरूपाणि त्रीणि पुराणि बभूवुः । मघवान् तानि सर्वायुधैरपि भेत्तुं नाशकत् । अथ पीडिताः सर्वे देवा रुद्रं शरणमेत्य तं प्रति, 'मानद, हे रुद्र, सर्वकर्मसु पशवो रौद्रा भविष्यन्ति । पुरैस्सह दैत्यान् जहि । लोकांस्त्रायस्व' इत्यूचुः । तैस्तथोदितस्स रुद्रस्तथेति गदित्वा

विष्णुरात्मा भगवतो भवस्यामिततेजसः ।
तस्माद्धनुर्ज्यासंस्पर्शं स विषेहे महेश्वरः ॥

इत्युक्तरीत्या विष्णवाप्यायिततेजास्सन् विष्णुं शरोत्तमं, अग्निं शल्यं, वैवस्वतं यमं पुङ्खं, ओङ्कारं धनुः, उत्तमां सावित्रीं सर्वां ज्यां, ब्रह्माणं सारथिं च कृत्वा त्रिपर्वणा विशल्येन वाय्वग्निसमतेजसाऽऽदित्यवर्णेन तेन शरेण तानि नगराणि भित्त्वा तदुपेतानसुरानदहत्' इति । 'हनूमता वेगवता वानरेण महात्मना । लङ्कापुरं प्रदग्धं तद्रुद्रेण त्रिपुरं यथा' इति श्रीमत्सुन्दरकाण्डे ।

## 2 अश्वतरस्य प्रजापत्यतिलङ्घनफलम्।

तैत्तिरीयसंहितायाः सप्तमकाण्डे प्रथमप्रपाठके प्रथमानुवाके 'अग्निष्टोमेन वै' इत्यादिः 'अतिद्यप्रवत' इत्यन्तो वेदस्य भागः अग्निष्टोमं विधातुमेवं प्रस्तौति—'पुरा सिसृक्षुः प्रजापतिरग्निष्टोमेन साधनेन प्रजा असृजत। ताः प्रजास्तेनैव स्वाधीनतया पर्यगृह्णात्। तासां परिगृहीतानां प्रजानां मध्ये गर्दभाश्वोत्पादितसङ्कीर्णजातिरूपोऽश्वतरः प्रजापतिपरिग्रहमुल्लङ्घ्यात्यन्तदूरमगच्छत्। स प्रजापतिरश्वतरस्य पृष्ठतो गत्वा तदीयं शरीरगतं सारभूतं रेत आदत्त। तद्गर्दभशरीरे नितराममार्ट्। तस्मात् गर्दभो द्विविधरेतोयुक्तः। अत एव स गर्दभजातिमश्वतरजातिञ्चोत्पादयति। अपि चान्ये केचिदभिज्ञा एवमाहुः – 'प्रजापतिर्वडवाभिधानायामश्वयोषिति तत् निकामं मार्ष्टि स्म' इति। तस्मात् वडवा द्विविधरेतोविशिष्टा। तत एव साप्यश्वजातिमश्वतरजातिं च जनयति। अपि च इतरे निपुणा इत्थमाहुः 'स ओषधीषु तत् नितान्तं ममार्ज' इति। अत एव ओषधयो मनुष्याणामिव घृततैलाभ्यङ्गाभावेऽपि साराधिक्येन वर्धन्ते—स्निग्धवद्दृश्यन्ते। किञ्चैके प्रवीणा एवमाहुः 'स मनुष्यादिजातिषु तदत्यर्थममार्क्षीत्' इति। अत एव क्वचिदेकस्मिन् गर्भे शरीरद्वयमुत्पद्यते। यस्मादयमश्वतरः प्रजापत्यात्तरेताः तस्मात् नपुंसकवदयं प्रजामुत्पादयितुं नेष्टे। निस्सारत्वादेवायं यज्ञेष्यनर्हः। यस्मादयमश्वतरो रेतोराहित्येऽप्यतिक्रम्य गन्तुं समर्थस्तस्मादतिलङ्घितप्राकृतदक्षिणाके सर्वस्वदक्षिणाके सहस्रदक्षिणाके वा यज्ञविशेषे नियमेन दानयोग्यः' इति। तदनु 'य एवं विद्वानग्निष्टोमेन यजते' इत्यादिः 'सद्योतेनाग्रेऽयजत' इत्यन्तो वेदस्य भागः अग्निष्टोमं विधत्ते। अत्र प्रजापतिना अग्निष्टोमेनैव स्वाधीनतया परिगृहीतानां प्रजानां मध्येऽश्वतरः प्रजापतेरविधेयो भूत्वाऽत्यन्तदूरं गतः। कतिपयाभिज्ञसम्मतेन गर्दभवडवौषधिप्रजासु प्रत्येकं प्रजापत्यात्ताश्वतररेतोमार्जनेन गर्दभवडवे स्वजात्यश्वतरजात्युत्पादिके ओषधयः स्निग्धवद्दृश्यमानाः प्रजासु काश्चन एकस्मिन् गर्भे शरीरद्वयं जनयन्त्यश्चाभवन्। अश्वतरस्तु प्रजापत्यात्तरेतस्त्वात् प्रजोत्पादनेऽसमर्थो यज्ञेऽनर्हश्चासीत्। सर्वस्वदक्षिणाकादियज्ञविशेषे दानयोग्यत्वस्याभिधानेऽपि तस्य सर्वसुकरत्वाभावात् पूर्वोक्ता तस्य यागायोग्यता दृढीकृतैव भवति। महदतिक्रमः किं किं न कुर्यात्।

### 3 भूम्याः पृथिवीनाम्न्युपपत्तिः।

तैत्तिरीयसंहितायाः सप्तमकाण्डे प्रथमप्रपाठके पञ्चमानुवाके 'आपो वा इदमग्रे सलिलमासीत्' इत्यादिः 'तत्पृथिव्यै पृथिवित्वम्' इत्यन्तो वेदस्य भागः भुवः पृथिवीनाम्न्युपपत्तिमित्थं प्रदर्शयति– 'इदानीं दृश्यमानं गिरिनदीसमुद्रादिकं जगत् पृथिव्युत्पत्तेः पूर्वं सलिलमासीत्। भूतान्तरं तत्कार्यं वा किञ्चिदपि नाभवत्। तदानीं प्रजापतिर्मूर्तस्य शरीरस्यावस्थातुं स्थानाभावात् वायुरूपो भूत्वा तस्मिन्नेव सलिले सर्वत्राचरत्। तदनु जले निमग्नां मेदिनीमपश्यत्। ततः स्वयं वराहो भूत्वा दंष्ट्राग्रेण तां महीमुद्धृत्योपर्याहरत्। अथ वराहरूपमुत्सृज्य विश्वकर्माभूत्वा तस्या मार्जनं सम्यग्विधाय तत्रत्यद्रवमपनीय तामप्रथयत्। पश्चात्, दृश्यमाना सर्वप्राण्याधारभूतेऽयं पृथिव्यभवत्। प्रथनादेव तस्याः पृथिवीति नाम समपद्यत' इति। एवं तैत्तिरीयप्रथमाष्टके प्रथमप्रपाठके तृतीयानुवाकेऽपि वराहावतारकथा पृथिवीनामोपपत्तिश्चाख्यायेते।

---

# यथाभिमतम्॥ III. 5

### अरण्य एव प्रदेशान्तरम्।

( प्रविशति सिल्विअस्। पीबी च )

सिल्—मधुरे पीबि, मा स्म मामवमंस्थाः; मा स्म, पीबि। कामं ब्रूहि 'नाहं त्वां कामये' इति। किन्तु जुगुप्सया न ब्रूहि। यो हि लोके वधकर्मकारी वध्यानां मृतिं दर्शं दर्शं कठिनचित्तो जातः, सोऽपि प्रथमं क्षमां प्रार्थ्यैव तपस्विनो वध्यस्य कण्ठे असिं पातयति। य एवं मृत एव सन् रुधिरबिन्दुभिर्जीवति ततोऽपि नु त्वमुग्रा भविष्यसि?

(पृष्ठतः प्रविशति रोसलिन्द्। सिलिआ, कारिन् च)

पीबी—नाहं ते वधकारिणी भविष्यामि। त्वत्तोऽपधाविता भवामि, यतस्ते पीडां कर्तुं नेच्छामि। मम दृष्टिस्त्वां मारयतीति ब्रवीषि। नूनमिदं युक्तरूपं, नूनमिदं सम्भावितं, यदुत नेत्रे, अतिदुर्बले अतिमृदुनी,

ये परमाणुभ्योऽपि बिभ्यती निमीलतः ते क्रूरे इति घातुके इति, प्राणहरे इति अभिधीयेते। अभिनिवेशेन विष्फारिताभ्यां लोचनाभ्यामद्य त्वामहं समीक्षे ; यदि मे लोचने रुजाकारिणी, ते त्वां मारयताम्। भवाद्य मूर्छितः, निपत अधस्तात्। अभिनयमपि वा कुरु। यदि न शक्नोषि, लज्जस्व ; नानृतं वद मम नेत्रे त्वां मारयत इति। अथ दर्शय तावत् तं व्रणं यस्त्वयि मम नेत्राभ्यां कृतः। सूच्यग्रेण आत्मानं घर्ष। अस्ति तत्र कश्चन किणः। गुल्मकं कञ्चित् हस्ताभ्यामालम्ब्य तिष्ठ ; तत्र करतले काचन रेखा, किञ्चिदवष्टम्भनचिह्नं, कतिपयान् क्षणान् अनुवर्तते। मम नेत्रे तु अतिगाढं त्वयि व्यापारिते। न च ते त्वां प्रहरतः। निश्चिता च मे मतिः नास्ति नेत्रयोः प्रहरणशक्तिरिति।

सिल्विअस् — प्रिये पीबि, यदि कदाचित्—तत् 'कदाचित्' अचिरादेव भवितुमर्हति—कस्यचिद्नूतन सुन्दरं मुखं दृष्ट्वा कामविद्धा भविष्यसि, तदा त्वं अदृश्यान् तान् व्रणान् द्रक्ष्यसि, ये कामस्य शरैः क्रियन्ते।

पीबी — तावत्तु मत्सविधं नागच्छ। यदा च स कालो भवति निर्दयं पीडय मां त्वदुपहासजल्पितैः। तत्कालावधि न मे त्वयि अनुकम्पा भविष्यति।

रोसलिन्द् — (पुरस्तादागत्य) कुतो नाम, ब्रूहि तावत्। का खलु ते जननी, या त्वं इमं वराकं प्रति उपालम्भं, विकत्थनं, सर्वं युगपदेव करोषि ? सौन्दर्यं ते नास्ति ; तावता किं त्वया दृप्तया निष्करुणया भवितव्यम्?* किमेतत् ? को न्वत्राभिप्रायः ? कुतो मामभिसमीक्षसे ? सामान्यस्त्रीभ्योऽधिकं विशेषं त्वयि न पश्यामि। अये ममापि अक्ष्णोर्वशीकारे मतिं करोतीति भाति। अयि गर्विते, मा स्म तामाशां करोः। न ते मषीमलिने भ्रुवौ, कृष्णपट्टतन्तुकल्पाः केशाः, उद्वृत्तौ चक्षुर्गोलकौ, नापि ते नवनीतमसृणः कपोलः त्वद्दासं मां कर्तुमलम्। जड अजपाल, कुतो नु त्वं तामनुधावसि, बाष्पसंवीता दक्षिणा दिगिव वर्षवाताभ्यां सूत्कुर्वती ? स्त्रीषु यावदियमभिरूपा ततस्त्वं पुरुषेषु सहस्रगुणमभिरूपतरः। त्वादृशा जडास्ते, ये लोकं कुरूपैः शिशुभिः पूर्णं कुर्वन्ति। न तथा मद्यमेनां मदयति, यथा ते मिथ्यास्तुतिः। तव अनुवर्तनात् सा स्वात्मनि सौन्दर्यमभिमन्यते, न तु स्वाङ्गसौष्ठवात्। अथ भद्रे, जानीहि

* 'रूपवत्यः अनुरूपकान्तलाभाय विनयादिगुणशालिन्यो भवन्ति। दुर्जातायाः किं मे तैर्गुणैः ?' इति यदि ते मतिः सा न युक्तेत्यभिप्रायः।

स्वस्वरूपम्। जानुभ्यां स्थित्वा व्रतमाचर्य देवं वन्दस्व, यत् सज्जनः कश्चित् त्वां कामयते। सुहृद्भूतेन मया इदं ते कर्णे वक्तव्यम्—‘प्राप्ते अवसरे विक्रयं निर्वर्तय। न त्वं सर्वेषामापणानां योग्या। अस्मिन् क्षमां प्रार्थय। एतं कामयस्व। तस्य प्रार्थनामङ्गीकुरु। मलिनो मलिनतमो भवति यदा परनिन्दामालिन्यमुपनिपतति। तदजपाल, त्वदर्थं परिगृहाण इमाम्, स्वस्त्यस्तु ते।

पीबी—मधुर युवन्, प्रार्थये त्वां, कृत्स्नमेकं वत्सरं मामुपालभस्व। तवोपालम्भमहं सहेय, न त्वस्य कामगाथाम्।

रोसलिन्द्—(पीबीं प्रति) स ते मलीमसतां कामयते (सिल्विअस्-इमं प्रति) सा मे क्रोधं कामयते। तथा चेत्, सा यथा यथा त्वां भ्रुकुटिभिरवसादयति तथा तथा अहं तां तीक्ष्णाभिर्वाग्भिर्भावयामि। (पीबीं प्रति) कुतो नाम एवं मामभिवीक्षसे?

पीबी—न त्वां प्रति केनापि दुरभिसन्धिना।

रोसलिन्द्—अनुनाथामि त्वां न मां कामयस्व, यतोऽहं मद्यपायिनां प्रतिज्ञातो मिथ्याभूततरा। अपि च नाहं त्वां कामये। यद्यस्मदावासं जिज्ञाससे, सः अमुं वृक्षषण्डं समया अस्ति। कच्चिदागच्छसि स्वसः? अजपाल, बलवदिमां अनुवर्तस्व। एहि स्वसः। अजपाले, तस्मिन् सौम्यां दृष्टिं कुरु। अवलिप्ता मा भूः। अस्मिन् कृत्स्ने जगति रूपग्रहणे नान्यः कश्चिदेवं भ्रान्तो भविष्यति, यथा अयम्।* अस्मदावासमागच्छ।

[निष्क्रान्ताः रोसलिन्द् सिलिआ कारिन् च]

पीबी—हत अजपाल, अद्य ते वाचां गौरवमवगच्छामि, “को नाम स कामी, यः प्रथमदर्शने नाकामयत”।†

सिल्विअस्—मधुरे पीबि,—

पीबी—अये, किं त्वं ब्रवीषि, सिल्विअस्?

---

* अयमेको भ्रान्तः त्वां रूपवतीं मन्यमानः कामी भवति। नान्यः कश्चिदेवं भविष्यति। तस्माद् वीतगर्वा अस्मिन् अनुरक्ता भवेति भावः।

† प्रथमदर्शन एव त्वं मयि जातकामः। अतस्त्वमेवं मयि वर्तसे, इति इदानीं जानामीत्यभिप्रायः। पुरुषवेषधारिण्यां रोसलिन्द्-अस्यां जातकामा इयं अद्यैव कामिनामवस्थासु प्रथमव्युत्पत्तिं लेभे।

सिल्विअस्—मधुरे पीबि, मय्यनुकम्पां कुरु।

पीबी – नूनं अस्ति मे त्वां प्रति विषादः, उदार सिल्विअस्।

सिल्—यत्र विषादोऽस्ति, तत्र परिहारोऽप्यस्ति। कामार्ते मयि यदि ते विषादः, तर्हि मयि प्रेम कृत्वा तव विषादं मम आर्तिं च उभयं शमयितुमर्हसि।

पीबी–अस्त्येव मे त्वयि प्रेम, यथा प्रातिवेशिके।

सिल् – त्वामहं लिप्से।

पीबी—नूनमियं कामव्यसनिता। सिल्विअस्, स आसीत् कालः, यत्र मे त्वयि द्वेष आसीत्। अथापि नैतदस्ति यदहं त्वां कामय इति। किन्तु यतस्त्वं कामकथाकथनकुशलोऽसि अतो हेतोः पूर्वमार्तिप्रदमपि तव समागमं इतःपरमहं सहिष्ये। कर्मकरणे च त्वां नियोक्ष्ये। परं तु यदेवं व्यापार्यसे तज्जनितात् सन्तोषादधिकं प्रत्युपकारं मत्तो न प्रतीक्षस्व।

सिल् – तथा परिपूतः तथा परिपूर्णः तथा वञ्चितप्रसादश्च मे कामः यथा इदमेवाहं समग्रं कृषिफलं मंस्ये यत् क्षेत्रस्वामिना सस्येषु लूनेषु विप्रकीर्णानां मञ्जरीखण्डानां समुच्चयनम्। तदा तदा स्मितलवं मयि मुञ्च; तेनाहं जीविष्यामि।

पीबी– जानासि तं युवानं य इहाद्य मया सम्भाषमाणोऽभूत्?

सिल्—न सम्यक्। अथापि असकृत् तं दृष्टवानस्मि। स तस्य ग्रामीणवृद्धस्य कुटीरं अजनिरोधं च क्रीतवान्।

पीबी—यतोऽहं तं प्रति प्रश्नं करोमि, ततः तमहं कामय इति न मन्यस्व। उद्धतः स वटुः। अथापि सम्यक् भाषते। किं तु वाचः प्रति का मे चिन्ता? अथापि वाचः श्लाध्याः यदा तासां वक्ता श्रोतॄन् प्रीणयति। स रम्यो युवा, न त्वतीव रम्यः। स नूनं दृप्तः, अथापि स दर्पस्तस्य शोभते। सः अभिरूपो वरो भवेत्। अयं तस्मिन् सारांशः, यदाकारसौष्ठवम्। तस्य वाक् यां रुजां जनयति तां सद्यस्तस्य दृष्टिः भिषज्यति। न तथा स उच्छ्रितः, तथापि तस्य वयसः स उच्छ्रित एव। तस्य पादः तथा तथा अस्ति; अथापि स दृश्यः। तस्य ओष्ठे कमनीयः कश्चिदरुणिमा अस्ति, यः तत्कपोलरागात् स्फुटतरो गाढतरश्च। अयं गाढस्य अरुणवर्णस्य पुष्पगतस्यारुणिम्नश्च भेदः। यदि तत्र काश्चन स्त्रियोऽभविष्यन्, ता यदि अहमिव तं अवयवशः निरवर्ण-

यिष्यन् ताः प्रायः तं प्रति मदनगोचरं गता अभविष्यन्। अहं तु न तं कामये। न च तं द्वेष्मि। अथापि अस्ति मे तं द्वेष्टुं कारणम्, न त्वनुरागं कर्तुम्; यतः किं तावत् तस्य कार्यं मामुपालब्धुम्? 'मम नेत्रे कृष्णे। मम केशः कृष्णः' इति सः अवादीत्। अपि च, अद्य स्मरामि, मामनिन्दीत। कुतोऽहं तदानीमेव तस्य उत्तरं नादामिति विस्मयो मे भवति। तत्तु सर्वमेकमेव। अकरणं (मौनं) तावन्नोपेक्षणं भवति। निकामपरुषं कञ्चन लेखं तस्मै लेखिष्यामि। स त्वया तस्मै नेतव्यः। किं त्वं नेष्यसि, सिल्विअस्?

सिल्–पीबि, सम्पूर्णेन मनसा।

पीबी–सद्योऽहं लेखिष्यामि। विषयो मे बुद्धौ वर्तते सुचिन्तितः। तं प्रति तीक्ष्णा भविष्यामि, अतिमितभाषिणी च। आगच्छ मया सह, सिल्विअस्।

इति तृतीयोऽङ्कः।

---

# वृद्धभाषितम्॥ (3)

रामकृष्णौ–स्वामिन्, अस्मदाचार्यपादान् सेवितुमागतौ स्वः। अद्य किं कुर्वन्ति? कदा दर्शनं सुकरम्?

प्रथमः शिष्यः–कौ युवाम्? किमर्थमागतौ?

रामः–अहं रामः, स कृष्णः। आचार्यचरणान् सेवितुमागतौ स्वः।

प्रथमः शिष्यः–तथा नु? सन्तोषः। आचार्यपादाः भगवदाराधने वर्तन्ते। एकघण्टाकालो भवेत्। तावदत्र आसितुं शक्यं चेत् आस्यताम्। न चेत् गत्वा पुनरागम्यताम्।

द्वितीयः शिष्यः–कश्चिन्मे ज्ञातुं शक्यं आचार्यपादानां सन्निधौ किं नाम भवतां कार्यमिति।

प्रथमः शिष्यः–किं भो अस्माकं तेन विचारितेन। तत् कार्यमस्मत्सकाशे वक्तुं एषां सङ्कोचो भवेदपि।

द्वितीयः शि.–आर्य, यदि अस्मन्मित्रं यथा वदति तथा, कृतं प्रश्नं प्रति

अहं क्षन्तव्यः। अजानन् अप्राक्षम्। इहैव पुरे वसन्तोऽपि भवन्तः अद्यावधि इमां दिशं नागताः। तेनाद्य आगमनस्य विशेषकारणेन केनचिद् भवितव्यमिति मन्यमानस्य मे तस्य ज्ञाने महत् कुतूहलमजनि। तेन झटिति प्रश्नमकार्षम्।

तृतीयः—को नाम भोः प्रश्नकरणे दोषः। किमपि महतीव अपराधे कृते, क्षमाप्रार्थनाविडम्बनां कुरुध्वे। अकच्छाः, कृत्तकेशाः, निष्पुण्ड्राः, अशौचाः, अकृतसन्ध्यावन्दनाः, एते इयन्तं कालं कामचारिण आसन्। अद्यैव वेषं किञ्चिदन्यथाकृत्य इमौ द्वौ इहागतौ स्तः। अत्र किमर्थमेवमेतौ आगताविति ज्ञातुं कस्य कौतुकं न जायेत?

प्रथमः— अये अधिकप्रसङ्गिन्, गच्छ स्वकार्यं पश्यन्। अधिकं न भाषणीयम्। अभ्यागतेषु विनयः प्रदर्शनीयः। अप्रीतिजनकं वचः सर्वथा वर्जनीयम्। कतिकृत्वः आचार्यपादा इदमुपदिशन्ति स्म। तत्सर्वं विस्मृत्य अद्य यथाजातता प्रदर्श्यते।

कृष्णः— स्वामिन्, न तं प्रति अत्रभवता कोपः कार्यः। पुनः पुनरपि क्रियमाणा उपदेशाः क्वचिन्न फलन्ति। न चात्रभवता मन्तव्यं अनेनाधिक्षिप्तमात्मानं आवां मन्यावह इति वा, कुपितौ स्व इति वा। भिन्नभिन्नस्वभावा मनुष्या इति आवां सम्यग् जानीव एव। किन्तु आवयोरस्ति कश्चन सन्देहः। तमयं आवामुपहसन् स्वामी परिहर्तुमर्हति। अयं तस्य प्रत्युपहास इति न मन्तव्यम्। वस्तुवृत्त्या तत्त्वजिज्ञासया आवां पृच्छावः। आर्जवेन सदयं समाधातव्यमिति सविनयं प्रार्थयावहे।

रामः—मित्र, किमिति स्वामिषु अपराध्यसि। पश्यतः सन्देहा अस्माकं सन्ति। तेषां परिहारे प्रार्थ्यमाने एषां स्वामिनां कार्यान्तरोपरोधो भवेत्। आचार्यपादानां कैङ्कर्ये कर्मानुष्ठाने च सर्व एषां कालो याति। तथा उपयुज्यमानस्य कालस्य अस्मदर्थे विनियोगप्रार्थनं नोचितम्।

प्रथमः— आर्य, अद्य अस्माकं किमपि कार्यं नास्ति। निर्व्यापारा एव वयम्। काममयं भवत्सुहृत् प्रश्नान् करोतु। (कृष्णं प्रति) आर्य, असङ्कोचं पृच्छतु भवान्। (तृतीयं प्रति) सौम्य, विद्वानसि। अपेक्षितज्ञानप्रदानं विदुषां धर्मः। आर्यस्य सन्देहपरिहारं कुरु। न परिहासः कार्यः, न कोपः प्रदर्शनीयः।

द्वितीयः—स्वामिन्, सत्यमयं विद्वान्। किन्तु अभिनवः। नानुभवोऽस्ति। आर्येण क्रियमाणानां प्रश्नानां उचितमुत्तरं दातुं न क्षमेतापि। अत्र भवतैव युक्तं समाधातुमिति भाति।

प्रथमः— यथार्हं सर्वे समादधीमहि। तत्र किमालोचनीयम्। किन्तु अयमार्यः विशिष्य एतं समाधातारं निर्दिष्टवानिति तमहं उत्तरदाने नियुञ्जे।

तृतीयः—सज्जोऽहम्। समाधास्यामि।

द्वितीयः - आर्य, अयमुत्सहत एव। पृच्छतु भवान् सन्देहम्। कालो याति।

कृष्णः— स्वामिनः, भवतां वेषवृत्ते अन्ये, अस्माकं वेषवृत्ते अन्ये इति प्रत्यक्षमेतत्। न कश्चिदेतत् अपह्नोतुं प्रभवति। यो यच्छीलानां कुले जायते वर्धते च स तच्छीलो भवति। अन्यादृशशीलवति कुले स्वामिनां जन्म वृद्धिश्च, अस्माकं तु अन्यादृशशीलवति। न भवदीये वेषवृत्ते भवतां स्वेच्छया सम्पन्ने, न चास्मदीये अस्माकं स्वेच्छया। अत्र भवान् अस्मानुपहसति। अस्मत्तुल्यानां गोष्ठीं यद्येष प्रविशति, ते असन्दिग्धमेनमुपहसिष्यन्ति। 'स्वाचरिते सर्वस्य बहुमतिर्भवति, अन्यस्मिन् अवज्ञा' इत्येषा अविवेकिजनोचिता स्थितिरिह दृश्यते। पण्डितैः पुनः गुणदोषनिरूपणेन साधुत्वासाधुत्वे निर्धारणीये। आवयोरवज्ञां कुर्वता अनेन स्वामिना स्वकीययोर्वेषवृत्तयोः को गुणो दृष्टः, परकीययोः को दोषः? इत्यस्ति मे बलवती जिज्ञासा। इदमत्रभवान् निरूप्य अस्मान् अनुग्रहीतुमर्हति।

प्रथमः—(तृतीयं प्रति) अये शेषार्य, प्रथमकक्ष्यायामुत्तीर्णः शिरोमणिरसि। अधीतवेदान्तोऽसि। वाग्म्यसि। परं तु अद्य ते तात्त्विकी परीक्षा प्राप्ता। अस्यां विजयस्ते तात्त्विको विजयः।

तृतीयः—प्रश्नार्थो न मया ज्ञायते। किमेष पृच्छति?

द्वितीयः— चतुर्दशलक्षण्यां प्रथमस्वलक्षणं द्वितीयस्वलक्षणं वा, अर्थवत्सूत्रे अर्थवत्त्वं वा प्रति प्रश्ने कृते अविच्छिन्नया वाग्झर्या तत् परिष्कुर्वन् तार्किकान् शाब्दिकान् वा प्रीणयेः। लोकवृत्तव्यवस्थापरधर्मशास्त्रसूक्ष्मार्थविषयस्त्वयं प्रश्नः। प्रश्नमेवावगन्तुं न ते अपेक्षितः परिचयोऽस्ति, समाधानकरणस्य का वार्ता?

रामः— यद् भवन्तः शिखां धारयन्ति, पुण्ड्रं च, पञ्चकच्छं च, तस्य

सर्वस्य किं फलम् ? तदभावे का हानिरिति अयं पृच्छति । मन्ये अद्य प्रश्नं सम्यगवगतवान् अत्रभवान् ।

तृतीयः—अवगतवानस्मि । किन्तु प्रतिप्रश्नमेवात्र कर्तुमिच्छामि । यद् भवन्तः केशान् कृन्तन्ति, परिवीतं वसते, शून्यललाटा भवन्ति, तस्य सर्वस्य किं फलम् ?

(रामकृष्णावन्योन्यं पश्यतः)

कृष्णः—न फलविशेषमुद्दिश्य वयमिदं सर्वं कुर्मः । लोके बहव एवं कुर्वन्ति । नागरिकं एवंरूपमिदानीं वर्तते । तद् वयमनुसरामः केवलम् ।

तृतीयः— वयमपि तथा । एतादृशवेषवृत्ता हि बहवो वर्तन्ते । तदनुसारिणो वयम् ।

कृष्णः—कामं तथा भवन्तु भवन्तः । को नाम अत्रभवतो निर्बध्नाति 'न तथा भवितव्यम् । किन्तु अस्मादृशैर्भवितव्य'मिति । स एकविध आचारः । अपरोऽन्यविधः । तत्र यत् स्वामी अन्यानुपहसति तत्र का औचिती ? कथमेतद्युक्तम् ? तदहं पृच्छामि ।

द्वितीयः—अस्मत्कुलं युष्मत्कुलमिति नास्ति भेदः । सर्वेषामस्माकं एते आचाराः कुलपरम्परया आगताः । एवं स्वकीयानामेषां आचाराणां परित्यागः अन्यदीयानामाचरणं च न युज्यते ।

कृष्णः— स्वकीयत्वपरकीयत्वाभ्यां विशेष इत्युक्तं भवति । नैतत्प्रश्नस्योत्तरम् ।

प्रथमः— न तथा, आर्य । शास्त्रसिद्धा इमे अस्मदीया आचाराः । न तथा परे ।

कृष्णः— कामं भवन्तु ते शास्त्रसिद्धाः । तेषां किं फलम् ? किं प्रयोजनमुद्दिश्य शास्त्राणि इमानाचारान् अनुष्ठेयान् उपदिशन्ति ? भवितव्यं हि केनचित् उद्दिष्टेन फलेन । न खलु शास्त्राण्यपि निष्प्रयोजनेषु कर्मसु मनुष्यान् प्रवर्तयितुमर्हन्ति शक्नुवन्ति वा ।

प्रथमः— शास्त्राणामप्याक्षेपे न वयं किमपि वक्तुं शक्नुमः । शास्त्रमस्माकं परमं प्रमाणम् । तत् यद् विधत्ते तदस्माभिः अविशङ्कमनुष्ठेयमिति अस्मत्पूर्वपुरुषाणां सिद्धान्तः । अनुष्ठानस्य किं फलमिति न विचारयामः ।

कृष्णः— यदि स्वामी मे न कुप्येत् तर्हि इदं मे वक्तव्यं भाति—इदं तत् साक्षात् यदुच्यते अन्धपरम्परेति ।

7

द्वितीयः—अन्धपरम्परा वाऽस्तु अनन्धपरम्परा वा। परमप्रमाणभूत-शास्त्रविहिताः वंशपरम्परया आगता इमे आचाराः। तेषां प्रयोजन-विमर्शः कामं युष्माभिः क्रियताम्। अत्यन्तपरित्यागस्तु कथं युज्यते? 'आचारहीनं न पुनन्ति वेदाः' 'आचारप्रभवो धर्मः' इत्येषामवश्य-कर्तव्यतां साभिनिवेशं वदन्ति शास्त्राणि। विमृश्य सर्वथा निष्फल-त्वनिश्चये पश्चात् परित्यागविमर्शो भवितुमर्हति। अत्र सहसा कृतः परित्यागो वाच्यताहेतुरेव।

रामः— (तृतीयं निर्दिश्य) अत्रभवान् तर्कव्याकरणशिरोमणिः अधीत-वेदान्तविद्यः?

द्वितीयः— अथ किम्?

रामः— अधीतवेदः?

द्वितीयः— न।

कृष्णः— अथात्रभवतः कुमाराः सन्ति?

द्वितीयः—आम्, सन्ति। त्रयः।

कृष्णः— सर्वे उपनीताः?

द्वितीयः— आम्। उपनीताः।

कृष्णः— किं ते अधीयते?

द्वितीयः— त्रयोऽपि आङ्गलकलाशालां गच्छन्ति। तत्र यदध्याप्यते तदधीयते।

कृष्णः—न वेदम्?

द्वितीयः— न।

रामः—ब्राह्मणेन उपनीतेन का विद्या अध्येतव्येति शास्त्राणि विदधति?

द्वितीयः—वेदविद्याऽध्येतव्येति।

रामः—न चानेन शिरोमणिस्वामिना भवत्कुमारैश्च वेदोऽधीतः। तत्र का नाम शास्त्रस्थितिः। भवन्त एव हि शास्त्राणि तिरस्कुर्वन्ति?

प्रथमः—न तथा, आर्य। यद्यप्ययं शेषार्यः शिरोमणिः कृत्स्नं वेदं नाध्यैत तथाप्युपनिषदं पुरुषसूक्तादिकमुपयुक्तभागं चाधीतवानेव। एवमस्य कुमारा अपि कञ्चन वेदभागमध्याप्यन्त एव। अद्य लोकस्थितिः सर्वथा विपर्यस्ता। अस्माकं वृत्तिः कृशा। तेन जीवनोपयुक्तां विद्यामध्येतुं अस्मद्बाला निर्बद्धा भवन्ति। अथापि वेदस्यैकदेशमत्यल्पमपि वा अधीत्य ब्राह्मण्यं यथा रक्ष्येत तथा वैदिककुलजा आस्तिका जाग्रत्येव।

शक्त्यनुसारेण आपत्कल्पतयाऽपि वा किमपि कृत्वा शास्त्रविधिं परिपालयन्ति । न तु तत्रानादरं मात्रयाऽपि दर्शयितुमिच्छन्ति ।

(अन्तः 'को नु भोस्तत्र' । )

आर्य, अवसितभगवदाराधना आचार्यपादाः । अन्तर्गत्वा विज्ञापयामि भवतोरागमनं प्रतीक्षां च ।

# तात्पर्यान्तरम् ॥ (2)

लङ्कातो निवृत्तस्य भगवतो रामस्य मुनिवेषमपनीय राजवेषधारणं कृतं वर्णयन् महाकविः ।

तपस्विवेषक्रिययाऽपि तावद् यः प्रेक्षणीयः सुतरां बभूव ।
राजेन्द्रनेपथ्यविधानशोभा तस्योदिताऽऽसीत् पुनरुक्तशोभा ॥

इत्याह । अत्र मल्लिनाथव्याख्या एवं दृश्यते —

**तपस्वीति** । यो रामः तपस्विवेषरचनयाऽपि अत्यन्तं दर्शनीय एव बभूव, तस्य राजवेषरचनया उदिता या शोभा सा पुनरुक्तदोषा द्विगुणाऽऽसीत् ।

इति । इदमुक्तं भवति । तपस्विवेषेणापि रामः अत्यन्तं दर्शनीय एव बभूव, न त्वदर्शनीयः । तपस्विवेषस्तस्याननुरूपः । अथापि तेन तस्य शोभा न ह्रासमियाय । राजवेषस्तस्यानुरूपः । तेन धृतेन तस्य शोभा द्विगुणा बभूवेति । अस्मिन्नर्थे सुतरामिति, पुनरुक्तदोषेति च पदद्वयमिदं निहतस्वारस्यं भवति । दोषपदे स्थिते राजवेषधारणस्य शोभाद्वैगुण्यापादकतया गुणत्वेन योजनं सहृदयानां न हृदयङ्गमम् ।

भगवतो रामस्य गात्रशोभा लोकोत्तरा निरतिशया । तस्याः स्फुटतरप्रतिपत्तिः अननुरूपतया यो वेषो लोके प्रसिद्धः तस्य धारणेन भवति । तदुच्यते पूर्वार्धेन । सुतरां प्रेक्षणीयो बभूवेति । अनुरूपवेषधारणे तु न कश्चिदतिशयो भवति । अनाधेयातिशयत्वात् तस्याः शोभायाः । तेन राजवेषधारणोदिता शोभा कृतकरत्वात् पुनरुक्ताख्यदोषविशिष्टैव, इति तु युक्तं तात्पर्यम् ।

# प्रकृतिभेदः ॥

I

"सर्वोत्तमः"— ब्रूहि, किं ते कार्यम् ?

आगतः— स्वामिन एव सकाशमागतोऽस्मि । श्रीरामनवमीं प्रति कश्चिदुत्सवः कार्य इति अस्मद्ग्रामवासिनो जना निश्चितवन्तः। दरिद्रा एव ते सर्वे । अथापि श्रद्धालवः । शक्त्या संविधानं करिष्यन्ति । अत्र भवन्त आगत्य श्रीरामचरितमुपन्यस्य अस्माननुग्रहीतुमर्हन्ति ।

सर्वोत्तमः—रे । को नु भोस्तत्र ? (प्रविश्य)

किञ्चिद्दासः— (हस्ताभ्यां मुखं पिधाय) अयं दासः । किं करवाणि ?

सर्वोत्तमः—अयमस्मान् स्वग्रामाय आह्वयति । तत्र अस्मदर्थं यत् संविधेयं तदस्मै विशदं खण्डितं ब्रूहि । पश्चात् सङ्कटं मा भूत् ।

किञ्चिद्दासः— तथा । यथानियमनम् । (आगतं प्रति) । एहि महन् । किञ्चिदपक्रम्य भाषेवहि । आर्य, अस्मत्स्वामिभिश्चेत् तत्र आगन्तव्यं तर्हि तदुचितं सर्वं संविधानं भवद्भिः कार्यम् । 'अस्माकं शक्तिर्नास्ति । इयदेव शक्यमासी'दिति किमपि पश्चान्न वक्तव्यम् । अन्नपाचकः भक्ष्यपाचक इति द्वौ पाचकौ । अभ्यञ्जनाङ्गमर्दनादिकारी तीर्थाहरणवस्त्रधावनादिकारी चेति द्वौ परिचारकौ । पुस्तकवाचकः उक्तलेखक इति द्वौ पण्डितौ। आसनवाही एकः । व्यजनग्राही एकः । इत्येतावन्तः स्वामिभिः सह आगमिष्यन्ति .... .... ।

सर्वोत्तमः—(उपशृण्वन् स्थितः) सौम्य रे,

किञ्चिद्दासः—(धावित्वा उपसृत्य) अयमहं दासः ।

सर्वोत्तमः—किमये, एको व्यजनग्राहीति वदसि । घर्मकालोऽयम् । द्वयोः पार्श्वयोः द्वाभ्यां भवितव्यम् ।

किञ्चिद्दासः—तथा तथा । यथानियमनम् । तथैव तस्मै वक्ष्यामि । (अपक्रम्य आगतं प्रति) द्वौ व्यजनग्राहिणौ, न त्वेकः ; एतावन्तः स्वामिभिः सह आगमिष्यन्ति । तेषां सर्वेषां समग्रा सम्भावना कार्या । प्रकटनपत्रिका च सहस्रशो मुद्रयित्वा परितः प्रेषणीया । तत्र अस्माद् दिनात् प्रभृति एतद्दिनावधि श्रीरामनवम्युत्सवः प्रवर्तते । तत्र 'सकलविद्वत्खद्योतद्युमणि-सर्वोत्तमाचार्यवर्याः प्रत्यहमुपन्यसिष्यन्ति' इति स्थूलाक्षरैर्मुद्रणीयम् .... ....

सर्वोत्तमाचार्यः-- सौम्य रे, इयन्तं कालमस्मत्सन्निधौ स्थितोऽपि सम्प्रदायरहस्यार्थं न गृहीतवानसि । प्रकटनपत्रिकासु 'वयमुपन्यसिष्यामः' इति प्रथमं निवेश्य ततः परं भगवदुत्सवो निवेशनीयः । 'ज्ञानी त्वात्मैव मे मतम्' इति भगवतोऽपि परमोद्देश्या हि भागवताः । तस्मात् तेषां प्रथमं स्थानम् । जनाश्च बहवः भगवन्महिम्नोऽभिज्ञाः, न भागवतमहिम्नः । तस्मात् तत्प्रकाशनमस्माभिः तत्परतया कर्तव्यम् ।

किञ्चिद्दासः—तथा तथा । सम्यगनुशिष्टोऽसि । तथा तस्मै वक्ष्यामि ।

सर्वोत्तमः—किं वचनेन । त्वमेव प्रकटनपत्रिकामातृकां अस्मदुक्तरीत्या विलिख्य तस्मै अर्पय । प्रकटनपत्रिकायां मार्गव्ययार्थं रूप्येषु च आगतेष्वेव इतः प्रस्थास्यामह इति ब्रूहि ।

II

आगतः—प्रतिवत्सरमस्माद्ग्रामे श्रीरामनवम्युत्सवः प्रवर्तते। तत्र श्रीमद्रामायणोपन्यासाः संविधीयन्ते। ऐषमः स्वामिभिरागत्य वयमनुग्राह्याः ।

बालवृत्तिः— यदि श्रोतारः सन्ति तर्हि विदितं वक्तव्यमिति अस्माकं धर्म एषः। भगवद्गुणवर्णने परमो लाभोऽस्माकम् ।

आगतः— तत्र स्वामिनामर्थे किं किं संविधेयमिति ज्ञाते सौकर्यं स्यात् ।

बालवृत्तिः— मदर्थे न किमपि भवद्भिः संविधेयम्। अस्मत्सुहृदः केचित् सन्ति। तेषां गृहे कतिपयानि दिनान्युषित्वा प्रत्यागमिष्यामि। भगवदर्थे भवद्भिः सर्वो यत्नो विधेयः ।

आगतः— प्रकटनपत्रिकां मुद्रयामः। तदर्थं स्वामिनां नामविरुदादिकं ज्ञातव्यं भवति ।

बालवृत्तिः— किमिति वृथा व्ययं कुरुध्वे। यदि उपन्यासप्रकाशनमप्यावश्यकं मन्यध्वे, उपन्यासा भविष्यन्तीति केवलं निर्देशः क्रियताम्। किमस्मन्नाम्नः प्रकाशनेन ।

आगतः— स्वामिनां मनोवृत्तिरन्यादृशी । इतो मार्गव्ययाय इदमस्तु। अन्यत् तत्र समर्पयिष्यामः ।

बालवृत्तिः— न। भवानिदं गृह्णातु । उत्सवार्थे यदि किञ्चित् क्रेतव्यं, तदनेन क्रीयताम् । स्ववित्तव्ययेनाहमागमिष्यामि। पश्चाद्यथासौकर्यं भवतु ।

— —

# पुस्तकपरामर्शः ॥

1. स्तवरत्नत्रयम् । महामहोपदेशक कविकोकिल-पण्डितराज-महामहोपाध्याय के. एस्. कृष्णमूर्तिशास्त्रिणा मद्रराज्य-आस्थानकविना विरचितम् ।

इमं कविं प्रति यद् वक्तव्यं तत् पूर्वस्यां सञ्चिकायां एतत्कर्तृकस्य प्रकृतिविलासकाव्यस्य विमर्शावसरे उक्तमन्तः स्मः । अस्मिन् स्तोत्रकाव्येऽपि सुकविकाव्योचिताः सर्वे गुणा दृश्यन्ते । सरस्वतीं महालक्ष्मीं भगवन्तं श्रीनिवासं च प्रति प्रवृत्तानि इहत्यानि त्रीणि स्तवरत्नानि । आद्ये द्वये तयोर्देव्योः पादादिवर्णनं पुनरुक्तिप्रसङ्गं विना विधाय अन्ते कविः मानसीं पूजां कृत्वा आत्मनः श्रेयः प्रार्थयते । अत्र प्रत्येकं शतं श्लोकाः । भगवद्विषयके तृतीये स्तवे विंशत्यधिके द्वे शते श्लोकाः, यत्र कविः भूयिष्ठमात्मनः शब्दचित्रनैपुण्यं प्रदर्शयति । मत्तेभप्रभृतीनि प्रासयमकजटिलानि विविधानि विकटवृत्तानि अत्र निबद्धानि । यथाऽर्थचित्रे तथा शब्दचित्रेऽपि निरर्गलप्रसरा अस्य कवेः प्रतिभेति स्फुटमितोऽवगम्यते ।

---

2. आर्तिहरनृसिंहस्तोत्रम् । श्री प. रामदासेन (Anatandavapuram P. O., Tanjore Dist.) विरचितम् ।

विंशत्पद्यमयोऽयं स्तोत्रनिबन्धः । कष्टां काञ्चिदापदं गतः भगवन्तं लक्ष्मीनृसिंहं शरणमुपगम्य ततो मुक्तोऽयं कविः तदनुभवसमिद्धया महत्या भक्त्या इदं स्तोत्रं रचितवान् । एकैकः श्लोकः गाढां भक्तिं व्यनक्ति ।

मूढोऽपेक्षे यत उपकृतिं सोऽधुना मे विपत्तौ
बन्धुव्रातो यदपकुरुते मित्रवर्गः कृतघ्नः ।
यच्चाज्ञातः स्वयमुपकरोत्यागतः कोऽपि सेयं
लीला ते मां स्मरयति हरे सन्ततं त्वत्पदाब्जम् ॥

त्वद्दत्तेनाविकलवपुषा सम्पदा चाप्यसेवे
मत्वा मौढ्यात् सुहृद इति यान् विप्रियं तेऽपि कुर्वन् ।
सन्त्यक्तस्तैः सपदि विपदि प्रोद्गतायां विलज्जः
कारुण्याब्धे तव चरणयोरद्य दीनः पतामि ॥

TIRUPATI LIBRARY

इतीमौ द्वौ श्लोकौ कवेरार्तिहेतुं सूचयतः ।

स्वीयैः पापैरनुभवति मय्यापदं केऽपि मूढाः
युक्तं मत्वा क्षणमिममहो भूरि सञ्चिन्वतेऽघम् ।
एतेषां च स्वकृतदुरितैर्दुःखभोगो भवेच्चे-
दन्तर्यामिंस्तदुपकृतये प्रेरयेमां तदानीम् ॥

इति प्रार्थनां कुर्वन् श्रीरामदासः नूनमात्मनि भगवद्भक्तवृत्तिं सुसम्पन्नां दर्शयति । अन्ते श्रीनृसिंहप्रातस्स्मरणमिति पञ्च, प्रह्लादप्रशस्तिरिति च पञ्च श्लोका योजिताः सन्ति ।

---

### 3. BULLETIN of The Government Oriental Manuscripts Library, Madras.

Edited by T. Chandrasekharan, M. A., L. T., Curator.
Vol. V. No. I Price: Rs. 2.

अत्र अन्योक्तिमाला, नीतिसारकरु, नल्लन्दिगल् वंशावलि, परमात्मज्योति, परमपदप्रकाशावली, पानीपत बखर (The Battle of Paniput), रिसल्-ए- परमिन्-ओ-अरैस्-मलतिन्, इतीमे निबन्धाः क्रमेण संस्कृत, द्राविडी, आन्ध्री, कर्णाटी,केरली,महाराष्ट्री, पारसीक, भाषासु बद्धाः प्रकाशिताः ।

अमुद्रितपूर्वा इमे इह इदम्प्रथमं मुद्रयित्वा प्रकाश्यन्त इति जानन्तः सन्तः सन्तुष्येयुः । अत्र संस्कृतश्लोकमयी अन्योक्तिमाला 'अप्पय्यदीक्षितवंश्यश्रीमद्-आचान्-दीक्षितकविना प्रणीता' इति निर्दिश्यते ।

एकामेव मातृकामाश्रित्य महता परिश्रमेण परिशोध्य अयं प्राचीनपुस्तकशालाध्यक्षः श्रीचन्द्रशेखरार्यः इमां कृतिं प्रकाशितवानिति विदुषां प्रमोदस्थानमेतत् । इतोऽपि परिष्कारसापेक्षाणि बहूनि स्थलानि सन्तीत्यस्माकं भाति । I. 30 श्लोके 'आबाल्याद् दिवसश्रिया सह' इति 'कथयतां को वा पिधत्तां मुखम्' इति च, 36 श्लोके 46 श्लोक इव "नैतच्चेदपि सम्मतम्' इति, 50 अस्मिन् 'शोभनतुण्डैः शुकैः' इति, II. 3 अस्मिन् 'अन्योक्तिगर्भिता वाचः' इति, इत्यादि ।

अत्र 'निमीलयतु लोचने न हि तिरस्कृतो भास्करः' इत्यादि श्लोकद्वयं श्रीमद्वेदान्तदेशिककृतेः सुभाषितनीव्या उद्धृतं दृश्यते । तेन अन्येऽपि केचन श्लोकाः किं परकीया एवोद्धृता इत्यस्ति चिन्तयितुमवकाशः ।

---

Registered No. M 2300.

Book XXV ॥ श्रीः ॥ Nos. 9, 10, 11 & 12

47

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनिसद्मनि।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति॥

पु. २५] कलि ५०५३ नन्दन { वृषभ मिथुन कर्कट सिंह } सं ९, १०, ११, १२

# THE UDYANA PATRIKA.

A

SANSKRIT MONTHLY

May, June, July & August 1952.

For the rate of subscription please see inside

# UDYANA PATRIKA.

Annual Subscription Rs. Two only.
Do. With Sastraic Supplement Rs. 3—0—0

## उद्यानपत्रिका ॥

१. अस्या वार्षिकं मूल्यं द्वे रूप्ये । सानुबन्धायाः त्रीणि रूप्याणि ।
२. कन्यामासे साधारणसञ्चिका अनन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणसञ्चिकाः षट्सु मासेषु अनुबन्धसञ्चिकाश्च प्रकाश्यन्ते ।
३. ग्राहकीबुभूषद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम् ।
४. वर्षमध्ये ग्राहकीभवतामपि कन्यासञ्चिकादिरेव पत्रिका प्रेष्येत ।
५. एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन् । गद्यरूपेषु अधिकतर आदरः ।
६. प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसम्पादकाय प्रेषणीयाः ।
७. एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः । (संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण ।)
८. लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या ।

मुद्रणकारः— S. Vijayaraghavan,
*Proprietor,* The Srinivasa Press,
Thiruvaiyaru P. O., Tanjore Dt.

निर्वाहकसम्पादकः — *Mimamsarnava Mimamsakesari,*
*Panditaraja* D. T. Tatacharya Siromani, M. O. L.
Sri Venkateswara Oriental Institute
TIRUPATI.

## विषयाः ॥

1 श्रीवरदाभ्युदयचम्पूः ।
2 व्याजोक्तिरत्नावली ।
3 विवेककल्पलता (2) ।
4 संस्कृतग्रन्थजातम् ।
5 वैदिका विशेषाः ।
6 यथाभिमतम् ।
7 प्रकृतिभेदः ।
8 पुस्तकपरामर्शः ।
9 विषयसूची ।
10 प्रतिबोधनम् । (wrapper)

॥ श्रीः ॥

श्रीदेवाधिराजपरब्रह्मणे नमः।

श्रीवेङ्कटाध्वरिविरचिता

# श्रीवरदाभ्युदयचम्पूः ॥

[ हस्तिगिरिचम्पूः ]

कल्याणैकनिकेतनं तदनघं कालाम्बुदश्यामलं
चित्ते नृत्यतु शेषभूधरशिरोरत्नं चिरत्नं महः।
यस्योरस्यनिशं सुता जलनिधेर्यस्यास्ति तन्मेखला
पार्श्वे यस्य पदे च तत्प्रियतमा यत्तत्र शेते स्वयम् ॥ १ ॥

वैतण्डाचलमण्डनस्य कमलानाथस्य वेधस्सव-
स्निग्धस्वादुवपाविपाकरसिकं बिम्बाधरं भावये।
संभोगेष्वनुभूय यन्मधु वधूरम्भोनिधेर्जृम्भिता
सोदर्येऽप्यमृते कदाऽपि तनुते नैवादरं मेदुरम् ॥ २ ॥

आचक्रायुधमा च मामकगुरोराचार्यवर्गं भजे
यस्यान्तर्निगमान्तदेशिकयतिश्रेष्ठौ मुनिर्यामुनः।
रामस्त्वामरसेक्षणः स च मुनिर्नाथः शठारातिरि-
त्यन्तस्सन्तमसच्छिदः श्रुतिदृशामग्रेसरा जाग्रति ॥ ३ ॥

प्रख्यातः प्रणतार्तिहृद्गुरुरिति श्रीभाष्यकर्तुर्मुने-
र्यो माहानसिकस्तदुक्तिरसिकः श्रीमान् स यत्राभवत्।
वंशे तत्र हि वादिहंसजलदाचार्यादिभिर्भूषिते
यज्वाऽभूद्रघुनाथदेशिकमणिः श्रीश्रीनिवासेष्टिनः ॥ ४ ॥

तनयोऽस्य नयोदधेः सुधांशोर्विनयोन्मेषविशेषहृद्यविद्यः।
वरदाभ्युदयाभिधां यथार्थां कृतिमेतां वितनोति वेङ्कटार्यः ॥ ५ ॥

व्यायामं गमिता त्वलङ्कृतिपथे व्यापारिता व्याकृतौ
तर्कारण्यगतागतैः श्रमवती तन्त्राङ्गणे नर्तिता ।
त्रय्यद्रेरधिरोपिता च शिखरं तर्षादियं भारती
गम्भीरं गजभूधरेश्वरकथागङ्गाझरं गाहते ॥ ६ ॥

असावपगुणाऽपि मे हरिकथासुधाधारिणी
कृतिर्दनुजभिद्गुणग्रहणलालसैर्गृह्यते ।
सुरप्रवरतुष्टये सुरभिदुग्धबद्धादरै-
र्नरैर्यजनतत्परैर्न कलशी किमाद्रीयते ॥ ७ ॥

करिगिरिपतेर्वाचां नेतुः कथाप्रथनोचिताः
कलयति गिरो लब्धुं चिन्तां कविर्न तदाश्रितः ।
वरुणतरुणीवारिक्रीडातटाकतटान्तिक-
प्रमदवनभूवास्सेकाय प्रया(य)स्यति किं जनः ॥ ८ ॥

व्यासे वेदशिरोगुरौ च चरितं वेतण्डशैलेशितु-
र्व्यक्तं विस्तृतमुक्तवत्यपि कृतावस्यां प्रवृत्तस्य मे ।
न व्रीडा भवति स्फुरत्यपि रवौ नाथस्य तस्योत्सवे
गह्नन्तः करदीपिकामनुदिनं किं नु त्रपन्ते जनाः ॥ ९ ॥

कीर्तिं धत्ते किल विदधती गीरसौ धीरसौख्यं
किं नश्छिन्नं न फलति यथाजातचेतस्सुखं चेत् ।
दीप्तिर्भानोः प्रजनयति या दृष्टिपुष्टिं जनानां
दुष्येत्सा किं यदि तु न भवेत् तोषिका मूषिकाणाम् ॥ १० ॥

सत्यव्रतस्य विभवं प्रभवं च तस्मिन्
शौरेरिभाद्रिशिखरेऽतिशयं च काङ्क्षया ।
पृष्टो नतेन भृगुणा सुगुणाम्बुराशिः
प्रोवाच नारदमुनिर्भुवनैकबन्धुः ॥ ११ ॥

कदाचिदहमुदारविभवनिदानगदाधरसाक्षात्काराय स्पृहयालुः, तद-नुगुणामन्तःकरणशुद्धिं लब्धुकामः, तामरसबान्धवकान्तिबृन्दमन्देतरमन्दा-क्षकरपद्मरागदीधितिवितति सरस्वतीसंवलितवलभिदुपलशकलपटलविग-

ळदविकलमयूखयामुनौघसङ्गमचारुगङ्गं मेरुशृङ्गमध्यासीनं, योगप्रयोगयोगानुयोगार्थमागतै- र्याज्ञवल्क्यप्रष्ठैर्गरिष्ठै- र्निर्मलधर्महर्षिभि- र्महर्षिभिर्वृतं, तृषितपथिकमिव सरस्वत्यासक्तचित्तं, सुन्दरीनयनमिव श्रुत्यन्ताकलननिपुणं, रामायणमिव बहुलसर्गसम्पादितविख्यातिकं, पावनवनप्रदेशैरिवाश्रान्तमृगाक्रान्तैः, नर्तकैरिव पुण्यगीतीनां मञ्जुलयजुषामास्पदैः, त्रिदिववनप्रदेशैरिव सामरक्षणस्थानैः, मानधनैरिव बहुमन्त्राश्रितैः, यज्ञवाटैरिव ब्राह्मणालङ्कृतैः, अदोषराजसदोभिरिवान्तर्वाण्याकलितैः अशेषविद्यासदनैः वदनैरुपदिश्यमाननिस्समाधिकसमाधिकं, अभिजातमपि नाभिजातं, मम पितरमपि पितामहमुपसृत्य प्रणिपत्य च सविनयमेवमवोचम्— भगवन्निमां मम विज्ञापनामनाकुलमनाः श्रृणोतु भवान् ॥ १२ ॥

प्रापिताऽपि पुरुषोत्तमान्तिकं प्राप्य सम्प्रति महत्तमं तमः ।
कामचापलवती मतिर्मम स्वैरिणीव बहिरेव धावति ॥ १३ ॥

ततश्च,

गदाधरस्यैष पदारविन्दमालानमालम्ब्य मनोगजो मे ।
यथा न चाञ्चल्यमुपैत्युपायं तथा विधातस्त्वमुदीरयेथाः ॥ १४ ॥

एवं मया पृष्टः स्रष्टा "भगवदभिव्यक्तिक्षेत्रे स्वाश्रमोचितकर्मानुष्ठानेनैव मृदितकषायविशेषया मनीषया पुण्डरीकाक्षमहं साक्षादकार्षम । ततश्च पुण्यक्षेत्रविशेषेषु निर्मलकर्मलक्षणपद्मेक्षणसमाराधानमन्तरेण नान्तःकरणशुद्धि"रित्यभिधाय, वेधाः स्वयमागत्य सत्यव्रतक्षेत्रं हयमेधेन माधवमाराधयन् यथा तमपरोक्षमीक्षामास, तथा स कथामशेषामभ्यधान्मह्यम् ॥ १५ ॥

या कथा लोकधात्रैव वर्णिताऽऽकर्णिता मया ।
कथये तामहं तुभ्यं निधये तपसां मुदा ॥ १६ ॥

तथा हि—

पुरा मुरारिं चतुराननस्तं साक्षाच्चिकीर्षुस्स तपांसि तेपे ।
तथाऽपि चेतो न दधावनन्ते मुधा सुखेष्वेवमधावदेषु ॥ १७ ॥

विभाव्य चित्तं विषयातिदूषितं
विधातरि ध्वस्तमनोरथे सति ।
विहायसः काऽपि विधून्वती शुचं
विजृम्भिता वागशरीरिणी तदा ॥ १८ ॥

आहरेरा हरेर्दृष्टेरश्वमेधसहस्रकम् ।
न चेन्न चेतश्शुद्धिस्ते भविता भवितापहृत् ॥ १९ ॥

यदि पुनरथोक्षजसाक्षात्कारत्वरया हयमेधसहस्राचरणविलम्बं न सहसे तदा निरपायोऽयमुपायो गृह्यताम् ॥ २० ॥

तुण्डीराख्यं मण्डलमस्ति स्पृहणीयं
तत्र क्षेत्रं राजति सत्यव्रतसंज्ञम् ।
तत्संप्राप्य त्वं हयमेधेन यजेथा-
स्तत्रैकं यत् कर्म सहस्रं फलतीति ॥ २१ ॥

एवमशरीरिणीं वाणीमाकर्ण्य परमानन्दतुन्दिलमना वनजासनः समुत्थाय मेरुशृङ्गात् सद्य एव सत्यव्रतक्षेत्रमधिगत्य तत्रत्यमत्यन्ताश्चर्यतपश्चर्यापरमुनीन्द्रमण्डलं कुण्डलिवरपरिमण्डितप्रतीरमनन्तसरोवरमालोकयन् पार्श्वस्थान् परमर्षीनेवमवोचत– 'भो भोस्सर इदं पश्यन्तु भवन्तः' ॥ २२ ॥

प्रविकस्वरपद्मरागदीप्तो-
परिभागं महितं रसाश्रयत्वात् ।
सुखसुप्तजनार्दनं सरो भा-
त्युचितानन्तसमाख्यमच्छरूपम् ॥ २३ ॥ इति

प्रत्यूचुश्चैनं परमर्षयः ॥ २४ ॥

घनशोभनाभिजाता-
म्बुजाभ्युदयिनी समाकलितहंसा ।
ननु सर्वतोमुखाढ्या
भवतस्तनुमनुकरोति सरसीयम् ॥ २५ ॥

"If during this winter while I have been profusely pouring down the showers, these wretched creatures have not been fed by me even with a single drop, I shall surely remember them during the next winter season". Presumably thus resolving with pompous self-importance you have cleared out. But alas! oh cloud! you do not know that the Chataka flocks are dying even now. 110

दानामोदझरीमिषेण भवतैवाहूयमाना वयं
संप्राप्ताः कुसुमान्युपेक्ष्य विगलन्माध्वीकहृद्यान्यपि ।
प्राप्तान् गाययसीह नः श्रुतिसुखं मत्तेभ, तृष्णार्दितान्
किञ्चिन्नोपचरस्यहो न च वदस्यस्तीति वा नेति वा ॥१११॥

Only upon being invited by yourself through the spreading fragrance of the fastflowing rut, we arrived here, neglecting even the blossoms overflowing with honey. Ah! arrogant Elephant! you induce us who have thus arrived, to sing to you in a manner pleasing to your ears. But alas! you show no hospitality towards us who are dying with thirst. And worse than that, you say to us neither the affirmative nor the negative answer (in the matter of our expectations from you). 111

सन्त्वापः परितः प्रसन्नमधुराः पूताः सुशीताश्च वा
तासामेव भवत्त्वथापि जनिमत्सामन्यसंसेव्यता ।
कामं क्षारजलो महोदधिरपि क्षीणं नु किं तावता
कस्तस्यापवदत्त्वपारमहिमश्लाघाधिरूढं यशः ॥ ११२ ॥

There are, indeed, waters to be had everywhere which are clear and sweet, pure and exceedingly cool. And certainly all living beings invariably resort to them alone for refreshing themselves. It is also on the other hand empha-

tically true that the great ocean holds its water all saline. But, with all that, what is the loss to the ocean ? Who can deny to it the reputation based upon its immeasurable greatness which compels admiration ? 112

आदत्ते बिसमेव तच्च विरलं तुच्छैर्न संबध्यते
यानं विभ्रमशालि कौशलमपि क्षीरोदभेदग्रहे ।
वासः पद्मवने कटुं न सहते मेघारवं, साधु भोः
कोऽयं दाम्भिकवृत्तिरात्ममहिमारोपप्रगल्भो भुवि ॥ ११३ ॥

"I am referring, to that one, who takes as his food only the lotus fibre and even that only occasionally ; who never mixes with the mean ; whose gait is charmingly sportive ; whose special skill consists in his separating water from milk ; whose abode is in the lotus field and who cannot endure the rudely shocking roar of the cloud" "Well, sir ! I wonder who, on earth, may be that sedulous humbug who is such an adept in utilizing every means to magnify his own importance"? 113

अम्भोधिः सरितांपतिर्यदि भवान् रत्नाकरोऽपि स्वयं
गाम्भीर्यैकनिधिश्च किन्नु शमयन्त्येते गुणा नस्तृषाम् ।
ये मथ्नन्ति भवन्तमस्तकरुणं गृह्णन्ति येऽलक्षितं
तेषामेव हितोऽसि सन्ति किल नः सर्वत्र नद्यः शुभाः ॥११४॥

If you are the unlimited reservoir of all waters the lord of the streams, and verily the store-house of all precious stones, and also unparallelled for your bottomless depths,—can such distinctions in anyway serve to quench our thirst ? you are useful only to those who churn you mercilessly or draw from you stealthily. But to entertain us hospitably, there are everywhere the delightful streams (to which we shall make haste to resort). 114

अर्धं यद्वपुरङ्गनामयमभूद्गङ्गा यदूढा शिर-
स्याकृष्टा मुनिसुभ्रुवो यदवशं यद्धर्षिता मोहिनी।
तत्सर्वं विनिपात्य मन्मथजयी लोकैस्त्वमुद्घुष्यसे
सोऽनङ्गस्त्वमधीश्वरो जडधियश्चामी किमत्राद्भुतम् ॥११५॥

Ignoring these obvious facts, namely- that you have allowed one half of your form to be taken up by your consort, that you carry on your head Ganga (another woman) that you charmed the wives of the Rishis (of Darukavana) and abducted them, and that you ravished Mohini (Vishnu in the form of a celestial woman)—people glorify you as the vanquisher of Cupid! But why need we be surprised at this? He (cupid) is formless (therefore incapable of protesting); you are the lord of lords (none can dare to blaspheme you) and the people are credulous and dull. 115

सर्वस्यास्ति दशाविवर्त इति भोः सोढाऽस्मि च प्रावृषं
किं त्वारोपितबन्धुभाववितथस्फीतोन्नतं मौकलेः।
असत्पोषितकः कलं कलरवाभिख्यो मधौ गायति
प्रेम्णा पश्यत चैनमित्युपहितं सङ्घे वचो दुःसहम् ॥ ११६ ॥

Oh sir, I shall endure winter, for no one is exempt from the ups and downs of life. But I cannot endure these words, namely 'This one is our ward. He is known for his sweet voice. He sings melodiously during the spring season. It is fit that you take kindly to him'—spoken by the crow in public (patronisingly introducing me to a gathering of the feathered species)— words emptily big and lofty with an impertinent claim of affinity.' 116

विस्तारैः सिकतामयैर्निरवधिं मामाश्रय स्वेच्छया
दासेरप्रवराश्चरन्ति परितस्तृप्ता न किं पश्यसि ।
खर्जूरैः किमु कार्यमम्बु रुचितं किं दीर्घिकाणां च वा
स्निग्धं दग्धमरोरितीह वचनं विश्वस्य नष्टा वयम् ॥११७॥

'You can freely come under my protection, for, see how boundlessly vast I am in my sandy expanses; look how contentedly roam here in every direction the most exalted camel-lords! There are dates in plenty here if you seek them. If you would like to taste the sweet waters of the pools (of the oases) find them here"—We reposed our trust on these sweet words of the accursed Desert and were lost (in the desolation). 117

कातर्यात्कलहंससारसरुतैर्वाचालितां दीर्घिकां
हित्वा दूरविवर्तिनीं मृगवधूं तृष्णाऽर्तितामाकुलाम् ।
दूराल्लोलमरीचिकाभ्रममुपन्यस्यानुकृष्याघृणः
कस्माद्दग्धविधे कियन्तमथवा कालं मुधा हिंस्यसि ॥११८॥

Oh devilish Destiny! why have you mercilessly enticed the female deer,—who due to extreme timidity avoided the lotus lake, noisy with the voices of the swans and the cranes and fled far far away in confusion with her throat being parched by thirst — exhibiting the false mirage rolling at a distance before her? And say how long you are going to vex her thus to no purpose? 118

सन्तापग्लपितं व्यधत्त भुवनं ग्रीष्मो दुरूष्मोद्धतः
प्रावृड्दुःश्रवगर्जितैः प्रतिभया सन्तर्जयामास नः ।
सर्वस्यापचितिं ततो द्रुमनदीमुख्यस्य चक्रे शर-
द्धेमन्तोऽपकरोति न स्फुटमहो लोकः किमस्राविलः ॥११९॥

# उद्यानपत्रिका ॥

"अन्या वाचो 152 विमुञ्चथ"

वेदापहारविक्रोशद्वेधःखेदविमर्दिनम्
पण्णातीरपरिष्कारं पारिजातमुपास्महे ॥

पु. २५] कलि ५०५३ नन्दन { वृषभ मिथुन कर्कट सिंह } सं ९, १०, ११, १२

# विवेककल्पलता (2) ॥

प्रपूर्वसञ्चिकायां अनेन शीर्षकेण बहूनां विषयाणां विवेचनमकार्ष्म। तत्र केषुचित् यथाशीलं पुनर्विवरणमपेक्षन्ते । तदिदानीं क्रियते ।

1) यज्ञे धातुरुदित्वरः स वरदः श्रीहस्तिशैलेश्वरः
स्वीये वाहनमण्टपे परमया प्रीत्या यमास्थापयन् ।
वारंवारमनुग्रहं प्रकटयन् विद्योतते तादृश-
प्रख्यातामितवैभवो गुरुवरो मे सन्निधत्तां हृदि ॥

इत्यत्र यत्तच्छब्दयोरसाङ्गत्यमदर्शयाम । अगत्या तदङ्गीकुर्वन्ति । स्थितमविवेकं प्रच्छादयितुकामाः समाधानमाहुः । यच्छब्दप्रतियोगी तच्छब्दोऽध्याहर्तव्यः—स गुरुवरः, इति । तादृशेति तच्छब्दस्तु 'आस्थापयन् अनुग्रहं प्रकटयन्' इति पूर्वोक्तार्थान्तरपरामर्शीति किमवद्यमिति । अत्र विवेकिनो मन्येरन् बत वाक्यासामञ्जस्यज्ञानेऽपि महती वाक्यव्युत्पत्तिरपेक्षितेति । वाक्यरचनाया हि श्रोतुरर्थप्रत्यय उद्देश्यः । काव्ये रसोदयश्च । तत्र प्रतिघातो येन भवति स सर्वो दोषः । सर्वथा परित्यक्तव्यः। यस्य कर्तुर्वाक्ये एवंविधो दोषो भवति स वाक्यरचनायामकुशलः, अव्युत्पन्नः । प्रथमं यच्छब्दं शृण्वन्तो हि उपरि तच्छब्दो भविष्यतीति प्रतीक्षमाणाः तस्मिन् श्रुते यच्छब्दार्थ एवेह प्रतिनिर्दिष्ट इति झटिति निश्शङ्कं प्रतिपद्यन्ते । ततोऽनन्वयप्रतीतौ उत्पन्नां प्रतीतिं बाधित्वा अध्याहारार्थान्तरकल्पनादिक्लेशमनुभवन्ति ।

स्वाधीने शब्दप्रयोगे किमित्येवं क्लिष्टरचनाप्रवृत्तिः । अविवेको हि केवलोऽत्र निबन्धनम् । 'प्रीत्या हि यत् स्थापयन्' इति वा 'तादृशः प्रख्यातामितवैभवो गुरुवरः' इति वा कृत्वा श्लोकोऽनुवाच्यताम् । अहङ्कारविगमे विशेषः प्रस्फुरेत् । 'तादृशवैभवैः' इत्यन्यत्र श्रुतं नेत्रे निमील्य स्वकृतौ दुष्प्रयुक्तं चेदविवेकी आत्मा हि उपालब्धव्यः । किमितरेभ्यः क्रुद्ध्वा । कृतज्ञता तु प्रकाशनीया ।

आद्ये प्रकारे मण्टप इति सप्तम्युपपत्तिरपि भवति । हिशब्दस्तु अष्टादशश्लोक इव सार्थकः कार्यः । अथवा पादपूरणमात्रफलोऽपि नातीव दुष्यति । न ह्यत्र तथा गुरुर्दोषः यथा अष्टाविंशे श्लोके 'अस्मिन्, इह' इत्युभयोः प्रयोगे ।

अथ यच्छब्दप्रतिनिर्देशकः 'स गुरुवरः' इत्यश्रुतस्तच्छब्दोऽध्याहर्तव्य इति यद्वदन्ति, तत्र अस्ति किञ्चिद् विवेक्तव्यम् । यच्छब्दप्रयोगस्थले तावत् अवान्तरवाक्यद्वयमवश्यम्भावि–यं पश्यसि, तमानय–इति । अस्मिन् अवान्तरवाक्यद्वये यच्छब्दः प्रथमवाक्ये प्रयुक्तः । 'तमानय, यं पश्यसि' इति क्रमविपर्यासे उत्तरवाक्ये स प्रयुक्तो भवति । अत्र प्रथमे विन्यासे तच्छब्दोऽवश्यं प्रयोक्तव्यः । चरमे तु परित्यक्तुं शक्यः । युक्तं 'आनय, यं पश्यसि' इति प्रयोक्तुम् । न तु 'यं पश्यसि, आनय' इति । इदमुक्तं काव्यप्रकाशे सप्तमोल्लासे—

> यच्छब्दस्तूत्तरवाक्यानुगतत्वेनोपात्तः सामर्थ्यात् पूर्ववाक्यानुगतस्य तच्छब्दस्योपादानं नापेक्षते । यथा–साधु चन्द्रमसि पुष्करैः कृतं मीलितं यदभिरामताधिके । प्रागुपात्तस्तु यच्छब्दः तच्छब्दोपादानं विना साकाङ्क्षः । यथा तत्रैव श्लोके आद्यपादयोर्व्यत्यासे ।

इति ।

कमप्याद्यं गुरुं वन्दे कमलागृहमेधिनम् ।
प्रवक्ता छन्दसां वक्ता पञ्चरात्रस्य यः स्वयम् ॥
यस्य सारस्वतस्रोतो वकुलामोदवासितम् ।
श्रुतीनां विश्रमायालं शठारिं तमुपास्महे ॥

इत्याचार्याणां प्रयोग इहावधेयः ।

2) एवमेकधा यत्तच्छब्दसाङ्गत्यमुपपादितवन्तः तावति विरताश्चेत् शोभनमभविष्यत् । श्रीकूरेशकृतसुन्दरबाहुस्तवात्तु स्थलद्वयमुदाहृत्य

तादृशमेव प्रकृतमिति वदन्तः पुनरपि गाढमविवेकं प्रकाशयन्ति।

येष्वेकस्य गुणस्य विप्रुडपि वै लोकोत्तरं स्वाश्रयं
कुर्यात् तादृशवैभवैरगणितैर्निस्सीमभूमान्वितैः
नित्यैर्दिव्यगुणैः ... ...

इतीदमेकं स्थलम्। अत्र 'येषु' इति ये केचन गुणा निर्दिष्टाः त एव 'तादृशवैभवैः' इत्यत्र तच्छब्देन परामृश्यन्त इति स्फुटमेतत्, उपपन्नं च। 'तद्गुणतुल्यवैभवैरपरिमितैर्दिव्यगुणैः' इति ह्यत्रार्थः। न चात्रानुपपत्तिलेशोऽप्यस्ति। प्रकृते तु 'यमास्थापयति तत्तुल्यवैभवस्यान्यस्य व्यक्तिविशेषस्य विरहात् अपरिहार्या दुस्स्थितिः।

यत्कल्पायुतभोगतोऽपि कृशतां यायान्न, तावत्फलं
येष्वेकस्य तथाविधैः सततजैरंहोभिरुत्सीमभिः।

इत्यपरं स्थलम्। अत्रापि "यत् फलं कृशतां न यायात्, तावत् तत्तुल्यपरिमाणं फलं येष्वेकस्य, तादृशैरंहोभिः" इत्यर्थो वाऽन्वयो वा सर्वः सुस्थ इति कृतं विस्तरेण।

3) **यमास्थापयन्**। तिष्ठतिरकर्मकः। गुरुवरो मण्टपे तिष्ठति। मण्टप इत्यधिकरणे सप्तमी। आङ्पूर्वकश्चेत् तिष्ठतिः प्रयुज्यते अधिकरणस्यैव कर्मसंज्ञा भवति। 'अधिशीङ्स्थासां कर्म' इतिवत्। तस्मात् 'मण्टपमातिष्ठति' इति प्रयोगः। आतिष्ठेभम्, केवलं धर्ममास्थितम्, एकमप्यास्थितः सम्यक्, महेन्द्रमास्थाय, इत्यादिश्च। वैकुण्ठमधितिष्ठति, आवसति, इत्यादिवत्। अयमेव आतिष्ठतिः यदि णिजन्तः प्रयुज्यते तर्हि तत्र प्रयोज्यकर्ता कर्म भवति। न तु तेन अधिकरणकर्मणो निवृत्तिः। अननुशासनात्। मुक्तो वैकुण्ठमावसति। तं वैकुण्ठमावासयति हरिः इत्येव भवति। तदिह 'यं वाहनमण्टपमास्थापयन्' इति भाव्यम्।

आङ्पूर्वकस्य स्थाधातोः प्रयोगे अधिकरणस्य कर्मत्वं भवतीत्यत्र प्रमाणतया 'महेन्द्रमास्थाय' 'आस्थितः कुन्तशाखाम्' इत्यादयः सम्प्रतिपन्नाः प्रयोगाः प्रदर्शिताः। अत्र कैमर्थ्यप्रश्नो महतोऽविवेकस्य फलम्।

'यमुनाकूले कुन्दशाखामास्थितः' इति सप्तम्याः कथमुपपत्तिरिति चेत् का नाम तत्रानुपपत्तिः। अन्वयविवेकस्तु सम्पाद्यः। न हि 'यमुनाकूले आस्थितः' इत्यन्वयः। अपि तु 'यमुनाकूले स्थिता या कुन्दशाखा

तामास्थितः' इति। आस्थित इत्यत्रैवान्वयो विवक्षित इति चेत् अनुपपन्नैव सप्तमी। "यमुनाकूलं कुन्दशाखां चास्थितः' इत्येव प्रयोक्तव्यम्।

एतेन 'रामः अयोध्यायां प्रासादे मञ्चमास्थापितः' इत्येतत्साधुत्वमपि व्यक्तम्। यत् पुनरत्र मञ्चमित्येतदप्रयुज्य 'राममयोध्यायामास्थापयत्' इत्यपि वचनं साध्विति, तदविवेकविजृम्भितम्। आयोध्यायां वा स्थापनमत्र विवक्षितम? तत्स्थे मञ्चे वा? आद्ये सप्तम्यनुपपत्तिः स्फुटा। अन्त्ये विवक्षितार्थवाचिपदाप्रयोगात् वाक्यस्य न्यूनपदत्वं दोष इति विवेकः सम्पाद्यः।

यो हि कश्चिद्ब्रूयात्–'रामः पश्यामि' इत्येतत् साध्वेव। 'रामोऽस्ति, तं पश्यामि' इत्यत्र 'अस्ति, तम्' इति पदद्वय कण्ठतोऽनुक्त्वा 'रामः पश्यामि'इत्युच्यते। तत्र किमवद्यमिति, तस्य यावान् विवेकोऽन्यो वा स एषामपि सम्पन्न इति हि पश्यामः।

अथ 'अकथितं च' इति सूत्रविषयं प्रस्तुत्य किमपि लिखन्ति। तस्य प्रकृतस्य च नास्ति यः कोऽपि सम्बन्ध इति विवेक्तव्यम्। दुहादिकतिपयधातुमात्रविषयं हि तदनुशासनम्। 'गोर्दोग्धि पयः' इति प्रयोगः साधुः। तत्र गोरपादानत्वाविवक्षायां कर्मसंज्ञा विधीयते। गां दोग्धि पय इति प्रयोगः फलम्। न च आतिष्ठतिः परिगणितेषु धातुष्वन्तर्भूतः। न चात्र अधिकरणत्वाविवक्षायां कर्मसंज्ञाऽनुशिष्यते। अधिकरणमेव कर्मसंज्ञं भवतीति विध्यभ्युपगमात्।

अघ्रातपूर्वानभियोगगम्यान्
अतीतसङ्ख्यानतिमात्रहृद्यान्।
अर्थानुदारानभिदध्महे तान्
बोद्धुं तु नैषां बत भाग्यमस्ति॥

'वैकुण्ठे अधिवसति' इति प्रयुज्य 'कथं सप्तमी? द्वितीयया हि भाव्यम्' इति प्रश्ने 'राजानं द्रव्यं याचते' इत्यादिद्विकर्मकस्थले' राज्ञि द्रव्यं याचते' इत्यादयोऽपि प्रयोगाः साधव इत्येतत् शब्दज्ञान् प्रणिपत्य ज्ञातव्यम्। 'विवक्षातः कारकाणि' इति निस्सङ्कोचं प्रतिभाषितुमुत्सहन्ते। अहो बत पाण्डित्यस्य दुर्दशा।

अगत्या कर्तव्यतया आपतितस्य परोक्तिदूषणस्य प्रकाशनमस्माभिः

'अभिज्ञैश्चिन्तनीयम्' 'आलोचनीयम्' इति सात्त्विकभाषया क्रियते स्म। तमःकाष्ठाप्रनष्टचेतसामियं दुरवगमा। अथापि अतिप्रवृद्धस्य तमसः किं मात्रयाऽपि वा ह्रासोऽस्तीति जिज्ञासमानाः परीक्षार्थं तदा तदा स्वभावसिद्धां स्वरसप्रवृत्तां च ईदृशीं भाषामनिरुन्धाना उपयुञ्ज्महे। परे तु आसु परीक्षासु न परं पराजीयन्ते अपि तु आत्मनि तमोगुणं उत्तरोत्तरं दशशतसहस्रगुणमभिवृद्धमाविष्कुर्वन्ति।

क्षमया हि समायुक्तं मामयं मकरालयः।
असमर्थं विजानाति धिक् क्षमामीदृशे जने॥

इतीदं भगवतो रघुनन्दनस्य वचनं अस्माकं स्मृतिपथमानीय स्थापयन्ति।

4. **यस्मै नतिः श्रेयसी।** अत्र श्रेयसीति पदं अभिमतफलप्रदेत्यस्मिन्नर्थे अवाचकमित्यवोचाम। दुस्समाधानं किमपि वक्तुमुद्यममकृत्वा इदमभ्युपगच्छन्तीति पश्यन्तः सन्तुष्यामः। किन्तु एवं स्फुटमभिधाने आर्जवं मात्रया अवलम्बितं स्यादिति बिभ्यतः जन्मसिद्धमनार्जवं दृढं रक्षितुकामाः "नायं वाच्यार्थः। अपि तु तात्पर्यार्थः" इति किमपि अहृदयमभिदधति। एभिरुक्तस्तात्पर्यार्थः 'त्वं प्रणमतां भद्रप्रदः' इत्ययम्। मूले 'यस्मै' इत्यस्य स्थाने इह 'त्वम्' इत्येतत् प्रयुक्तम्। 'नतिः' इत्यस्य स्थाने 'प्रणमताम्' इति। 'श्रेयसी' इत्यस्य स्थाने 'भद्रप्रदः' इति। तदिह नतिप्रधाने मूलवाक्ये स्थिते गुरुप्रधानं विवरणवाक्यमित्येतावन्मात्रेण तात्पर्यार्थत्वं सुस्पष्टं प्रकाशते। पदार्थस्तु सर्वो वाच्य एव। पूर्वोत्तरवाक्येष्वपि वाच्य एव पदार्थः सर्वः स्थितः। तस्मात् तात्पर्यार्थ उक्त इत्यनृतवाद एवायमविवेकच्छादनाभिसन्धिप्रवृत्तः।

अथ पृच्छामः। तात्पर्यार्थो हि विवक्षितोऽर्थः। तस्य 'यस्मै नतिः श्रेयसे' इति साक्षादभिधाने शक्ये किमिति वक्रमार्गाश्रयणम्। आहुर्हि 'ऋजुमार्गेण सिद्ध्यन्तं को हि वक्रेण साधयेत्' इति। 'अस्मदिच्छैव नियामिका। कोऽत्र पर्यनुयोग' इति चेत् अविवेकसाम्राज्यमेतत्। कवनमार्गे हि वक्राभिधानं सर्वत्र सप्रयोजनम्। अन्यथा क्लिष्टताख्यदोषप्रसङ्गात्। कवेरसामर्थ्यप्रतीतिकरत्वाच्च। तदवश्यं केनचित् प्रयोजनेन भाव्यम्। तच्च नास्तीति।

असिद्धिश्चास्य तात्पर्यार्थस्य। 'यस्मै नतिः श्रेयसी' इत्युक्ते हि, नन्तव्याय यस्मैकस्मैचिन्नतिः क्षेमप्रदेति इममर्थं सिद्धं कृत्वा 'अन्येभ्यो

नन्तव्येभ्यो या नतिः तामपेक्ष्य यस्मै नतिः प्रशस्ता' इति इममर्थं श्रोतारः प्रतियन्ति । तत्र कुत एवमित्याकाङ्क्षा उत्तिष्ठति । तदनुगुणेन कल्पितेन केनचिदर्थेन शाम्यति च । पूर्वसिद्धस्य क्षेमप्रदत्वार्थस्य तु न तदा आकांक्षा वा कल्पना वेति महानत्र विवेकः कार्यः ।

अत्यल्पोऽपि हि विषयो
विचार्यमाणस्तथा महान् भवति ।
मग्ना यथाऽन्धकारे
भजन्ति कोपैकशरणतामज्ञाः ॥

'श्रेयानित्यस्य श्रेष्ठ इत्यर्थः' इत्याहुः । व्याख्येयं पदं ईयसुन्नन्तम् । व्याख्यानपदं तु इष्ठन्नन्तम् । कथमिदं युक्तमिति बत विवेको नास्ति । अस्ति तु श्रीमद्गीताभाष्ये 'यच्छ्रेय एतयोरेकम्' इत्यत्र 'श्रेयः श्रेष्ठ'मिति विवरणम् । तत्र तत्त्वं व्याख्यानतो वा अभिज्ञेभ्य आचार्येभ्यो वाऽवगन्तव्यम् ।

यः कोऽपि विषयोऽस्माभिरुक्तः क्षेप्यो न हेलया ।
यदि स्वात्मा न कर्तव्यो दुरन्तक्लेशभाजनम् ॥

5) **मे सन्निधत्तां हृदि** । शार्दूलविक्रीडितपादे चरमभागारम्भे एवं 'मे' इत्येतत्प्रयोगो न युज्यत इति काव्यज्ञशिक्षयाऽधिगन्तव्यं सूक्ष्मं विषयमुपादिशाम । तत्र

असङ्गतं यद्बहु विस्तरेण
व्यामोहनायाल्पधियां वदन्ति ।
तत्सर्वमत्यन्तमुपेक्ष्य साक्षात्
समाधिमुक्तं परिशीलयामः ॥

'वेदान्ताचार्यवर्यो मे सन्निधत्तां (सदा) हृदि' इत्यन्यत्र स्थित एवायं 'मे सन्निधत्तां हृदि' इति पदसमुदायः इह प्रयुज्यते । न त्वस्माभिः स्वातन्त्र्येण प्रयुक्तः । न च अनुवादे यथास्थितं कर्तव्ये दोषः कश्चिदुद्भावनमर्हतीति समाधानमाहुः । अत्रापि विवेकः सम्पादनीयावस्थ एव दृश्यते ।

सावधानं श्रोतव्यम् । 'वृधातित्याह' इत्यस्मिन् श्रुतिवाक्ये इतिशब्दशिरस्को वृधातुशब्दः शब्दस्वरूपमेवाह, नार्थान्तरम् । तस्मात् तत् शब्दस्वरूपं यथा वर्तते तथैव अनुवदितव्यम्, न त्वन्यथा । धावति वाजमित्यादौ धावत्यादेः स्वस्वरूपातिरिक्तार्थान्तरपरत्वात् स्वरविशेषविधिः

प्रवर्तते। इदं विविच्य बुद्धौ धार्यम्। अविस्मरणीयं च। प्रकृते 'मे सन्निधत्तां हृदि' इत्येतत् एतच्छब्दानुपूर्वीपरं वा तत्तत्पदार्थपरं वा?

'मे सन्निधत्ता'मिति नैतदादौ
पादस्य युक्तं कविभिः प्रयोक्तुम्।

इत्यत्र 'मे सन्निधत्ताम्' इति शब्दानुपूर्वीपरमिति स्पष्टम्। अतो नात्र दोषगन्धोऽपि।

मे सन्निधत्तां हृदि देशिकः सदा।

इत्यत्र आद्यानां त्रयाणां पदानां परप्रयुक्तानामेव प्रयोगेऽपि स्वस्वार्थपरतयैव प्रयोगात् निषेधप्रवृत्तिरवश्यम्भाविनीति अपरिहार्य एव दोषः। अस्माभिस्तु पादादौ वाक्यादौ वा तेमयादिप्रयोगप्रतिषेधं प्रति न किञ्चिदुक्तमिति ज्ञेयम्।

6) **महते दैवताय।** अतिविशदमुपपादने कृतेऽपि पुनरत्र वस्तुवृत्त्या वर्तमानं वा, आचार्यवर्यदूषणोपयोगितया परिगृहीतानां विषयाणां क्रमेण ह्रासे अत्यन्तलोपो भवेदिति सन्त्रासेन आरोपितं वा बलिष्ठं व्यामोहं दर्शयन्ति।

'महान् देवः, इति व्यस्तप्रयोगे शिवबोधो भवेन्न वा। आद्ये 'व्यस्तस्य नामधेयतया प्रसिद्ध्यभावात्' इत्येतदसङ्गतम्। अन्त्ये 'नमति महति देवे' इति पादुकासहस्रप्रयोगोऽसङ्गतः। अत्र पङ्क्तिद्वयेनोत्तरं वाच्यम्'

इति लिखन्ति। असकृदुक्तपूर्वमत्रोत्तरम्। अद्य पुनरुच्यते। आद्यः पक्षो युक्तः। प्रकरणादिसत्त्वेन पादुकासहस्रश्लोके बोधस्योदयात्। न चायं बोधः नामधेयतया प्रसिद्धिबलात्, यथा शङ्करादिपदप्रयोगे। तेन 'व्यस्तस्य' इत्यादेरसाङ्गत्यं नास्ति। अन्त्योऽपि पक्षो युक्तः। प्रकरणादिविरहे तद्बोधानुदयात्। अयमत्र निष्कर्षः।

1 व्यस्तप्रयोगे रूढिशक्त्या यदाकदाचिदपि नास्ति शिवबोधः।

2 प्रकारान्तरेण तु क्वचिद्बोधो भवति च क्वचिन्न भवति च। पादुकासहस्रे 'नाकसिन्धोर्विशीर्णाः' इति तात्पर्यग्राहकप्रमाणसत्त्वात् भवति बोधः। 'महते दैवतायाज्यं' इत्यत्र तदभावान्न भवति।

इति। अत्र यदि किञ्चित् विप्रतीपमस्ति तन्निष्कृष्टमुच्यताम्। आचार्य-

ध्वप्यप्रतिहतप्रसरस्य पौरोभाग्यस्य महिम्ना दृढघटितयोश्चक्षुषोरुन्मीलनसिद्धये ततो विवेकसिद्धये च श्रीभाष्यसूक्तिविषया इयं प्रतिबन्दी च यावत्प्रबोधोदयं मनसि विपरिवर्त्यताम्—

भगवच्छब्दः परमपुरुषेतरबोधको न वा । आद्ये 'ब्रह्मशब्दस्तत्रैव मुख्यवृत्तः ... ... भगवच्छब्दवत्' इत्युक्तमसङ्गतं स्यात् । अन्ये 'भगवद्बोधायन' 'भगवान् पाणिनिः' इत्याद्यसङ्गतं स्यात् ।

भगवच्छब्दस्य बोधायनादौ मुख्यवृत्तिर्नास्ति । गौण्या बोधकत्वं तु भवतीति इहाभिप्रायः । एवमेव व्यस्तस्य शिवे रूढिर्नास्ति । प्रकरणादिवशाद्योगमर्यादया बोधकत्वं तु भवतीति तत्राभिप्रायः । कत्यमस्वारस्यम् ?

7 यस्य कवेः स्तुत्ये रतिर्नास्ति प्रत्युत महान् द्वेषः तेन पामरप्रतारणमात्रोद्देशेन कृते स्तोत्रकाव्ये सहृदयानां हास्यादिरसस्यैवानुभवः, न तु भक्तिरसस्येत्यवोचाम । 'अस्त्येव नस्तत्र प्रबलो द्वेषः । भक्तेरभिनयमात्रमेव । अस्मान् प्रष्टुं कस्याधिकारः' इत्यादि उन्मादकल्पेन सम्भ्रमेण बहु लिखन्तः अस्मदुक्तं सत्यापयन्ति । तत्र कृतज्ञा भविष्यामः ।

8 अस्मल्लेखे 'आस्वादस्य का प्रसक्तिः' इत्यस्य स्थाने दीर्घच्युत्या 'अस्वादस्य का प्रसक्तिः' इति मुद्रणं दृश्यते । आस्वादो नास्तीति प्रतिपादनतात्पर्ये अस्माकं वर्तमाने तद्वैपरीत्येन अस्वादः स्वादाभावः नास्ति, आस्वादोऽस्तीति प्रतीत्यनुगुणं मुद्रणं कारयामास दैवमिति उद्धर्षान्धा लिखन्ति । 'अस्ति दैवम् । तदधीना लोकस्य प्रवृत्ति'रिति एषां मुखात् शृण्वन्तो वयं वस्तुतः परमानन्दभरिता भवामः । तदेव प्रबलं दैवं 'एष एवासाधु कर्म कारयति तं यमधो निनीषति' इति श्रुत्युक्तरीत्या स्वात्मानं प्रति चिराद् वर्तत इतीदं यदि बुध्येरन् कदाचित् क्षेमो भवेदपि।

एवमेषां प्रहर्षं जनयद् दैवं अनेनापि मुखेन एषां प्रतारणमेव, महागर्ते निपातनमेव, कर्तुमुद्दिदेशेति स्फुटं प्रतीमः । 'अस्वादस्य का अप्रसक्तिः' इति हि विवक्षानुरोधेन पदच्छेदः कार्यः । कर्तुं शक्यते च । मुद्रणे एवमशुद्धिर्भविष्यतीति जानद्धि तत् एवं 'अप्रसक्तिः' इति पदच्छेदानुगुणं 'का प्रसक्तिः' इति लेखयामास । 'कः प्रसङ्गः' इति चेल्लिखितमुद्रितम भविष्यत् तदा हि नैतदशक्ष्यत । दैवं विना किमन्यदत्र कारणम् । सर्पान् सृजद्दैवं दण्डानपि सृजति तेषां मारणाय ।

अन्यदपि तु विद्वदग्रेसरा रसिकाग्रण्यो मधुरान्तकं श्री वीरराघवाचार्यस्वामिनो लिखन्ति— वैदिकपदविषयचर्चायां अस्मदुक्तिखण्डनाय लिखिते वैदिकविद्वदाभरणनाम्नि ग्रन्थे आरम्भे आर्याश्लोकं कञ्चन निवेशितवन्तः। स एवं तत्र मुद्रितो दृश्यते—

तिरुमलताताचार्या
उपागुरित्यत्र 'यदलिखम्' किमपि।
तद्वेदसम्प्रदाय-
क्रमातिलङ्घीति दर्शयामोऽत्र॥

इति। 'यदलिखन्' इति लेखने प्रवृत्तान् 'यदलिखम्' इति लेखयामास जगन्नाटकसूत्रधारभूतं दैवम्। तेनायं श्लोकार्थः। हे ताताचार्याः, यदहं मन्दबुद्धिः पूर्वमलिखं तत् सर्वं वैदिकसम्प्रदायविरुद्धमिति वयमेव दर्शयाम इति। इति।

एतेन वेदादारभ्य सर्वग्रन्थेषु दुर्व्याख्यानव्यसनेन यदपराद्धं तत्र अवश्यमनुतप्तैः क्षमा प्रार्थनीयेति पूर्वमेव दैवं परमं हितमुपदिष्टवदिति स्पष्टं भवति। अपार्थलेखनावसरे गर्हणीयत्वं तन्निरसनावसरे पूजनीयत्वं च व्यञ्जयन्ती एकवचनबहुवचने सूपपन्ने, अतीव प्रयोजनवती चेति रसिका इह असामञ्जस्यशङ्कां नैव कर्तुमर्हन्ति।

9. गृहीतग्राहितयेत्यत्र 'ग्रहीत' इति मुद्रणं दृश्यते। 'अस्य विलक्षणस्य संस्कृतपदस्य कोऽर्थः ?' इति पृच्छन्ति। परेषु दोषाभासदर्शनेऽपि दूषणरसास्वादे एषां दन्तोदकसम्प्लवो नैसर्गिकः। तेन तत्त्वं जानन्तोऽपि एवमविलिख्य स्थातुं न पारयन्ति। तत्र एषां यदुचितमुत्तरं तद् दद्मः। वैदिकमनोहरायां (59–64) न्यासतिलकसूक्तिविमर्शे रहस्यत्रयसारश्लोकानुवादे 'स्वामित्वम' इति यद्विलक्षणं संस्कृतपदं, श्रीरामानुजपत्रिकायां सज्जनाराधनसमीक्षालेखे तृतीये पर्वणि पञ्चमपङ्क्तौ 'आऴ्वरर्' (ஆழ்வார்) इति यद् विलक्षणं द्राविडपदं च प्रयुक्त तदर्थनिरूपणे सति इहाप्यर्थः स्ववगम इति।

कुट्टनानि शिरोभिन्दि निपतन्ति पदे पदे।
तथापि न परित्यक्तुमीहन्ते क्षुद्रबुद्धिताम्॥

अज्ञानभूम्ना स्वयं मुहुः अपलक्षणपदवाक्यप्रयोगकारिणः परकीयेषु लेखेषु अपरिहार्यमुद्रणाशुद्धिमाश्रित्य दोषोद्घोषणे यद्रमन्ते, असकृत

प्रतिबोधिता अपि यत् ततो नोपरमन्ते, तद्धि स्वभावस्यातिनीचतां प्रख्यापयति । श्रीतत्त्वशोधने 'तस्याः प्रभावं ह्रसयितुं' इति दृश्यते । ह्रसयितुम्' इति किं पदमस्ति ? यथाकथञ्चित्समर्थनचिन्ता न कार्या। ह्रसतेर्णिचि रूपं कथमिति विवेक्तव्यम् ।

जगत्कारणत्वं मोक्षप्रदत्वं विभुत्वं च लक्ष्मीपतेरेव न लक्ष्म्याः पृथगिति प्रतिपाद्यमानं न लक्ष्मीप्रभावह्रसनं मन्तुमुचितम् ।

इति च दृश्यते । तत्र ह्रसनमित्यस्य पदस्य विमर्शस्तावदास्ताम्। प्रतिपाद्यमानमित्यस्य किं विशेष्यम्— जगत्कारणत्वादिकमेव उतान्यत् ? आद्ये 'प्रतिपाद्यमानं जगत्कारणत्वादि प्रभावह्रसनमित्यनन्वितम्। क्रियातद्भिन्नरूपत्वात् । अन्त्ये तदनुपादानं दोषः । अनन्वयश्च समानः । प्रौढगम्भीरं लिखाम इत्यभिमान एवमपष्ठु लेखयति । 'इति प्रतिपादनं न लक्ष्म्याः प्रभावह्रसनपर्यवसायि मन्तुमुचितम्' इति विवक्षितम्। अविवेकवैभवादननुरूपं वाक्यमापतितम् । तत एव हेतोरेवमत्र प्रतिवदेयुः–'प्रतिपाद्यमानमिति प्रतिपादनमित्येवोक्तं वेदितव्यम् । ह्रसनमिति अन्तर्भावितणिजन्तम् । करणे ल्युट् । इत्यत्यन्तस्वारस्येन ! अर्थे स्पष्टं प्रतीयमाने शास्त्रेष्वपरिश्रमात् दूषणसंरम्भः केवलमसूयया क्रियते' इति । तदपि वयं रोचयामह एव। विदुषां विनोदकरं हि दुर्लभमीदृशं प्रहसनम् ।

10. विषयविशेषे स्वोक्तसंवादाय अस्मान् निर्दिशन्तः 'उद्यानपत्रिकासम्पादकमहाभागाः .... यथायथमुपपाद्य संश्लाघनीयसमर्थनसरणिकाः समभूवन्निति हार्दमानन्दमाविष्कुर्मः' इत्येवमलिखन् । तदिदानीं स्मरयन्तः 'एवं भवन्तं प्रमाणीकुर्वत्सु भवत्प्रशंसापरेषु चास्मासु कथमेवं अदाक्षिण्यावलम्बनम्' इति विमनायन्ते । अस्ति हि क्षमाया अवधिः । सूक्तिरत्नानां घोरो वधः निरन्तरं क्रियमाणः कं जानन्तं तूष्णीं स्थातुं मुञ्चति ? प्रशंसायां निन्दायां वा निर्लेपा वयम् ।

न गुणान् परमार्थतः सतो
न च दोषानवगन्तुमीश्वरः ।
कुपितः कटु भाषते स्तुते
मुदितस्तद् द्वयमप्यपार्थकम् ॥

इति च मतिं कुर्मः ।

11 'तन्मे प्रमाणं शिवः', 'तन्मे मनः कृन्तति' इत्यन्ये लिखन्ति चेल्लिखन्तु। तस्यैव क्रमस्य आदरणे को निर्बन्धः। 'स राज्यं गुरुणा दत्त'-मिति रघुवंशे स्थिते 'राज्यं स गुरुणा दत्त'मिति किं केनचित् कवयितु-मयुक्तमिति पृच्छन्ति। तत्र सावष्टम्भोच्चारणानर्हत्वात् 'मे' इत्यस्य आदौ स्थितिर्न युज्यते। राज्यमित्यस्य तु तदर्हत्वात् सा युज्यत इति क्रमान्तरं न दुष्यतीति विवेक्तव्यम्। उपजीव्यपद्ये 'वेदान्ताचार्यवर्यो मे' इति पादान्त एव तस्य स्थितिरित्येतच्चावधेयम्।

वस्तुतस्तु रघुवंशश्लोके राज्यपदं यद्यपि प्रथमं स्थानमधिष्ठातुमर्हति तथापि 'सः' इत्येतत् न तद्विहातुमर्हति। पूर्वोक्तसर्वमहाप्रभावशालिरघु-परामर्शकस्य तस्य पदान्तरकृतव्यवधानलेशासहत्वादित्यास्तामेतत्।

12 अन्ते परमाद्भुतः कोऽपि विषयः, यं 'एकः स्वादु न भुञ्जीत' इति रीत्या सर्वैरेवाभिज्ञैः सम्भूय विमृश्य आनन्दतुन्दिलमन्तरात्मानं सन्त-नितुमभिवाञ्छामः।

यतिराजसप्ततौ देशिक आह— 'स्वदते ममाद्य सुभगा सरस्वती' इति। अत्र सर्वलोकविलक्षणस्ववैचक्षण्यानुगुणमर्थविशेषमत्रभवन्तो वर्णयन्ति।

"अत्र 'अद्य स्वदते' इति वचनात् शोभना श्रीसूक्तिः पूर्वदिनावधि स्वस्य न रुचितेति स्पष्टं प्रदर्श्यते। अद्येत्यस्य 'अस्मिन् दिने' इत्येव ह्यर्थः। स्वामिनो देशिकस्यैव शोभना श्रीसूक्तिः चिरकालं अरस्या सती कस्मिंश्चिद् दिने रस्या बभूवेति चेत् परान् प्रति किं वक्तव्यम्।"

इति।

सुग्रहोऽयमर्थः सर्वेषाम्। नात्र विवरणापेक्षं किञ्चिदस्ति। एषामभि-मता सुभगा काचन श्रीसूक्तिः। देशिकः चिरात् तद्विमुखो बभूव। एवं बहुतिथे काले याते कस्मिंश्चिद् दिने साऽस्य रस्या बभूव। इति इममर्थ-मेते अत्र वदन्ति। अत्र न किञ्चिदस्माभिरन्यथाऽनूदितम्। सर्वैरभि-ज्ञैर्बुद्धाविदं धारणीयम्। अथ पृच्छामः का सा सुभगा श्रीसूक्तिः, या देशिकस्य चिरादरस्या भूत्वा पश्चाद् रस्या बभूव। न तावद् यतिराज-श्रीसूक्तिरेव। यतिराजकीर्तिकर्तकैर्विशोधितेति तस्याः शोधकत्वप्रतीत्या शोधितत्वानुपपत्तेः। 'त्रिंशद्वारं श्रावितशारीरकभाष्यः' 'निर्विष्टं यतिसार्व-भौमवचसामावृत्तिभिर्यौवनम्' 'यतिप्रवरभारतीरसभरेण नीतं वयः' इति

सर्वदा तत्र रसानुभवाभिधानाच्च। नापि यतिराजात् प्राचीनानामाचार्याणां काचन श्रीसूक्तिः। तथा काचिदासीदित्यत्र प्रमाणाभावात्। अथार्वाचीनानामाचार्याणां यां सूक्तिं देशिकः स्वरहस्यग्रन्थेषु खण्डयति सेति चेन् दृढमेतदुच्यताम्। पुनरिदं न विपर्यसनीयम्। अथेदमालोच्यताम्—

परुषातिवादपरिवादपैशुन-
प्रभृतिप्रभूतपतनीयपङ्किला।

इति कृत्स्नपूर्वार्धरूपेण विशेषणेन तस्या 'सुभगायाः श्रीसूक्तेः' को विशेष उच्यते? किमिदं तस्या न विशेषणम्? किं श्लोके एकदेशमात्रं गृहीत्वा अन्यत् सर्वमुपेक्षणीयम्? प्रथमपठितं अतिदीर्घं विशेषणमत्यन्तमुपेक्ष्य, असदिव कृत्वा, एवं वाक्यार्थकथने प्रवर्तमानानां वस्तुतः कियती व्युत्पत्तिः, कियत् पाण्डित्यम्? एवंविधा देशिकादिसर्वदूषणसंरम्भिणश्चेत् अभिज्ञैः किं कर्तव्यम्? अस्तु; विशेषणमन्वीय कोऽर्थो लभ्यत इति पश्येम। सरस्वती सूक्तिः। सा 'परुषातिवादपरिवादपैशुनप्रभृतिप्रभूतपतनीयपङ्किला।' लोकमातुर्वैभवापह्नवेन पारुष्यम्। शास्त्रविहितानामुपायानामनुपायत्वकथनेनातिवादः। वाल्मीकिवाचोऽपि उच्छिष्टत्वाभिधानात् परिवादः। जनेषु विहितानां कर्मणामननुष्ठेयत्वप्रथनात् पैशुनम्। प्रतिबोधनेऽपि अभिनिविश्य अमार्गप्रवृत्तितत्परत्वादिः प्रभृत्यर्थः। एवं रूपप्रभूतपातकमलीमसा। सैव स्थिता 'यतिराजकीर्तिकतकैर्विशोधिता।'

निष्कृष्टुं कश्चिदन्यः प्रभवति भगवल्लक्ष्मणाचार्यमुद्रा-
मक्षुद्राचार्यशिक्षाशतगुणितमतेरप्रमत्तान्न मत्तः।

इत्युक्तयोग्यताविशेषशालितया निष्कृष्टा ये यतिराजसिद्धान्तसूक्ष्मार्थाः तदनुरोधेन विरुद्धांशं परित्यज्य परिष्कृता। अत एव सुभगा श्रीमद्रहस्यत्रयसारादिरूपेण परिणामात् भव्यरूपा अद्य मम स्वदत इति। एवं च कूपखनने वेतालोदयन्यायेन सिध्यन्नयं स्वाभिमतविपरीतार्थो वा अङ्गीकर्तव्यः; श्लोकार्थं न जानीमः। हठादेव असमञ्जसमर्थमुक्तवन्तः स्म इति वा सर्वविद्वत्समक्षमभ्युपगन्तव्यम्। अन्य एव हि वस्तुतः श्लोकस्यार्थः। अवाच्यवचनाभ्यासदुष्टा मे वाक् अद्य यतिराजगुणातिशयकीर्तनप्रावणीकरणेन पवित्रिता अत एव हृद्या स्वदत इति। यतिराजगुणप्रशंसार्थं स्ववाचः पूर्वं दोषवत्तां कीर्तयति। अयं तात्त्विकोऽर्थो न स्फुरति; जुगुप्स-

तमर्थान्तरं स्फुरति । तदपि स्वेष्टतमविपर्यये पर्यवस्यति । इयं दुरवस्था-परम्पराऽपि जाता यदि स्वस्वरूपयाथात्म्यबोधनाय न प्रभवति नास्ति इह जन्मनि क्षेमस्य प्रत्याशा ।

13. स्वजन्मनः परमोद्देश्यमेतदिति एतैः क्रियमाणं दुष्कृतं वैराश्यं भजति—ग्रन्थनाशनं सम्प्रदायवृत्तविपर्यसनं व्यक्तिदूषणमिति । अत्र आद्यप्रतिविधानमात्रे वयमिदानीं दत्तदृष्टयः । द्वितीयप्रतिविधानाय भगवद्द्रोहे वर्णाश्रमधर्मव्यवस्थाविनाशे च प्रसितानां 'स्वमर्यादा' काराणां यानि वितितानि जल्पितानि तन्निरसनावसरे यतिष्यामहे । चरमं प्रति तु व्यवहारस्थले निर्णयमधिगन्तव्यमिच्छन्तः समयप्रतीक्षाः स्मः । अद्यापि हि बन्धः कश्चिदस्माकमनुवर्तते । तन्निवृत्तिसमनन्तरं तदर्थमपेक्षितमुद्यमं करिष्यामः ।

'स नो देवः शुभया स्मृत्या संयुनक्तु ।'

---

# संस्कृतग्रन्थजातम् ॥

## ऋक्संहिता ।

देवविरोधिनः केचित् ऋक्संहितायां निर्दिश्यन्ते । एकस्य देवस्य यः कश्चित् एको विरोधीति प्रथमं स्थिते पश्चात्, देवाः एकतः यथा, तथा अपरतः 'असुराः' इति देवविरोधिनां सङ्घातः कश्चित्प्रादुरभूत् । यद्यप्येवं अर्वाचीनेषु वैदिकग्रन्थेषु असुरशब्दः देवविरोधिषु निरूढिमभजत, तथापि ऋक्संहितायां स शब्दः शोभनार्थ एवासीत् । 'असुरः' इति अग्नेः वरुणस्य च विशेषणतया प्रयुज्यते । बलपराक्रमादिशालित्वं तेन विशेषणेनाभिसंहितमिति प्रतीयते । एवं देवपरतया प्रथमं प्रयुक्तस्यास्य शब्दस्य कथं पश्चात् तद्विरोधिवाचित्वमासीदित्यत्र केषाञ्चिदेवमभ्यूहः । अनार्यजनाः स्वदेवतामपि यस्मादसुरशब्देन व्यवहरन्ति स्म तस्मात् विद्वेषिदेववाचित्वं, ततःपरं देवविरोधिवाचित्वं चाभवदिति । अन्ये

पुनः एवं मन्यन्ते। शक्तिविशेषवन्तः 'असुराः' इत्यभ्यधीयन्त। तत्र क्रमेण अपकारसामर्थ्यपरत्वे गृहीते अन्ततः सर्वजनविरोधिनां दुष्टप्रकृतीनां तथा अभिधानमभूदिति। अनेन क्रमेण अशोभनार्थवाची सन् अयं शब्दः ऋग्वेद एव चरमभागे देवविशेषणत्वेन प्रयोगात् अच्यवत। इत्थं असुरशब्दस्य देवशत्रुषु निरूढौ जातायां तत्र, न सुराः असुराः, इति व्युत्पत्तिं मत्वा देवाः सुरा इत्यभिहिता इत्याहुः।

एवंविधेषु देवशत्रुषु ऋग्वेदप्रतिपादितेषु पणयो नाम केचन। वृत्रोऽपि तथाभूत इति प्रागेवोक्तम्। वल इत्यपरोऽपि ऋक्संहितायामसकृत् कीर्त्यते। यस्यां गुहायां वृत्रेण गावो निरुद्धाः सैव एवं पुरुषाकारतया निर्दिश्यत इत्याहुः। एवं शुष्णः स्वर्भानुः इत्यन्यौ द्वौ इन्द्रशत्रू किर्त्येते। अयं स्वर्भानुः अर्वाचीनग्रन्थेषु राहुत्वेन प्रसिद्धः। देवानामसुरा इव मनुष्याणां राक्षसाः शत्रवः। एतेऽपि ऋक्संहितायां 'रक्षः' इति प्रतिपाद्यन्ते। मनुष्याणामश्वानां च मांसेष्वेषामभिरुचिरिति, क्षुद्बाधानिवृत्तये तानेते हिंसन्तीति च उच्यते। रात्रिष्वेते चरन्ति। विशिष्य यज्ञान् घ्नन्ति। पिशाचा नाम अल्पशो निर्दिष्टाः शवभुजः।

एवं देवतत्तुल्यचेतनान्तरप्रतिपादकानि ऋक्संहितायां भूयिष्ठानि सूक्तानीति प्रत्यपादि। अन्यादृशान्यपि कानिचित् सूक्तानि सन्ति, यानि संप्रति विमृश्यन्ते। क्वचित् द्वयोः प्रवृत्तः संवादो निबध्यते। तत्र यमयम्योरेकः। यमी भ्रातरं यमं कामयमाना तं पतिं प्रार्थयते। यमः पुनः तदत्यन्तमनुचितमिति, यत्र एतादृशमकार्यं क्रियेत, तादृशः कालः उत्तरत्र भविष्यति, इति च वदन् प्रतिषेधति। इमावुभौ विवस्वत्पुत्रौ यमलौ।

इन्द्रस्य वरुणस्य च संवादः सूक्तान्तरे निबध्यते। अत्र स्वस्वप्राधान्यं देवेषु एतौ प्रतिपादयतः। एवमग्नीवरुणयोः तथा अग्नेः अन्येषां देवानां च संवादः प्रत्येकमेकैकस्मिन् सूक्ते निबध्यते। अपरत्र इन्द्राण्या इन्द्रस्य च। अस्ति अपरं सूक्तं यत्र सरमा नाम देवशुनी निरुद्धानां गवां प्रत्यर्पणाय पणीनभ्यर्थयते। उर्वशीपुरूरवस्संवादः प्रागेवाभिहितः।

अपराणि कानिचित् सूक्तानि सन्ति यत्र विषयः प्रायः अथर्ववेदतुल्यः। तत्र संक्षिप्ते सूक्तद्वये शोभनवागुच्चारणाय शकुनयः प्रार्थ्यन्ते।

विषहरणं यक्ष्मरोगनिवृत्तिश्च अन्यस्मिन् सूक्तद्वये प्रार्थ्यते। अन्यत्र मुमूर्षोः जीवनधारणा। एवं निद्राप्राप्तिपरः कश्चित्सूक्तविशेषः। एवं सन्तानलाभाय, तद्विरोधिरक्षः प्रशमनाय, शत्रूणामभिभवाय, सपत्नीभ्यः पत्युः प्रेमनिवर्तनाय च बहवो मन्त्राः सूक्तविशेषेषु पठ्यन्ते । अस्ति किञ्चित् सूक्तं यस्य मण्डूकसूक्तमिति प्रसिद्धिः । अत्र शब्दायमानानां मण्डूकानां अधीयानाः ब्रह्मचारिणः उपमानत्वेन निर्दिश्यन्ते। एतद्दशेन ब्राह्मणानां निन्दापरं इदं सूक्तमेति केषांचिदभिप्रायः । ब्राह्मणैरेव संकलय्यैवं परिपाल्यमानेऽस्मिन् वेदे नैतदेवं भवितुमर्हतीति, वृष्ट्युत्पादनाद्यनुगुणशक्तिविशेषवत्त्वस्य पूर्वैः गृहीतत्वेन उपमानोपमेययोर्न्यूनाधिकभावः नैव तैर्गृहीत इति, चेतनाचेतनवस्त्वन्तरवत् मण्डूकानां स्तुतिरेवात्र क्रियत इति च इतरेषामभिप्रायः।

विवाहविषयं एकं सूक्तमस्ति दशममण्डले, यत्र ऋक्संख्या सप्तचत्वारिंशत् । अत्र सूर्याभिधानायाः कन्यायाः सोमेन विवाहः प्रतिपाद्यते । अश्विनौ अन्यत्र सूर्यायाः पतित्वेन प्रतिपादितौ सोमार्थं इमां वृण्वानौ इह घटकभावमवलम्बेते। सविता तस्याः पिता तद्विवाहं अनुमन्यमानः तां द्विचक्रं द्वाभ्यां वृषभाभ्यां उह्यमानं स्वलङ्कृतं रथमध्यारोप्य भर्तुर्गृहं प्रेषयति । भर्तुर्गृहं प्राप्तायाः तस्याःसन्तानवत्त्वं समृद्धिः आयुरारोग्यं च आशास्यते । प्रायः अत्र प्रतिपादितो विवाहप्रकारः अद्यावधि अस्मद्देशे अनुवर्तत इत्याहुः।

ऋक्संहितां परिशीलयन्तो विमर्शकाः—'इतः प्रेत्य शरीरे दग्धे अविनष्टस्वरूपाः यमं प्राप्य तेन साकं कस्यजिद्वृक्षस्य छायायां सोमं पिबन्तः सङ्गीतरसमनुभवन्ति ; इत्येतावदत्रोच्यते। न तु प्रेतस्य पुनर्जननम्, एवं पुनर्मरणजनने, इत्येवं जननमरणप्रबन्धानुवृत्तिरूपो दीर्घसंसार ऋक्संहितायां सूचितोऽपि दृश्यते इत्याहुः । अथर्वसंहितायां तु पापकारिणां भूमेरधस्तात् तमःप्रवेशः प्रतिपाद्यते । तथाऽपि प्रायो वैदिकग्रन्थेषु सर्वत्र इतः प्रेत्य गतानां यावान् सुखानुभव उच्यते न तावान् दुःखानुभवः । एवंविधायाः दृष्टेः बहुलीभवनं केवलमर्वाचीनेषु ग्रन्थेषु। अत एव केषांचिद्विमर्शकानामयमभिप्रायः यन्मनुष्याणां मृतानां निरन्वयविनाशो भवतीति ऋषीणां मतमिति। देवयानः पितृयाणः इति उपनिषत्सु प्रसिद्धस्य मार्गद्वयस्य ऋक्संहितायामस्ति सूचना । प्रेताना-

मधिपतिर्यमः त्रिषु सूक्तेषु स्तुतः। अयं मृतान् नीत्वा वासस्थानं कल्पयित्वा तान् तत्र वासयति। एवं मृतजनावासपरिकल्पकत्वेनात्र प्रतिपादितो यमः अथर्ववेदे जनानां मारकत्वेनैव प्रतिपाद्यते। उलूकः कपोत इति द्वौ पक्षिणौ अस्य दूताविति क्वचिदुच्यते। परं तु ततोऽपि बहुतरं कीर्तितौ अन्यौ दूतौ स्तः। तौ द्वौ श्वानौ। मृतानां गन्तव्यं पन्थानं एतौ रक्षतः।

प्रेतविषयाणि सन्ति पञ्च सूक्तानि। तेषु एकत्र यमः, अन्यत्र पितरः, इतरत्राग्निः, अपरत्र पूषा, सरस्वती च मृतस्य आयतौ क्षेमकरणाय प्रार्थ्यन्ते। एतत्सूक्तपञ्चकपर्यालोचने प्राक्तनीं शावक्रियां प्रति विशेषः कश्चिदवगम्यते। दहनावसरे अजालम्भ आसीत्। एवमालब्धः अजः पूर्वमेव गत्वा, पश्चात् कस्यचिदागमनं पितृभ्यो निवेदयतीति अथर्ववेदानुसारेण ज्ञायते। यथा दहनं तथा खननमपि प्रागासीत्। अपि तु कादाचित्कम्। चिरकालादयं सम्प्रदायविशेषः अनुवर्तते यत् उत्तरत्र उपयोगाय मृतस्य अलङ्काराः वस्त्राणि च संभृतान्यासन्निति वदन्ति।

अत्रानुमरणमपि प्रसिद्धम्। Indo European काल एव चिरादिदं प्रसिद्धमित्याहुः। अस्मिन् प्रकरणेऽस्ति काचिदृक् यत्र मृतं भर्तारमनुशयाना स्त्री तत उत्थानाय प्रतिबोध्यते।

उदीर्ष्वनार्यभिजीवलोकं गतासुमेतमुपशेष एहि।
हस्तग्राभस्य दिधिषोस्तवेदं पत्युर्जनित्वमभिसंबभूथ॥

केषुचित्सूक्तेषु दानस्तुतिः क्रियते। स्वकार्यसिद्ध्या प्रीता राजानः तत्र साहाय्यं कृतवद्भ्यः अनल्पं वित्तं ददतीति तेषामौदार्यमतीव प्रशस्यते। षष्टिः सहस्राणि गावः केनचिद्राज्ञा दत्ता इति प्रतिपाद्यते। सन्ति उपदेशपराणि कानिचित् सूक्तानि। तत्र अक्षसूक्तमेकं, यत्राक्षैर्दीव्यतः कितवस्य दुर्दशामभिवर्ण्य करुणरसः सम्यगभिव्यज्यते। सूक्तान्तरे एककुटुम्बे स्थितानामपि मातापितृपुत्राणां भिन्नभिन्ना वृत्तिरिति प्रतिपाद्यते। अन्यत्र परोपकारः सच्चरितशीलत्वं चोपदिश्यते। वाक्स्तुतिपरं सूक्तमेकम्। केषुचित्सूक्तेषूपमानादिविधया स्त्रीणां स्वभावः प्रकाश्यते। तासु सौहार्दं नास्ति। तासां हृदयं वृकतुल्यमिति। क्वचित्क्वचित् केचिदर्थाः प्रहेलिकादिरीत्याऽतिगूढमुच्यन्ते। एतानि 'ब्रह्मोद्यानि' इति प्रसिद्धानि

वैदिकेषु। दशमन्त्रवत्येकस्मिन् सूक्ते प्रतिमन्त्रं एकैको देवः एवं गूढमभिहितः। अत्र संवत्सरस्यैकं चक्रमिति, तत्र द्वादश अराणि सन्तीति च प्रतिपादनं क्रियते।

अथ सन्ति कानिचित्सूक्तानि यत्र पश्चाद्विस्तृतस्याऽध्यात्मविषयचिन्तनस्य बीजरूपं किञ्चित्प्रकाश्यते। जगत्कारणचिन्ताऽत्रैवोपक्रान्ता। देवेषु यः कश्चित् जगत्कारणत्वेन प्रतिपाद्यते। पुनः देवानामेव द्यावापृथिव्यौ मातापितराविति प्रतिपाद्यते। इत्थं प्रतीयमानं विरोधाभासमवलम्ब्य पुत्रा एव पित्रोर्जनयितार इत्यभिधीयते। एवं सामान्यतो देवानां स्रष्टृत्वे स्थिते कालक्रमेणान्यः कश्चित् सर्वाधिकः स्रष्टा निश्चितः। तस्य पुरुषः, विश्वकर्मा, हिरण्यगर्भः, प्रजापतिरिति बहुधा अभिधानम्। यथा लोके कुलालस्य तन्तुवायस्य वा कर्तृत्वं तादृशं जगत्प्रति देवानां प्रजापतेर्वा कर्तृत्वमिति प्रथमं ऋषीणां मतिरासीत्। पश्चात् जगत्कारणस्य जगद्रूपेण परिणाम इत्येवंविधा मतिरुदभूत्। तदेतत्पुरुषसूक्ते अभिव्यक्तमिति विमर्शका मन्यन्ते। अत एवेदं सूक्तं सर्वथाऽर्वाचीनमित्यपि प्रतिपादयन्ति। विश्वकर्मणः अग्नीषोमयोरन्यस्य वा देवस्य तत्तत्स्तुतिपरे सूक्ते जगत्स्रष्टृत्वं विशेषणतया प्रतिपाद्यते। हिरण्यगर्भविषये तु एकस्मिन् सूक्ते जगत्कारणत्वं तस्य प्राधान्येन प्रतिपाद्यते। सूक्तान्तरे प्रलयावस्थाप्रतिपादनपुरस्सरं जगत्सृष्टिरुच्यते, यस्यैव विस्तरः सर्व औपनिषदो ग्रन्थराशिः। इति प्रतिपाद्यार्थः।

---

# वैदिका विशेषाः॥

(Vidyalankara V. R. Srinivasa Tatacharya Siromani)

## वेदात्मा त्रयीमयो वा विहगेश्वरः।

अग्निचयनाङ्गमन्त्रपाठोपेते तैत्तिरीयसंहितायाः चतुर्थकाण्डे प्रथमप्रपाठके अग्निधारणपरे दशमानुवाके 'सुपर्णोसि गरुत्मान् ... ... यजूंषि नाम' इति मन्त्रोऽस्ति। पञ्चमकाण्डप्रथमप्रपाठकदशमानुवाकस्थेन 'सुपर्णोऽसि गरुत्मानित्यवेक्षते ... ... व्याचष्टे' इति वेदभागेन अस्य

मन्त्रस्य उखास्थसंस्कृताग्नेरवेक्षणे विनियोगोऽभ्यधीयत । अयं मन्त्र एवं सायनभाष्ये व्याख्यायत 'हे अग्ने, त्वं सुपर्णः पक्षिरूपोऽसि ।' पक्ष्याकारेण चेष्यमाणत्वात् । अत एवाम्नायते 'वयसां वा एष प्रतिमया चीयते यदग्निः' इति (5 का, 5 प्र, 3 अ) । तत्र दृष्टान्तः 'गरुत्मान्' । यथा पक्षिराजस्तद्वत् । पक्ष्याकारस्यावयवास्सम्पाद्यन्ते । 'त्रिवृत्ते शिरः' बहिष्पवमानस्तोत्रे योऽयं त्रिवृत्स्तोमः स एव स्तोमः शिरस्स्थानीयः । प्रजापतिमुखजन्यत्वेन उक्तत्वात् । यत् गायत्राख्यं साम तत् त्वदीयं चक्षुः । यः पञ्चदशादिस्तोमः स एव जीवात्मा । यत् वामदेव्याख्यं साम सा तनूः शिरोव्यतिरिक्तशरीरस्थानीयम् । ये बृहद्रथन्तराख्ये सामनी ते तव पक्षस्थानीये । यत् यज्ञायज्ञियाख्यं साम तत् तव पुच्छस्थानीयम् । यानि गायत्र्यादीनि छन्दांꣳसि तानि हृदयाद्यङ्गस्थानीयानि । ये सौमिकवेद्यां होत्रीयादिधिष्णियाः ते तव शफस्थानीयाः । 'यानि यजूꣳषि तानि तव नामस्थानीयानि' इति । तदुपरितनः 'सुपर्णोऽसि गरुत्मान् दिवं गच्छ सुवः पत' इति मन्त्रः– 'हे अग्ने, त्वं गरुत्मान् गरुड इव पक्षिरूपोऽसि । अत आकाशं प्रति गच्छ । ततोऽपि सुवः पत, स्वर्गलोकं प्राप्नुहि । मन्त्रस्य स्वर्गप्राप्तिपरत्वं दर्शयति-'दिवं गच्छ सुवः पतेत्याह । सुवर्गमेवैनं लोकं गमयति' इति (5 का. 1 प्र. 10 अ) । 'एनं यजमानमात्मानम्'– इति तत्र व्याक्रियत । चतुःश्लोक्यां 'वेदात्मा विहगेश्वरः' इति, स्तोत्ररत्ने 'त्रयीमयः' इति च श्रीमद्यामुनमुनीनां सूक्तिः । निगमान्तमहादेशिकविरचिततद्भाष्ययोः 'सुपर्णोऽसि गरुत्मान् इत्यादिष्वप्यस्य वेदात्मत्वं ग्राह्यम्' इति, 'त्रयीमयः, सर्ववेदमयविग्रह इत्यर्थः । श्रूयते हि- 'सुपर्णोऽसि गरुत्मान् त्रिवृत्ते शिरो गायत्रञ्चक्षुः' इत्यादि । तथा 'तस्य गायत्री च जगती च पक्षावभवताम् । उष्णिक् च त्रिष्टुप् च प्रष्ट्यौ । अनुष्टुप् च पङ्क्तिश्च धुर्यौ । बृहत्येवोद्धिरभवत् । स एतं छन्दोरथमास्थाय । एतमध्वानमनुसमचरत्' इति च (1 अ, 5 प्र, 12 अ) सूक्तिर्दृश्यते । अत्रेयमाशङ्का भवति । यदग्नेयानीत्यनुवाकान्तर्वर्तिनि सुपर्णोऽसीति मन्त्रे सम्बोद्ध्योऽग्निरेवेति भाष्यादवगम्यते । अस्यैवाग्नेः 'त्रिवृत्ते शिरः' इत्यादिना वेदात्मत्वं त्रयीमयत्वं चोक्तं प्रतीयते, न गरुडस्य । तस्य गायत्री चेति वाक्यात्पूर्वं 'सोऽब्रवीत् प्रजापतिः । छन्दांꣳसि रथो मे भवत । युष्माभिरहमेतमध्वानमनुसञ्चराणीति' इति त्रीणि वाक्यानि

श्रूयन्ते। 'अथानुसन्धानार्थं रथरूपकं परिकल्पयति' इति 'सोऽब्रवीत् प्रजापतिः' इत्यादिवाक्यावतारिकाभाष्यम्। अत्र छन्दांसि रथत्वेन रूप्यन्ते। प्रजापतेरादित्यरूपेण छन्दोरथेनाकाशमार्गेऽनुदिनं सञ्चरणं प्रतिपाद्यते च। न वैनतेयस्य त्रयीमयत्वं निगद्यते। अतः 'वेदात्मा विहगेश्वरः', 'त्रयीमयः' इति सूक्तिः तद्भाष्यसूक्तिश्च कथं घटेते इति।

अत्रेदं समाधानं भाति। सुपर्णोऽसीति मन्त्रभाष्ये 'तत्र दृष्टान्तः गरुत्मान्। यथा पक्षिराजस्तद्वत्' इत्यभाष्यत। अनेन ग्रन्थेन अग्नेरुपमेयत्वं गरुडस्य उपमानत्वं चावसीयते। 'त्रिवृत्ते शिरः' इत्यादिना अग्नेः त्रिवृच्छिरस्कत्वादेः कथनेऽपि असति विरोधे उपात्तमिमं धर्ममुपेक्ष्य येन केनचिद्धर्मेण तदुपमानोपमेयभावस्य निर्वाहः समञ्जसो न भवति। अतः तन्निर्वाहाय यथा गरुत्मतः त्रिवृच्छिरः गायत्रं चक्षुः तथा ते त्रिवृच्छिरः गायत्रं चक्षुः इत्याद्यर्थोऽवश्यं स्वीकरणीयः। ततश्च सुपर्णोऽसीति मन्त्रप्रतिपाद्यत्वमभिसन्धाय गरुत्मतो वेदात्मत्वत्रयीमयत्वयोर्मूले व्याख्याने चाभिधानं समञ्जसं भवत्येव।

'सोऽब्रवीत्' इत्यादिवाक्यानां भाष्यमेवम्। "स प्रजापतिरादित्यरूपेणाकाशमार्गे गन्तुमेवमुवाच। हे छन्दांसि गायत्र्यादीनि यूयं मदर्थं रथाकारं प्राप्नुत। रथाकारैर्युष्माभिरहमेतमाकाशाध्वानमनुदिनं सञ्चराणीति। ततस्तस्य प्रजापतेर्गमनार्थं गायत्रीजगत्यौ पक्षौ रथस्य चक्रे अभवताम्। उष्णिगनुष्टुभौ प्रष्ट्यावीषारूपे दीर्घकाष्ठे अभवताम्। अनुष्टुप्पङ्क्त्यौ धुरि योजनीयावश्वावभवताम्। बृहत्येवोद्धिरूर्ध्वस्थापनीया पीठसमाना उपवेशनफलकरूपाऽभूत्। स प्रजापतिस्तादृशं रथमारुह्यानुदिनमेतन्मार्गं सञ्चरति" इति।

'सोऽब्रवीत् प्रजापतिः' इत्यत्र प्रजापतिशब्दस्यार्थो भगवान् भवितुमर्हत्येव। श्रीरङ्गरामानुजमुनिविरचितनारायणोपनिषद्भाष्ये 'प्रजापतिश्चरति', 'प्रजापतिः प्रथमजाः' इत्यादिषु प्रजापतिशब्दस्यार्थो भगवानेवेति

राजाधिराजस्सर्वेषां विष्णुर्ब्रह्ममयो महान्।
ईश्वरं तं विजानीमः स पिता स प्रजापतिः॥

इत्याश्वमेधिकसूक्तिमनुसृत्य भाषणात्। सायनभाष्ये आदित्यरूपेणेत्युक्त्यापि प्रजापतिशब्दस्यार्थः सवितृमण्डलमध्यवर्ती नारायण एवेति भाति। 'छन्दांसि', 'युष्माभिः' इति वाक्यद्वये सप्तानां छन्दसां रथत्वेन

उपरितनवाक्यत्रये द्वयोर्द्वयोश्छन्दसोस्तदनन्तरवाक्ये एकस्य छन्दसो रथावयवपक्षादित्वेन च रूपणं दृश्यते।

मे इत्यस्य षष्ठ्यन्ततामाश्रित्य मे रथो भवत विष्णुरथो भवत इत्यर्थोऽपि वर्णयितुं शक्यते। छन्दस्समुदायस्य विष्णुरथत्वेन रूपणात् खगेश्वरत्वं, तत्समुदायघटकयोश्छन्दसोस्तत्समुदायघटकस्य छन्दसश्च विष्णुरथावयवपक्षादित्वेन रूपणात् खगेश्वरावयवत्वं च गम्यते। ततश्च तस्य गायत्री चेत्यादिश्रुतिप्रतिपाद्यत्वमभिसन्धाय मूले भाष्ये च सुपर्णस्य त्रयीमयत्वस्य वचनं साधु भवत्येवेति। विस्तरः परस्तात्।

---

# यथाभिमतम्॥ IV.1

## चतुर्थोऽङ्कः।

### प्रथमं प्रेक्षणकम्। अर्देन् वनम्।

[प्रविशन्ति रोसलिन्द्, सिलिआ, जाक्विस् च]

जाक्विस्— अभिरूप युवन्, सम्यक् त्वां ज्ञातुमिच्छामि, प्रसीद।

रोसलिन्द्— निर्वेदशीलस्त्वमिति वदन्ति।

जाक्विस्—तथाऽहमस्मि। तन्मे प्रियं हास्यशीलत्वात्।

रोसलिन्द्— उभयत्र अतिमात्रां कुर्वन्तः उद्वेजनीया जनाः। सर्वेषामेव ते गर्ह्याः ; मद्यपेभ्योऽवराः।

जाक्विस्— न। शोभनमेतत् यद् निर्विण्णेन भूयते, न च किञ्चिद् भाष्यते।

रोसलिन्द्-तथा चेत् वरं स्थाणुभावः।

जाक्विस्—न मे निर्वेदः पण्डितानामिव, यः स्पर्धामयः। न गायकानामिव, यः केवलमाभिमानिकः। न आस्थानपुरुषाणामिव, यः अहङ्कारमयः। न योधानामिव, यः उत्तरोत्तरोन्नत्याशारूपः। न वागाजीवानामिव, यः गम्भीरारम्भात्मा। न स्त्रिया इव, यो दाक्षिण्यमयः।

62

न च कामुकस्येव, यः एतत्सर्वरूपः। किन्तु केवलं मदीय एव कश्चिदयम, बहुभ्यो वस्तुभ्यो गृहीतः, बहुभिरंशैः उपादानकारणभूतैरारब्धः। नियतं मदीयानां प्रयाणानां खण्डानुचिन्तनरूपः, यस्य, असकृदावर्तनं उत्कटे निर्वेदे मां मज्जयति।

रोसलिन्द्— प्रयाण्यसि। तर्हि मन्ये निर्वेदस्य ते महत् कारणमस्ति। शङ्के त्वदीयानि क्षेत्राणि विक्रीतवानसि परकीयाणि द्रष्टुम्। एवं बहुदर्शित्वं अकिञ्चनत्वं च नाम नेत्रयोराढ्यता पाण्योः रिक्तता च भवति।

जाक्विस्— तथा। 'अनुभवं' लब्धवानस्मि।

रोसलिन्द्— अयं तेऽनुभवः निर्विण्णं त्वां करोति। वरं कश्चिज्जडः यो मां प्रहृष्टां कुर्यात्। न तु सोऽनुभवशाली यो मां निर्विण्णां कुर्यात् तदर्थं प्रयाणं च।

(प्रविशति आर्लण्डो)

आर्लण्डो— सुदिनं कुशलं च, प्रिये रोसलिन्द्।

जाक्विस्— न। तथा चेत्, भगवान् ते सहायो भवतु या त्वं असारं भाषसे। (निष्क्रामति)

रोसलिन्द्— कुशली भूयाः, आर्य, प्रयाणिन्। पश्य, अपभ्रष्टं भाषसे। विचित्रं आच्छादनं धारयसि। स्वदेशसिद्धान् सर्वान् विशेषान् तिरस्करोषि। अभिजने प्रेम परित्यजसि। यदाकारस्त्वमसि, तथा त्वां सृष्टवन्तं सर्वेश्वरं प्रायस्त्वं गर्हयसि। अन्यथा हि त्वामहं गण्डोलाप्लवनं* कृतवन्तं न मन्येय।† ननु कथमिदानीम, आर्लण्डो। क्व नु खलु इयन्तं कालं गत आसीः। त्वं नु कामयमानः? यदि इतःपरमेवं विप्रलम्भं करिष्यसि, पुनः कदाचिदपि मम चक्षुर्गोचरे नागन्तव्यम्।

---

* गण्डोला नाम कृषिफलानां जलमार्गेण स्थलान्तरनयनाय वेनिस्-नगरकुल्यासु उपयुक्तो नौकाविशेषः। पूर्वं आङ्गलानां तन्नगरगमनं गौरवावहत्वात् प्रायः कर्तव्यमासीत्। तत्र गच्छन्तो जनाः तां नौकामारुह्य सञ्चरेयुः। तदिह गण्डोलाप्लवनमिति उपचारात् तन्नगरगमनमेव विवक्षितम्। स्वस्य तत्र गमनं वृत्तं सूचयितुमेव जाक्विस् वेषाभाषादिविक्रियासु प्रवृत्त इति रोसलिन्द् तं परिहसति।

† गच्छन्तं प्रति वक्तव्यमुक्त्वा अथ आर्लण्डो-इमं सम्बोधयति।

आर्लेण्डो– प्रिये रोसलिन्द्, क्लृप्तात् कालात् एकस्यां होरायामागतोऽस्मि ।

रोसलिन्द्— कामचर्यासु एकहोरातिक्रमः ! यः एकं क्षणं सहस्रधा विभजेत्, तस्य च सहस्रतमभागस्य एकमंशमतिक्रामेत् तं अंसे प्रहरति मनसिज इति युक्त वक्तुम् । तत्तु परिपूर्णेन मनसा आद्रिये ।

आर्लेण्डो— क्षमस्व मां, प्रिये रोसलिन्द् ।

रोसलिन्द्— न, यद्येवं मन्थरो भवसि नेतःपरं मम लोचनगोचरे आगन्तव्यम् । एवं तन्मे रोचेत, यदि चक्रक्रिमिः कश्चिन्मामनुवर्तेत ।

आर्लेण्डो— चक्रक्रिमिः कश्चित् ?

रोसलिन्द्— आम्, चक्रक्रिमिः कश्चित् । स हि गतिमान्द्येऽपि स्वगृहं शिरस्येव वहति ; तत् श्लाघ्यं धनं, यत् त्वं कस्यैचित् कल्पयिष्यसि तस्मात् । त्वदीया चाहं रोसलिन्द् !

सिलिआ— अस्ति तथा त्वामभिधातुमस्येच्छा । किन्तु त्वत्तोऽपि कमनीयतरा काचन रोसलिन्द् अस्य वर्तते ।

रोसलिन्द्--एहि । अनुवर्तस्व माम्, अनुवर्तस्व माम् । अहमिदानीं विरतिदिनोत्साहे वर्ते । अतोऽङ्गीकर्तुं प्रवणा । यदि वस्तुत एवाहं भवदीया रोसलिन्द् अस्मि, किं मामिदानीं वक्ष्यसि ?

आर्लेण्डो— प्रथमं चुम्बितं दद्याम्, पश्चाद् भाषेय ।

रोसलिन्द्— न । प्रथमं ते भाषितुं युक्तम् । अथ यदा विषयाभावात् निर्वचनोऽसि तदा चुम्बितदानाय अवसरं लभेथाः । समर्था वाग्मिनः विषयावसाने निष्ठीवन्ति । कामिनां तु विषयावसाने—दैवानुकूल्यात् इदमस्माकं मा भूत्— अतिश्लाघ्या गतिः चुम्बितम् ।

आर्लेण्डो– कथं, यदि चुम्बितं निराक्रियेत ?

रोसलिन्द्— तदा सा अनुनये त्वां प्रवर्तयति । तत्र अभिनवविषयलाभो भवति ।

---

* चक्रक्रिमिर्नाम स क्रिमिः यस्य पृष्ठे वर्तुलः कश्चन सन्निवेशो दृश्यते । अपायशङ्कायां सः शिरः पुच्छं च तस्यान्तराकर्षति । अत एव तस्येह कविना गृहत्वेनाभिधानम् । स क्रिमिरपि किञ्चिद्वहति । त्वं तु न किमपि वहसि त्वत्प्रियायै दातुम् । क्लृप्ते काले आगन्तुमपि ते श्रद्धा नास्ति । मिथ्यैव मां त्वत्प्रियां वदसीति भावः ।

63

आर्लेण्डो— स्वकान्ताया अग्रे वर्तमानः को नाम अवसितविषयो भवेत् ?

रोसलिन्द्— अये, त्वं तथा भवितुमर्हसि, यद्यहं त्वत्प्रिया— किमहं त्वत्प्रिया नास्मि ?

आर्लेण्डो— त्वं मत्प्रियेति कथने कश्चन हर्षो मे भवति। यतः तद्विषय आलापः प्रसक्तो भवति।

रोसलिन्द्— साधु। तस्या रूपेण अहं वदामि— न त्वामहं परिग्रहीष्यामि।

आर्लेण्डो— तर्हि मम रूपेणाहं मरिष्यामि।

रोसलिन्द्— न। अवश्यं प्रतिनिधिद्वारा म्रियस्व। तपस्विनोऽस्य लोकस्य षट्सहस्राणि वयांसि भवन्ति।‡ इयति काले नासीत् यः कोऽपि मनुष्यः, यः स्वयं ममार कामार्तः। ट्रायलस् ग्रीस्-देशे दण्डेन भिन्नमूर्धा बभूव। किं तु मर्तुं यत् पूर्वं कर्तव्यं तत् स चकार*। स च कामिनां मातृकाभूतः। लिआन्दर्ः अयं हेरो-अस्यां ब्रह्मचर्यनिष्ठां परिहीतवत्यामपि बहूनि वर्षाणि जीवितवानभविष्यत्, यदि कस्याञ्चिदुत्तरायणरात्रौ तद् वृत्तं नाभविष्यत्। स हि सौम्यो युवा स्नातुं गतः अपस्मारोपहतो न्यमज्जत्। जडाश्च तदानीन्तना वृत्तलेखकाः जगृहुः— तत्र कारणं सेस्टास्-अभिजना हेरो, इति। किन्तु सर्वाणीमानि अनृतानि। मनुष्यास्तदा तदा मृताः क्रिमिभिर्भक्षिताश्च, न तु कामार्तिवशेन।

---

# प्रकृतिभेदः॥

I

उपाध्यायः— को हेतुः अद्य आगमः ?

शिष्यः— ग्रन्थे संशयाः सन्ति। पृच्छानीति।

उपाध्यायः— अधुना कार्यान्तरमस्ति ; श्व आगच्छ।

---

‡ पाश्चात्यानां मतग्रन्थे एवमभिहितमाहुः।

* मरणकारणमन्यत् किमपि तेन कृतमिति भावः।

उपाध्यायः— कुत्र आगतोऽसि ?

शिष्यः—संशयप्रश्नाय ; अत्रभवन्त आदिशन् 'श्व आगच्छ' इति।

उपाध्यायः— तथा नु । अस्मिन्नप्यहनि गुरु कार्यमस्ति। श्व आगच्छ ।

---

उपाध्यायः— अये पुनरागतोऽसि । सायमागच्छ ।

---

उपाध्यायानी— कस्त्वम् ? किमर्थमागतोऽसि ?

शिष्यः— तत्रभवति उपाध्याये संशयान् प्रष्टुमागतोऽस्मि । क्व तत्रभवान् वर्तते ।

उपाध्यायानी— इदानीमेव बहिरगमत् । अष्टसु घण्टासु प्रतिनिवर्त्स्यति ।

शिष्यः— अहमागममिति, पुनरपि श्वः प्रातरागमिष्यामीति, तत्रभवति विज्ञापयितुमर्हति भवती ।

---

उपाध्यायः— किमङ्ग पुनरागतोऽसि । प्रातः कति कार्याणि मम सन्ति । किमप्यजानन् मामुपद्रवसि । ग्रन्थे किं स्थलान्तराणि सर्वाणि सुज्ञातानि, निस्संशयानि, येन केषुचित् संशयच्छेदे अद्य एवं व्यग्रोऽसि ? सब्रह्मचारिणः पृष्ट्वा कुतो न संशयपरिहारं करोषि ? परीक्षायां किं एषु सन्दिग्धस्थलेष्वेव प्रश्नाः करिष्यन्ते ? किमप्यजानन् वृथा अटसि महापण्डितो भविष्यन्निव ।

शिष्यः— अज्ञानादपराद्धम् । क्षमा कर्तव्या ।

---

II

उपाध्यायः— सौम्य, कदा प्रत्यागतोऽसि ? 'द्वित्रर्दिनैर्निवर्तिष्ये' इत्युक्त्वा ग्रामं गतः दीर्घकालं तत्र स्थितवानसि । ग्रन्थे महान्

भागोऽन्येभ्योऽध्यापितः । यदा यदा अवसरं लभसे तदा तदा अस्मद्गृहमागच्छ । तत्र कृते पुनरध्यापयिष्यामि । स्वयमवलोकने सन्देहपरिहारो न भवेत् । पुनः पुनः संशया जायमानाः स्युः ।

शिष्यः— विमुक्तं भागं सहाध्यायिनां मुखेन श्रोष्यामि । पुनः सन्देहे अत्रभवत आयासयिष्यामि ।

उपाध्यायः— यथासौकर्यं कुरु । प्रथमग्रहणं उपाध्यायानां मुखाद् युक्तम् । अहं त्वामध्यापयितु सर्वदा सज्ञः ।

## पुस्तकपरामर्शः ॥

பெரியாழ்வார் திருமொழி—(மூன்றுவது ஸம்புடம் 2–6 முதல் 3–4 வரையில்) ஸ்ரீ உத்தமூர் தி. வீரராகவாசார்யர் இயற்றிய ப்ரபந்தரக்ஷை என்னும் உரையுடன் கூடியது. உபயவேதாந்த க்ரந்த மாலை ஆபீஸ், திருப்பதி. விலை ரூ. 2.

श्री॰ उत्तमूर् वीरराघवाचार्य स्वामिनः विश्वविख्यातसर्वतोमुखपाण्डित्याः 'उभयवेदान्तग्रन्थमाला' रूपेण सविमर्शानि सटिप्पणानि उपनिषद्भाष्याणि (श्रीरङ्गरामानुजमुनिविरचितानि) दिव्यप्रबन्धसूक्तीश्च प्रकाशयन्तो वर्तन्त इति प्रायः सर्वे विदन्त्येव एतत् । भगवदनुभवपरिवाहरूपाणां रसघनानां दिव्यप्रबन्धानां सन्त्येव प्राचीनैराचार्यवर्यैरनुगृहीताः परमाद्भुता व्याख्याः । अथापि अद्यतनानां सुकुमारमतीनां सुग्रहत्वाय अभिनवानां ललितानां व्याख्यानानां अस्त्यपेक्षा । परं तु एवंविधव्याख्यानकरणे अधिकारसम्पत्तिमन्तो विरलाः । न परं वेदान्तप्रधानेषु सर्वेषु शास्त्रेषु अपि तु साहित्यमार्गेऽपि गाढपरिचयशालिनः भगवद्भक्तिरसानुभववित्ता इहाधिकारिणः । एवंविधाधिकारसम्पन्ना अपि बहवः दिव्यप्रबन्धसूक्तिषु रुचिं न विन्दन्ति । श्री वीरराघवाचार्यास्तु विशिष्टवैदुष्याः दिव्यप्रबन्धेषु लब्धपरमास्वादाः तद्व्याक्रियायां प्रवृत्ताः तां कृत्वा प्रकाशनदशामप्यानयन्ति स्मेति रसिकानां प्रमोदस्थानमेतत् । इह प्रतिपदमवधेया विशेषाः सन्ति । अत्रोदाहरणतया 2. 9. 4. विवरणं निर्दिशामः ।

[सं]

# उद्यानपत्रिका ॥

पञ्चविंशवर्ष-

# विषयसूची ॥

## UDYANA PATRIKA

[XXV Year] CONTENTS


1. मेनका । 1, 25, 55.
2. व्याजोक्तिरत्नावली । [Y. Mahalinga Sastri M.A.B.L.] [5, 29, 59, 91
3. पञ्चविंशं वयः । 9
4. संस्कृतग्रन्थजातम् । 10, 39, 66, 107
5. वेदिका विशेषाः । [Vidyalankara V. R S. Tata-charya Siromani] 12, 42,69, 111
6. यथाभिमतम् । 16, 45 72, 114
7. वृद्धभाषितम् । 19, 47, 52, 76
8. तात्पर्यान्तरम् । 21, 81
9 प्रकृतिभेदः । 22, 52, 82, 117
10. पुस्तकपरामर्शः । 24, 53, 85, 119
11. विवेककल्पलता । 33, 95
12. प्रहर्षः । 63
13. महाराजः । 65
14. श्रीवरदाभ्युदयचम्पूः । [Sri Venkatadhvari ] 87

शास्त्रानुबन्धः—कुवलयानन्दः बुधरञ्जनीसमेतः । [365-369]


---

## शोधनिका ।

| पुट. | प. | |
|---|---|---|
| ४७ | 4 | भवन्तौ अपश्यताम् । |
| ८१ | 10 | पुनरुक्तदोषा । |
| १०४ | 4 | हसतेर्णि चि । |
| १०६ | 27 | प्रवणी । |

# The Udyana Patrika.

## (A twenty-five year old Sanskrit Journal)

### AN APPEAL.

Dushyanta felt very much tired when, after attending to the heavy and difficult work in the court, he rose for the day from his seat; but at that very moment news reached him that the disciples of Kanva, the great sage whom he revered most, accompanied by ladies, had come to the palace and wanted to see him. Having immediately sent word to his Purohit that he might receive them in a suitable manner and take them to him, he hurried to his *agnisala*, the apartment, where his sacrificial fires were kept and sacrifices used to be performed, since he thought that it was the proper place to see the sages. The sudden and unexpected arrival of the sage made him agitated and set him athinking. So, while awaiting them in the *agnisala* he began to guess as to what might be the reason for their going to him. Addressing his servant-maid he said—

> "What may be the object of Kanva in sending these sages to me? Was there any obstruction to the sages' penance by some bad characters? Or did somebody do any harm to the animals moving about in the *dharma* forests (in the forests where *dharma* grows)? Or is it that plants stopped blossoming or bearing fruit; all due to my misconduct? Thus many a reason comes to my mind. But I cannot decide which it is that brought them here."

No sage would come to the palace begging some favour from the king. So Dushyanta thought that something untoward, some unpleasant thing, had happened in the hermitage and so the rishis had come to him to complain against it. In a good government where the ruler is scrupulously observing his *dharma* there will be no suffering to people. Reversely

when people are suffering from some difficulty or other, one may be sure that all is not well with the Government; that it is being run on the line of *adharma*. Even plant-life is closely connected with the King's conduct. The presence of persons causing destruction to the good deeds of virtuous men and inclined to do *himsa* to human and other beings; the plants with blunted growth, these are all signs of *adharma* on the part of the King. This vital and close connection between the Kings's conduct and the people's life, Kalidasa wants to bring home to us by these words put in the mouth of Dushyanta, the hero of his famous drama Sakuntala. Explaining the passage the commentator quotes the following sloka—

राज्ञोऽपचारात् पृथिवी स्वल्पसस्या भवेत किल।
अल्पायुषः प्रजाः सर्वा दरिद्रा व्याधिपीडिताः ॥

[King's aberration results in smallness of land produce, people's short age, poverty and affliction by diseases]

It is very easy to say and there will be a very good number of people ready to say that this is all mere superstition or poetic exaggeration. But this is a point which cannot be so easily met and explained away. Kalidasa is great not merely because he is an adept in the art of writing poems and dramas, but because he is *the one*, among the multitude of our classical poets, who has dived deep into the ancient literature, both sacred and secular, and found out the truth that the sole purpose of the whole of it is to teach people how to lead a happy, contented, prosperous, and free-from-all-fear life, and wrote the immortal works placing within the reach of all people almost all the important teachings of the Sastras.

The Udyana Patrika is not language-mad. It has equal love to all languages. But it has taken the cause of Sanskrit because it is the language that is most neglected now-a-days and we can illafford to allow it to decay and dis-

appear. If there is any one who thinks that the Sanskrit Literature is an antiquated one and what is taught in it is of no use to day he is miserably ignorant of the truth about it. The Patrika is very anxious to show how this is so. It is very anxious to serve the people by making them first understand fully and clearly the ideal life and factors responsible for it, depicted in the literature and then persuading them to make an attempt to live such a life.

The Patrika struggling for existence, since its very start has somehow lived these twenty five years. It hereby approaches all those that are interested not merely in the Sanskrit language and literature as such but in the National welfare and prosperity and world peace, with the request that they may render all possible help to it so that it may serve the public better and more efficiently. Any help will be thankfully accepted and acknowledged.

G. South Mada Street, Tirupati.

D. T. Tatacharya
5—9—52

991